सद्वंशे संघुनीभावे प्रतिदासो भविष्यति”। “यानि कानि च बीजान्यङ्कोलतैलेन भेदयेत्। सफलो जायते क्षम सिद्धियोग उदाहृत। त्वङ्मुखे बिन्दुमात्रं तत्तैलं नि क्षिपेद् यदि। एवमाम भवेत् जीवो नान्यथा शङ्करोदितम्। विषुबीजाश्रित तैल पारावत पुरीषकम्। वराहस्य वसायुक्तं गृहीत्वा च समं समम्। गर्दभस्य वसायुक्तं हरिताल मन शिलाम्। एभिस्तु तिलकं कृत्वा यथा लङ्केश्वरोऽव्यय। उलूकविष्ठा गृहीत्वा खेरण्डतैलेन पेषयेत्। यस्याङ्गे निक्षिपेत् बिन्दु सविषो जायते ध्रुवम्। सर्पदन्त गृहीत्वा तु कृष्णवृश्चिककण्टकम्। कुक्कुरास्थियुक्तं सूक्ष्मचूर्णन्तु कारयेत्। यस्याङ्गे निक्षिपेच्चूर्ण सद्यो याति यमालयम्। सिन्दूर गन्धक ताल सम पिष्टा मन शिलाम्। तन्निष्प्रवस्य शिरसि ज्वलितं दृश्यते ध्रुवम्। अर्कक्षीर वटक्षीर क्षीर उदुम्बरसम्भवम्। गृहीत्वा पात्रके क्षिप्ते जलपूर्ण करोति च। दुग्ध तत्र भवेत् सद्यो महाकौतुककौतुकम्। अङ्कोलतैललिप्ताङ्गो दृश्यते राक्षसाकृति। पलायन्ते नरा सर्वे पशुपक्षिगजा हया। अङ्कोलस्य तु तैलेन दीप प्रज्वालयेन्नर। रात्रौ पश्यति भूतानि खेचराणि महीतले। बुधे वा शनिवारे वा कुकला ग्राह्य यत्नत। यत्र मूत्रयते यत्र कुकला तत्र नि क्षिपेत्। मिथुनेन्द्रूमिमध्येषु उद्धृते च पुन सुखी। नपुंसकं भवेत् सद्य नान्यथा शङ्करोदितम्। गन्धक हरितालञ्च गोमूत्रञ्च विष तथा। सूक्ष्मचूर्णमयं कृत्वा किञ्चिदङ्गे विनि क्षिपेत्। विप्रा सर्वे पलायन्ते यथा युद्धेषु कातरा” दत्तात्रेय तन्त्रे ११प०

इन्द्रजालिक त्रि० इन्द्रजाल शिल्पतयाऽस्यस्य ठन्। इन्द्रजालकारके। इमि इन्द्रजालीत्यप्यत्र स्त्रियां ङीप्।

इन्द्रजित् पु० इन्द्रं जितवान् जि—भूते क्विप्। दिति वंशीये असुरभेदे चाक्षुषमन्वन्तरे “दित्या पुत्रद्वय जज्ञे काश्यपादिति विश्रुतम्। हिरण्यकशिपुश्चैव हिरण्याक्षश्च वीर्यवान्”। इत्युपक्रम्य तत्पुत्रपौत्रादिवर्णने “इन्द्रजित् सर्वजिच्चैव वज्रनाभस्तथैव च” हरिव० ३अ०। २रावणपुत्रे मेघनादे च “पुत्रमिन्द्रजित वीर रावण प्रत्यधावत। जहि राममितिप्रक्षुब्धो वक्ष्य सलक्ष्मणम्। त्वया हि मम सत्पुत्र। यशोदीप्तमुपार्जितम्। जित्वा वज्रधर सङ्ख्ये सहस्राक्षम् शचीपतिम्” भा०व० २८०। “तौ घोरौ शरवर्षेन महाविन्द्रजिता रणे” भा०व० २८८ अ०।

इन्द्रजिद्धन्तृ पु० इन्द्रजितं हन्ति हन—तृच् ६त०। दशरथात्मज लक्ष्मणे। तद्धननकथा। “अविध्यदिन्द्रजित्तीक्ष्णै सौमित्रिं मर्मभेदिभि। सौमित्रिश्चानलस्पर्शैरविध्यद्रावणिं शरै”। इत्युपक्रम्य “द्वितीयेनास्य धनुष्मन्त धाङ्क देहादपातयत्। द्वितीयेन शरेणास्य भुज भूमौ न्यपातयत्। तृतीयेन तु बाणेन क्षुरधारेण भास्वता। जहार सुनसञ्चापि शिरो भ्राजिष्णुकुण्डलम्। विनिकृत्तभुजस्कन्ध कबन्ध भीमदर्शनम्। तं हत्वा सूतमप्यस्त्रैर्जघान बलिनां वर” भा०व० २८८अ०।

इन्द्रतापन पु० इन्द्रं तापयति तप+णिच्+ल्यु। १असुरभेदे “इन्द्रतापनवातापी केतुमान् बलदर्पित” असुरनामोत्कीर्त्तने” हरिव० २६अ०। २मेघनादे च। दयग्रीवश्च वाली च मेघराजो दशावर। टिट्टिभोविटभूतश्च सह्रादश्चेन्द्रतापन” भा०स०प०९अ० वरुणसभावर्णने।

इन्द्रतूल न० इन्द्रस्येव तूलमाकाशे उड्डीयमानत्वात्। आकाशे मरुता चाल्यमाने कार्पासे तूले त्रिका०।

इन्द्रतोया स्त्री इन्द्रमैश्वर्य्यान्वित तोयमस्या, इन्द्रेण पूरित तोयमस्या वा। गन्धमादनसमीपस्थे नदीभेदे। “इन्द्रतोयां समासाद्य गन्धमादनसन्निधौ” भा० अनु० प० २४।

इन्द्रदमन पु० “बाणस्य चेन्द्रदमनो लौहित्यासदपद्यत” हरिव०३अ० उक्ते बाणासुरपुत्रभेदे।

इन्द्रदारु पु० इन्द्रस्य तद्ध्वजस्य साधन दारु। देवदारुवृक्षे। इन्द्रध्वजशब्दे ९४६ पृष्ठे तस्य तद्ध्वजसाधनत्वम् दृश्यम्। इन्द्रद्रुमादयोऽप्यत्र।

इन्द्रद्युम्न इन्द्रस्येव द्युम्न धनमस्य। मालवेये १ऋषिभेदे २असुरावतारराजभेदे ३राजभेदे च। तत्र असुररूपोऽप्य कृष्णेन हत यथा। “इन्द्रद्युम्नोहत कोपाद्यवनश्च कसेरुमान्। हत सौभपति शाल्वस्त्वया सौभ च पातितम्” भा० व० १२ अध्याये कृष्ण प्रति व्यासवाक्यम्। ऋषिभेदस्तु। “ततस्ते ब्राह्मणा सर्वे बक दाल्भ्यमपूजयंश्चित्युपक्रम्य “द्वैपायनो नारदश्च जामदग्न्यश्च पृथुश्रवा। इन्द्रद्युम्नोभालुकिश्च कृतचेता सहस्रपात्”इति कतिचित् ब्राह्मणानभिधायाह। “एते चान्ये च बहवो ब्राह्मणा संशितव्रता। अजातशत्रुमानर्छु पुरन्दरमिवर्षय” भा० व० २६ अ०। राजभेदस्तु मार्कण्डेयादपि प्राचीन तत्कथा भा०व० १९८अ०। युधिष्ठिर प्रति मार्कण्डेयवाक्यम्। “स तानुवाचास्ति खलु राजर्षिरिन्द्रद्युम्नो नाम क्षीण-

[illegible]

इन्द्रद्रु [illegible]

इन्द्रद्रुम [illegible]

इन्द्रधनुस् [illegible]

इन्द्रद्युम्न [illegible]

नक्षत्रमङ्गलमुहूर्तैः । प्रास्थानिकैर्वनमियाद्दैवज्ञः सूत्रधारश्च । उद्यानदेवतालयपितृवनवल्मीकमार्गचितिजाताः । कुब्जोर्ध्वशुष्ककण्टकिवल्लीवन्दाकयुक्ताश्च । बहुविहगालयकोटरपवनानलपीडिताश्च ये तरवः । ये च स्युः स्त्रीसंज्ञा न ते शुभा शक्रकेत्वर्थे । श्वेतो ऽर्जुनो ऽश्वकर्णः प्रियकधवोदुम्बराश्च पञ्चैते । एतेषामन्यतमं प्रशस्तमथवाऽमरद्रुमम् । गौरासितक्षितिभवं सम्पूज्य यथाविधि द्विजः पूर्व्वम् । विजने समेत्य रात्रौ स्पृष्ट्वा ब्रूयादिमं मन्त्रम् । 'यानीह वृक्षे भूतानि तेभ्यः स्वस्ति नमो ऽस्तु वः । उपहारं गृहीत्वेमं क्रियतां वासपर्य्ययः । पार्थिवस्त्वां वरयते स्वस्ति ते ऽस्तु नगोत्तम । ध्वजार्थं देवराजस्य पूजेयं प्रतिगृह्यताम्' । छिन्द्यात् प्रभातसमये ह्युदक् प्राङ्मुखो ऽपिवा भूत्वा । परशोर्जर्जरशब्दो नेष्टः स्निग्धो घनश्च हितः । अपजयदमविध्वस्तं पतनमनाकुञ्चितं च पूर्व्वोदक् । अविलग्नं चान्यतरौ विपरीतमतस्त्वनेत्प्रातितम् । छित्त्वाग्रे चतुरङ्गुलमष्टौ मूले जले क्षिपेद्यष्टिम् । उद्धृत्य पुरद्वारं शकटेन नयेन्मनुष्यैर्वा । अरभङ्गे बलभेदो नेम्या नाशो बलस्य विज्ञेयः । अर्थक्षयो ऽक्षभङ्गे तथाणिभङ्गे च वर्धकिनः । भाद्रपदशुक्लपक्षस्याष्टम्यां नागरैर्वृतो राजा । दैवज्ञसचिवकञ्चुकिविप्रप्रमुखैः सुवेषधरैः । अहताम्बरसंवीतां यष्टिं पौरन्दरीं पुरं पौरैः । स्रग्गन्धधूपयुक्तां प्रवेशयेच्छङ्खतूर्यरवैः । रुचिरपताकातोरणवनमालालङ्कृतं प्रहृष्टजनम् । सम्मार्जितार्च्चितपथं सुवेषगणिकाजनाकीर्णम् । अभ्यर्च्चितापणगृहं प्रभूतपुण्याहवेदनिर्घोषम् । नटनर्त्तकगेयज्ञैराकीर्णचतुष्पथं नगरम् । तत्र पताका श्वेता विजयाय भवन्ति रोगदा पीता । जयदाश्च चित्ररूपा रक्ता शस्त्रप्रकोपाय । यष्टिं प्रवेशयन्तीं निपातयन्तो भयाय नागाद्याः । बालानां तलशब्दे सङ्ग्रामः सम्प्रयुद्धे वा । यन्त्रेण पुनस्तस्या विधिवद्यष्टिं प्ररोपयेद्यत्ने । जागरमेकादश्यां नरेश्वरः कारयेत्तस्याः । सितवस्त्रोष्णीषधरः पुरोहितः शाक्रवैष्णवैर्मन्त्रैः । जुहुयादग्निं सांवत्सरो निमित्तानि गृह्णीयात् । इष्टोद्रव्याकारः सुरभिः स्निग्धो घनो ऽनलो ऽर्चिष्मान् । शुभकृदतो ऽन्यो नेष्टो यात्रायां विस्तरो ऽभिहितः । स्वाहावसानसमये स्वयमुज्ज्वलार्च्चिः स्निग्धः प्रदक्षिणशिखो हुतभुङ् नृपस्य । गङ्गादिवाकरसुताजलचारुहारां धात्रीं समुद्ररसनां वशगां करोति । चामीकराशोककुरण्टकाब्जवैदूर्यनीलोत्पलसन्निभे ऽग्नौ न । ध्वान्तमन्तर्भवने ऽवकाशं करोति रत्नांशुहतं नृपस्य । येषां रथौघार्णवमेघदन्तिनां समस्वनो ऽग्निर्यदि वापि दुन्दुभेः । तेषां मदान्धेभघटाविघट्टिता भवन्ति याने तिमिरोपमा दिशः । ध्वजकुम्भहयेभभूभृतामनुरूपे वशमेति भूभृताम् । उदयास्तधराधराधरा हिमवद्विन्ध्यपयोधरा धरा । द्विरदमदमहीसरोजलाजैर्घृतमधुना च हुताशने सगन्धे । प्रणतनृपशिरोमणिप्रभाभिर्भवति पुरश्छुरितेव भूमिपस्य । उक्तं यदुत्तिष्ठति शक्रकेतौ शुभाशुभं सप्तमरीचिरूपैः । तज्जन्मयज्ञग्रहशान्तियात्राविवाहकालेष्वपि चिन्तनीयम् । गुडपूपपायसाद्यैर्विप्रानभ्यर्च्य दक्षिणाभिश्च । श्रवणेन द्वादश्याम् उपोष्या ऽन्यत्र वा श्रवणात् । शक्रकुमार्य्यः कार्याः प्राह मनुः सप्त पञ्च वा तज्ज्ञैः । नन्दोपनन्दसंज्ञे पादेनार्द्धेन चोच्छ्रायात् । षोडशभागाभ्यधिके जयविजये द्वे वसुन्धरे चान्ये । अधिका शक्रजनित्री मध्ये ऽष्टांशेन चैतासाम् । प्रीत्यै कृतानि विबुधैर्यानि पुरा भूषणानि सुरकेतोः । तानि क्रमेण दद्यात् पिटकानि विचित्ररूपाणि । रक्ताशोकनिकाशं चतुरस्रं विश्वकर्मणा प्रथमम् । रशना स्वयम्भुवा शङ्करेण चानेकवर्णधरी । अष्टाश्रि नीलरक्तं तृतीयमिन्द्रेण भूषणं दत्तम् । असितं यमश्चतुर्थं मसूरकं कान्तिमद्यच्छत् । मञ्जिष्ठाभं वरुणः षडश्रि तत्पञ्चमं जलोर्म्मिनिभम् । मायूरं केयूरं षष्ठं वायुर्जलदनीलम् । स्कन्दः स्वं केयूरं सप्तममददद्ध्वजाय बहुचित्रम् । अष्टममनलज्वालासङ्काशं हव्यभुग्दत्तम् । वैदूर्यमहशमिन्दुर्नवमं ग्रैवेयकं ददावन्यत् । रथचक्राभं दशमं त्वष्टा प्रभास्वरैर्युक्तम् । एकादशमहश विश्वेदेवाः सरोजसङ्काशम् । द्वादशमपि च निवेश मुनयो नीलोत्पलाभासम् । किञ्चिद्ध्वजोर्ध्वनिर्गतमुपरि शिरालं त्रयोदशं केतोः । शिरसि बृहस्पतिशुक्रौ लाक्षारससन्निभं ददतुः । यद्यद्येन विनिर्मितममरेण विभूषणं ध्वजस्यार्थे । तत्तद्दैवतं विज्ञातव्यं विपश्चिद्भिः । ध्वजपरिमाणत्र्यंशः परिधिः प्रथमस्य भवति पिटकस्य । परतः प्रथमात्प्रथमादष्टांशाष्टांशहीनानि । कुर्यादहनि चतुर्थे पूरणमिन्द्रध्वजस्य शास्त्रज्ञः । मनुना चागमगीतान् मन्त्रानेतान् पठेन्नियतः । "हरार्कवैवस्वतशक्रसोमैर्धनेशवैश्वानरपाशभृद्भिः । महर्षिसङ्घैः सदिगप्सरोभिः शुक्राङ्गिरःस्कन्दमरुद्गणैश्च । यथा त्वमूर्जस्कर भक्तरूपैः समर्च्चितस्त्वाभरणैरुदारैः । तथेह तान्याभरणानि देव शुभानि सम्प्रीतमना गृहाण । अजो ऽव्ययः शाश्वत एकरूपो विष्णुर्वराहः पुरुषः पुराणः । त्वमन्तकः सर्वहरः कृशानुः सहस्रशीर्षा शतमन्युरीड्यः ।

मासशाने तु ब्राह्मणानपि भोजयेत्। एवं प्रपूजयेन्नित्य सप्तरात्रं दिने दिने। त्रातारमिति मन्त्रोऽयं वासवस्य परं प्रियः। एवं कृत्वा दिशाभागे शक्रोत्थापनमादितः। श्रवणर्क्षयुतायाञ्च द्वादश्यां पार्थिवः स्वयम्। अन्त्यपादे भरण्यास्तु निशि शक्रं विसर्जयेत्। सुप्तेषु सर्वलोकेषु यथा राजा न पश्यति। "साङ्ग सुरासुरगणैः पुरन्दर। शतक्रतो। उपहारं गृहीत्वेमं महेन्द्रध्वज गम्यताम्" उत्पाते सप्तरात्रापि तथोपद्रवदर्शने। व्यतीत्य शनिभौमौ च अन्यस्मिन्नपि विसर्जयेत्। यस्मिन्कस्मिन् दिने चैव सूतकान्ते विसर्जयेत्। तथा रक्षेन्नृप केतुं न पतेद्भुवि निर्यथा। शनैः शनैः पातयेत्तु यथोत्थापनमादितः। विसृष्टं शक्रकेतुं स सालङ्कारं तथा निशि। निवेदनेन मन्त्रेण अगाधे सलिले नृप। 'तिष्ठ केतो। महाभाग। यावत्संवत्सरं जले। भवाय सर्वलोकानामन्तराय-विनाशक।' । उत्थापयेत्पूर्ववत्तं सर्वलोकस्य वै पुरः। एवं यः कुरुते पूजां वासवस्य महात्मनः। न तस्य राज्ये दुर्भिक्षं नेतयो नाप्यधर्मकृत्"। "इन्द्रध्वजसमुत्थानं प्रमादाच्च कृतं यदि। तदा द्वादशमे वर्षे कर्त्तव्यं नान्तरा पुनः" ति०त० भविष्य०। पञ्चमाष्टमदिनयोर्विसर्जने शक्यमेक्षया व्यवस्था। इन्द्रकेतुशक्रध्वजादयोऽप्यत्र।

इन्द्रनक्षत्र न०। इन्द्रस्वामिकं नक्षत्रम्। १ज्येष्ठानक्षत्रे तस्य तत्स्वामिकत्वात् तथात्वम्। अस्य शब्दे ४९९पृष्ठे नक्षत्रेश्वरा उक्ताः। इन्द्रनामकं नक्षत्रम्। २फल्गुनीनक्षत्रे च। फल्गुनीनक्षत्रस्य इन्द्रनामकत्वमाह शत०ब्रा० २,१,२,११। यथा "फल्गुनीष्वग्नी आदधीत। एता वा इन्द्रनक्षत्रं यत्फल्गुन्योऽप्यस्य प्रतिनाम्न्यौऽर्ज्जुनो ह वै नामेन्द्रो यदस्य गुह्यं नामार्ज्जुन्यो वै नामैतास्ता एतत् परोक्षमाचक्षते फल्गुन्य इति कोऽह्येतस्या गुह्यं नाम वक्ष्यतीति इन्द्रो वै यजमानस्तत्स्व एवैतन्नक्षत्रेऽग्नी आधत्ते"

इन्द्रनेत्र न० ६त०। १शक्रनेत्रे २सहस्रसंख्यायाञ्च।

इन्द्रनील पु० इन्द्र इव नीलः श्यामः। (पाना) इति ख्याते जरकतमतमणौ" तल्लक्षणमुक्तं रत्नपरीक्षायाम् "क्षीरमध्ये क्षिपेन्नीलं क्षीरं चेन्नीलतां व्रजेत्। इन्द्रनील इति ख्यातः सर्व्वरत्नोत्तमोत्तमः"। अस्य नीलवर्णत्वं च रघौ गङ्गायमुनासंगमे यमुनाजलाह्वयाय वर्णितम् यथा "क्वचित् प्रभालेपिभिरिन्द्रनीलैर्मुक्तामयी यष्टिरिवानुविद्धा अन्यत्र माला सितपङ्कजानामिन्दीवरैरुत्खचितान्तरेव" "नायेन्द्रनील किसलोन्मयूखम्" रघु। "एकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम्" "प्रेमप्रैरिन्द्रनीलैः" मेघदू०। अस्य छिद्रतद्दोषसम्भवत्वे महानीलसंज्ञा यथा हि "महामहानीलशिलारुच पुर" माघव्याख्यायां मल्लिनाथेन "सिंहलस्याकरोद्भूता महानीलास्तु ते स्मृताः" इति अगस्त्यवाक्यं प्रमाणतयोपन्यस्तम्। "वापीष्वन्तर्महानीलतटासु" माघ व्याख्याने तेन तद्देशोक्तेः।

इन्द्रपत्नी स्त्री ६त०। १पुलोमजायां शच्याम्। "उताहमस्मि वीरिणीन्द्रपत्नी मरुत् सखा विश्वस्मादिन्द्र उत्तरः" ऋ० १०,८६,९। इन्द्रस्य पतिः पालयित्री 'सपूर्व्वाञ्चेति' पा० ङीप् नुक् च। २इन्द्रपालयित्रीषु इडादिषु तिसृषु देवीषु च "होता यक्षत्तिस्रो देवीर्न भेषजं त्रयस्त्रिधातवोऽपस इडा सरस्वती भारती मही। इन्द्रपत्नीर्हविष्मतीः" यजु० २८,८। "इन्द्रपत्नीः इन्द्रस्य पालयित्र्यः, वेददी०। शची तु शुक्रग्रहस्य प्रत्यधिदेवता 'शची प्रत्यधिदैवतमिति शुक्रध्यानम्। विवाहादौ पूजनीयषोडशमातृकान्तर्गता च।

इन्द्रपर्णी स्त्री इन्द्र इव नीलं पर्णमस्याः जातित्वात् ङीष्। ओषधिभेदे। 'काखानुसार्य्य गुरुकोमलकाराग्नापोत शिवेन्द्रपर्ण्य' सुश्रु०।

इन्द्रपर्व्वत पु० इन्द्रनामकः पर्व्वतः। १महेन्द्रपर्व्वते इन्द्रवर्णं पर्व्वतं। २नीलवर्णे गिरिभेदे "वैदेहस्थस्तु कौन्तेय इन्द्रपर्व्वतमाश्रितः। किरातानामधिपतीनजयत् सप्त पाण्डवः" भा०स० २८ अ०।

इन्द्रपुत्रा स्त्री इन्द्रः पुत्रो यस्याः। अदित्याम्। तस्या इन्द्रजननीत्वात् तथात्वम्।

इन्द्रपुष्पी स्त्री इन्द्र इव नीलं पुष्पमस्याः जातित्वात् ङीष्। (विषलाङ्गला) लाङ्गलीवृक्षे। "अर्कालर्कमारक्कल्पयनागदन्ती-मयूरकमार्गीराजेन्द्रपुष्पीक्षुद्रश्वेतेत्यादि" सुश्रुत। वा कपि अतइत्वे इन्द्रपुष्पिकाप्यत्र

इन्द्रपुरोहित पु० ७त०। सुराचार्य्ये बृहस्पतौ

इन्द्रप्रमति पु० ऋग्वेदाध्ययनार्थं व्यासेन शिष्यत्वेन गृहीतस्य पैलस्य शिष्ये, शिष्यभेदे। "प्रथमं व्यासशिष्यस्तु पैलः ऋग्वेदपादपम्। इन्द्रप्रमतये प्रादात् विभज्य पञ्च संहिताः" अग्नि पु०। "एकैकां संहितां ब्रह्मन् एकैकस्मै ददौ विभुः। पैलाय संहितामाद्यां बह्वृचाख्यामुवाच ह'। इत्युपक्रम्य 'पैलः स्वसंहितामूचे इन्द्रप्रमतये मुनिः" भाग० १२ स्क० ६ अ०।

इन्द्रप्रस्थ न० इन्द्रस्य इन्द्रस्थानमेरोः प्रस्थ इव (दिल्ली ति) ख्याते पुरे। "इन्द्रप्रस्थगमस्तावत् कारि मा सन्तु चेदयः" माघ। "इन्द्रप्रस्थं शक्रप्रस्थं माकन्दं वारणावतम्। इति

[illegible] "[illegible]" [illegible] । [illegible] [illegible] । [illegible]

इन्द्रमहरव न [illegible] । [illegible]

इन्द्रमति इ [illegible] ।

इन्द्रमेवभ न [illegible] ।

इन्द्रमन्त इ [illegible] । [illegible]

[illegible] । [illegible] ।

इन्द्रमह इ [illegible] । [illegible] ।

इन्द्रमहकामुक इ [illegible] । [illegible] ।

इन्द्रमाण इ [illegible] । "[illegible]" [illegible] ।

इन्द्रयव न इ [illegible] । "[illegible]" [illegible] ।

इन्द्रवारुणी स्त्री [illegible] ।

इन्द्रसुत न [illegible] । [illegible] ।

इन्द्रलोक इ [illegible] । [illegible]

लौधश्रेणोश्रियम् श्रयेत् । यदा कलानिधिं क्वापि दर्शे
दृश्यत्वमावहेत् । तदा स्वश्रेयसीं ज्योत्स्ना सौधेष्वेषु
निगूहयेत् । यद्गृहभित्तौ वीक्ष्य स्वमन्ययोषिद्विशङ्किता ।
मुग्धा नारी वियोगेऽपि स्वा चित्रशालिकाम् । हर्म्येषु
नीलमणिभिर्निर्मितेष्वत्र निर्भयम् । स्वनीलिमानमाधाय
तमोऽह्न्यपि तिष्ठति । चन्द्रकान्तशिलाजालस्रुतमाला-
मल जलम् । तत्र चादाय कलशैर्नैच्छन्त्यम्यत्र जनाः ।
कुविन्दा न च सन्त्यत्र न चात्र मणिकोहराः । वेशान्यलङ्कृ-
तान्यत्र यत कल्पद्रुमार्पणात् । गणका नात्र विद्यन्ते
चिन्ताविद्याविशारदाः । यतश्चिन्तामणिः सर्वेषां चिन्ता चिन्ता-
मविद्रुतम् । सूपकारा न सन्त्यत्र रसपाकविचक्षणाः ।
दुग्धे सर्वरसानेका कामधेनुरतोऽनिशम् । कीर्त्तिरूपं यथा-
वस सर्वतो वाजिराजिषु । रत्नरूपं यथा सोऽत्र ह-
यानां चौरुपाधिकः । ऐरावतो दन्तिवरश्चतुर्दन्तोऽत्र
राजते । द्वितीय इव कैलासो नङ्गम स्फटिकोज्ज्वलः ।
तरुरत्नं पारिजातः स्त्रीरत्नं चोर्वशी त्विह । नन्दनं वन-
रत्नञ्च रत्नं मन्दाकिनी त्वपाम् । त्रयस्त्रिंशत् सुराणां या
कोटिः श्रुतिसमीरिता । प्रतीक्षते सावसरं सेवायै मघवन्
त्विह । स्वर्गेऽपीन्द्रपदादन्यत् विशिष्येत किञ्चन । यद्यस्ति
त्रैलोक्यामैश्वर्य्यं न च तुल्यमनेन हि । अश्वमेधशतस्यास्य
चास्य विनिमयेन यत् । किन्त्वेतत्तुल्यमन्यत् स्यात् पवित्र-
मथवा महत् । स्वर्णवती चयमनी पुण्यवत्यनिलावती ।
गन्धवत्यलकेशी च नैतत्तुल्या महर्द्धिभिः । अयमेव सह-
स्राक्षस्त्वयमेव हि दृश्यते । शतमन्युरयं देवो नामान्ये-
तानि नामतः । सर्वेऽपि लोकपाला ये तएनमुपासते ।
नारदाद्यैर्मुनिवरैरयमाशोभिरिज्यते । एतत्स्वैश्वर्य्येण च
सर्वेषां लोकानां स्थैर्य्यमिष्यते । पराजयाच्छचीन्द्रस्य त्रै-
लोक्यं स्यात् पराजितम् । दनुजा मनुजा दैत्यास्तपस्यन्त्य-
पश्यमाः । गन्धर्वयक्षरक्षांसि माहेन्द्रपदलिप्सवः ।
सगराद्या महीपाला वाजिमेधविधायकाः । शतवन्तो महा-
यज्ञं यज्ञैश्वर्य्यजिघृक्षव । निष्प्रत्यूहं क्रतुशतं य
कश्चित् कुरुतेऽवनौ । जितेन्द्रियोऽमरावत्या स प्राप्नोति
पुलोमजाम् । अथवाप्यकृतयज्ञा वसन्त्यत्र महीभुजः ।
ज्योतिष्टोमादिभिर्यागैर्ये यजन्त्यपि ते द्विजाः । तुलापुरु-
षदानादि महादानानि षोडश । ये यच्छन्त्यमलात्मा-
नस्ते लभन्तेऽमरावतीम् । अक्रोधनादिभिर्धीरा सत्यामेव-
पथाश्रिताः । विश्रान्ता वीरशयने तेऽत्र तिष्ठन्ति भूभुजः
व्यूहेषात् समाख्याता महेन्द्रनगरीस्थितिः । यायजू-

काः वसन्त्यत्र यज्ञविद्याविशारदाः'' १० अ० । ''अतिथि-
स्त्विन्द्रलोकेश'' इति मनुना अतिथिपरिचर्य्याभिरपि
तत्प्राप्तिरुक्ता । एवं राजसूययज्ञेनापि तत्प्राप्तिः
भा० स० उक्ता । शक्रलोकादयोऽप्यत्र
इन्द्रवंशा स्त्री ''स्यादिन्द्रवंशा ततजैरसंयुतैः'' छन्द०र०
उक्ते द्वादशाक्षरपादके वर्णच्छन्दोभेदे ।
इन्द्रवज्रा स्त्री ''स्यादिन्द्रवज्रा यदि तौ जगौ गः'' छन्द०र०
उक्ते एकादशाक्षरपादके वर्णच्छन्दोभेदे ।
इन्द्रवल्ली स्त्री इन्द्रप्रिया वल्ली शाक०त० । १पारिजातलतायाम्
''सोमवल्लीमिन्द्रवल्लीं शमीं बिल्वस्य कण्टकान्'' सुश्रु० ।
(राखालशसा) २इन्द्रवारुण्यां लतायाञ्च इन्द्रवल्लरीत्यप्यत्र ।
इन्द्रवस्ति पु० इन्द्रस्यात्मनो वस्तिरिव । २ जङ्घामध्यभागे । ''इन्द्र-
वस्तिपरिमाणं पीठकूर्परान्तरायाम सोड्शाङ्गुल''
सक्थिमर्म्माणि । ''अतः इन्द्रवस्तिकूर्पोपरिष्टाद् इन्द्रवस्ति-
नाम्नैर्लोहिताक्षाणि विटपश्चेति'' विभज्य ''पार्ष्णिं
प्रति जङ्घामध्य इन्द्रवस्तिर्नाम तत्र शोणितक्षये मरणम्''
इति च सुश्रु० । अतोऽस्य जीववसतितुल्यत्वात्तथात्वम् ।
इन्द्रवारुणी स्त्री इन्द्रस्यात्मनोवारुणीव प्रिया (राखालशसा)
तिक्तरसाया श्वेतमूलाया पीतपुष्पाया लतायाम् । स्वार्थे
कन् । इन्द्रवारुणिकापि अत्रैवार्थे ।
इन्द्रवीज न० इन्द्रस्य कुटजस्य वीजम् । इन्द्रयवे । ''वचे-
न्द्रवीजं त्रिफलासर्पिर्मांसरसाम्बुभिः'' सुश्रु० ।
इन्द्रवृक्ष पु० ६त० देवदारुवृक्षे जटाधरः । तस्य इन्द्र ध्वजत्वेन
स्यात्तथात्वम् । तस्येन्द्रध्वजसाधनत्वञ्चेन्द्रध्वजशब्दे उक्तम् ।
इन्द्रवृद्धा स्त्री ''अथात क्षुद्ररोगान् व्याख्यास्याम इत्यु-
पक्रम्य । 'वल्मीकमिन्द्रवृद्धेत्यादि विभज्य' । ''वृत्तमुच्च-
करवन्मध्ये पिडकाभिः समाचिताम् । इन्द्रवृद्धान्तु तां
विद्याद्वातपित्तोत्थितां भिषक्'' सुश्रुतोक्तलक्षणे क्षुद्ररो-
गभेदे । ''इन्द्रवृद्धामिन्द्रवृद्धाञ्च गर्द्दभीं जालगर्द्दभम् ।
इरिविल्लां गन्धनाम्नीं कक्षां विस्फोटकां तथा । पित्तजस्य
विसर्पस्य क्रियया साधयेत् भिषक्'' इति सुश्रु० ।
इन्द्रव्रत न० इन्द्रस्येव वर्षणे व्रतम् । ''वार्षिकांश्चतुरो मासान्
यथेन्द्रोऽप्यभिवर्षति । तथाभिवर्षेत् स्वं राष्ट्रं कामैरिन्द्र-
व्रतं चरन्'' इति मनूक्ते प्रजापालने राज्ञोव्रतभेदे ।
इन्द्रशत्रु पु० इन्द्रः शत्रुः शातयिता यस्य । वृत्रासुरे । वृत्रा-
सुरस्य तथात्वञ्च यथा ''स त्वष्टा पुत्रोऽस्य । कुपितोऽनुप-
हूत सोममभ्यद्रवत् स स्वयमेव यज्ञवेशसं चक्रे स द्रोण-
कलशे शुक्रं परिशिष्टं आ यत् मन्त्रतः प्रकारेण्यत्-

शिल्पागारे। अमरे इन्द्रसुरिसेति पाठान्तरे पृ०। तत्रैव
इन्द्रसुरा स्त्री इन्द्रस्यात्मनः सुरेव प्रिया। (राखालससा) इन्द्र-
वारुण्याम् राजनि० "वार्त्ताकुशिम्बीन्द्रसुरापटोलेत्यादि"
सुश्रु०। "गुडूचीन्द्रसुरा तथा कुष्ठसर्षपनागरं। तैलमेभि
र्गर्भे पक्वं सुरास्नादिरसाप्लुतम्" सुश्रु०।

इन्द्रसूक्त न० इन्द्रदेवताकं सूक्तम्। ऋग्वेदान्तर्गते सूक्त-
भेदे तच्च "इन्द्र विश्वा अवीवृधन्" इत्यादि एकादशर्चम्।
ऋ०१म०११सूक्तम् एतच्च तत्तत्कर्मणि इन्द्रस्तुत्यर्थं प-
ठनीयं तथा द्वारपालेन वृत्तादानादौ मण्डपस्य पूर्वदिशि
जायञ्च "श्रीसूक्तं पावमानञ्च सोमसूक्तं सुमङ्गलम्। शान्त्य-
ध्यायञ्चेन्द्रसूक्तं रक्षोघ्नं चेति बह्वृचौ। पूर्वं द्वारं समा-
श्रित्य पठेतामिति निश्चयः" विधानपारि०पु०, तच्च सूक्तं
वृत्तादानादिपद्धतौ ९२ पृष्ठे ऽस्माभि प्रदर्शितम्।

इन्द्रसेन पु० इन्द्रस्य सेना इव सेना यस्य। १ नृपभेदे स च परि-
क्षित पुत्रभेदः "परिक्षितोऽभवत् पुत्राः सर्वे धर्मार्थकोविदाः।
कक्षसेनोग्रसेनौ च चित्रसेनश्च वीर्यवान्। इन्द्रसेनः
सुषेणश्च भीमसेनश्च नामतः" भा०आ०९४अ० अयञ्च
भविष्यत् परिक्षितः प्राचीनः कुरुवंश्यएव इन्द्राभयन्दे
विवृतिः। युधिष्ठिरस्य २ भृत्यभेदे। "इन्द्रसेनादयश्चैव भृत्याः
परि चतुर्दश। रथैरनुययुः शीघ्रं स्त्रियः आदाय सर्वशः"
भा०व०१अ० "इन्द्रसेनो विशोकश्च पुरुश्चार्जुनसारथिः।
अश्वादाहरणे युक्ता सन्तु मत्प्रियकारिणः" भा०स०११अ०

इन्द्रसेना स्त्री ६त०। इन्द्रस्य १सेनायाम्। २पञ्चस्य मातरि
मौद्गल्यस्य स्त्रीपुत्रपत्न्याम्। "मौद्गल्यस्य सुतो ज्येष्ठो
ब्रह्मर्षिः सुमहायशाः। इन्द्रसेना यतोगर्भं वध्यश्च प्रत्य-
पद्यत" हरि०३२अ० "नारायणीवेन्द्रसेना बभूव वश्या
नित्यं मुद्गलस्याजमीढ" भा०व०११३अ०।

इन्द्रसेनानी पु० इन्द्रसेनां नयति नी–क्विप् ६त०। शक्रस्य
सेनापतौ कार्त्तिकेये तत्कथा। कार्त्तिकेयेन पराजितेनेन्द्रेण
कार्त्तिकाय इन्द्रत्वपद दातुमीहमानेन सह तस्य उक्तिप्रत्युक्ति
वर्णनेन तेन तत्सेनापत्यमङ्गीकृतमेतत् भा०व०२२८अ०
वर्णितं यथा "शक्र उवाच ममस्तेन्द्रो महाबाहो। सर्वेषां
न सुखावह। अभिषिच्यस्व चैवाद्य प्राप्तरूपोऽसि सत्तम।
त्वमेव त्रैलोक्यमध्ये विजये रत। अहन्ते किङ्कर
शक्रोऽनघ ममेन्द्रत्वमीप्सितम्। बल त्वयाद्भुत वीर! त्व देवा-
नामरीन् जहि। अवज्ञास्यन्ति मा लोका वीर्येण तव
विस्मिता। इन्द्रत्वे तु स्थितं वीरे। बलहीनं पराजितम्।
आवयोश्च मिथोभेदं प्रयतिष्यन्त्यतन्द्रिता। भेदिते च त्वयि
विभो। लोकोद्वैधमुपैष्यति। द्विधाभूतेषु लोकेषु निश्चितेषु
ययोस्तदा। विग्रहः सम्प्रवर्त्तेत भूतभेदान्महाबल।।
तत्र त्वं मां रणे तात। यथाश्रद्धं विजेष्यसि। तस्मादिन्द्रो
भवानेव भविता मा विचारय। स्कन्द उवाच। त्वमेव
राजा भद्रं ते त्रैलोक्यस्य ममैव च। करोमि किञ्च ते
शक्र। शासनं तद्ब्रवीहि मे। इन्द्र उवाच। अहमिन्द्रो
भविष्यामि तव वाक्यान्महाबल।। यदि सत्यमिदं वाक्यं
निश्चयाद्भाषितं त्वया। यदि वा शासनं स्कन्द। कर्त्तुमि-
च्छसि मे शृणु। अभिषिच्यस्व देवानां सेनापत्ये महाबल!
स्कन्द उवाच। दानवानां विनाशाय देवानामर्थसिद्धये।
मामभिषिञ्च मां" भा०व०२२८अ०। शक्रसेनापतिशक्रसेनाधि
पादयोऽप्यत्र। "शक्रसेनापतिः स्कन्द" पु०

इन्द्रस्तुत् पु० इन्द्रः स्तूयते ऽत्र। इन्द्रस्तुत्यधिकरणे उक्थ्य
यज्ञे द्वितीयाहे "इन्द्रस्तुदुक्थ्यो द्वितीयमहर्भवति।
इन्द्रो वै सर्वे देवाः सर्वेषां देवानामाप्त्यै तस्मैन्द्राग्रहा
भवन्त्यैन्द्र्यः पुरोरुच सर्वमैन्द्रं भवतीति" शत०,१२,७,
१,४, अयमुक्थ्यसाध्यः तदुपक्रमएव कात्या०२१,१,४।
"त्रय उक्थ्या अग्निष्टुदिन्द्रस्तुत् सूर्यस्तुत्" इत्यभिधानात्।

इन्द्रस्तोम पु० अतिरात्राङ्गे यागभेदे स च कात्या०२४
४,६,। अतिरात्रोपक्रमेण "इन्द्रस्तोमो विश्वजिता"
विश्वजितः स्थाने इन्द्रस्तोम कार्य्य" कर्क०।
पूर्व्वोक्तसुपक्रम्य तत्प्रकारादि तत्र दर्शितम्। अयञ्च राजा
कार्य्य "इन्द्रस्तोमो राजयज्ञ" "सहस्रं दक्षिणा" कात्या०
२२,११,१५,१६, स च उक्थ्यसाध्य "उक्थ्यः" कात्या०
१२,११,१७ उक्ते।

इन्द्रहू स्त्री इन्द्रः हूयतेऽनया ह्वे–क्विप् ६त०। शक्राह्वान
साधने ऋग्भेदे। कर्त्तरि क्विप्। २तदाह्वानकर्त्तृमुनिभेदे च।
ततो गर्गा० अपत्ये यञ्। ऐन्द्रहव्यस्तदपत्ये पुंसि।

इन्द्रा स्त्री इदि–रन्। १फणिज्झकवृक्षे (काटाजाीर,
मेदिनि (राखालसमा) २इन्द्रवारुण्याम्। राजनि०
३गव्याम् शब्दर०।

इन्द्राग्नि पु० द्वि०व०। इन्द्रश्चाग्निश्च देवताद्व०। शक्राग्न्यो-
र्मिलितयोर्देवयो। "इन्द्राग्नी यत्र हूयेते" म०त०
स्मृतिः 'पुरोहितकामस्येन्द्राग्न्योः स्तोमः" कात्या०२२,
११,२०,२१ उक्त। तत्र स्तोमे पुरोहितस्य राज्ञो वा
सह वाऽधिकारः तत्र ब्राह्मणस्य दक्षिणा चतुर्विंशतिर्गाव
राज्ञ अष्टचत्वारिंशद्गावः' कर्क०। तौ देवते अस्य अण्।
ऐन्द्राग्न तद्देवताके हविषि यज्ञे च। इन्द्रस्य पर्जन्य-

[illegible] ।

इन्द्राग्निधूम पु० [illegible] ।

इन्द्राणी स्त्री० [illegible] । "नैन्द्राणी न वरुणानी न रौहिणी" [illegible] ।

इन्द्रानुज पु० [illegible] ।

इन्द्रायुध न० [illegible] ।

इन्द्रारि पु० [illegible] ।

इन्द्रावरज पु० [illegible] ।

इन्द्राशन पु० [illegible] ।

इन्द्रासन न० [illegible] ।

इन्द्रिय न० [illegible]

क्रियासाधने १ चक्षुरादौ २ हस्तादौ च। "इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा" पा० तस्यानेकाविधार्थकता दर्शिता इतिशब्दः प्रकारार्थे इन्द्रेण दुर्जयमिन्द्रियमित्यपि" सि० कौ०। अत्र सूत्रे इन्द्रेण परमात्मना दृष्टमित्युक्तिरपि इन्द्रियस्य चक्षुरादीनां प्रत्यक्षागोचरतां निरस्यति। यद्वा इन्द्रेणात्मना दृष्टत्वात्तेनाभिमतं काणोऽहं बधिरोऽहमित्याद्यभिमतम्। "एतस्माज्जायते प्राणो मनः सर्व्वेन्द्रियाणि चेति" श्रुतेः इन्द्रियस्य ईश्वरसृष्टत्वम्। इन्द्रदत्तमिति इन्द्र ऐश्वर्य्ये दत्तोऽर्थो स्वस्वकार्य्ये हि तेषामैश्वर्य्यमीश्वरेण दत्तम् अतएव तानि बलादिव स्फुटीत्या विषयेषु प्राणिनः स्वस्वविषयग्रहणाय प्रवर्त्तयन्ति। असति चैश्वर्य्ये न तद् सम्भवति। चक्षुरादीनामात्मानुमापकत्वञ्चेत्थम्। करणव्यापारः सकर्तृकः करणव्यापारत्वात् छिदिक्रियायां वास्यादिव्यापारवदिति करणव्यापारेण कर्त्तुरनुमानगम्यत्वे तत्साजात्यात् ज्ञानक्रियाकरणमपि सकर्त्तृक करणत्वादिति चक्षुरादिना ज्ञानसाधनेनात्मनोऽनुमानम्। तथा इन्द्रियस्याप्रत्यक्षत्वेऽपि ज्ञानक्रिया सकरणिका क्रियात्वात् छिदिक्रियावत् इत्यनुमानम् तत्सत्त्वे प्रमाणम्। तत्तन्मतभेदेन इन्द्रियस्य भौतिकत्वाभौतिकत्वसर्वगतत्वासर्वगतत्वप्राप्यकारित्वाप्राप्यकारित्वादिकम् आत्मशब्दे ६६५ पृष्ठे प्रपञ्चेन परीक्षितम्। इन्द्रियञ्च द्विविधं ज्ञानकर्म्मेन्द्रियभेदात् तत्र श्रोत्रादीनि ज्ञानेन्द्रियाणि हस्तादीनि कर्म्मेन्द्रियाणि। "श्रोत्रं त्वक्चक्षुषी जिह्वा नासिका चैव पञ्चमी। पायूपस्थं हस्तपादं वाक् चैव दशमी स्मृता" मनुः। "नासिकालोचने जिह्वा त्वक् श्रोत्रं चेन्द्रियाणि च। हस्तौ पायुरुपस्थश्च वाक्पादौ च दशैव तु" शारदा०। "बुद्धीन्द्रियाणि श्रोत्रघ्राणरसनत्वगाख्यानि। वाक्पाणिपादपायूपस्थानि कर्म्मेन्द्रियाण्याहुः" सां० का०। एतानि च बाह्येन्द्रियाणि। "उभयात्मकमत्र मनः सङ्कल्पकमिन्द्रियञ्च साधर्म्म्यात्" सां०का० मनस्तूभयविधकरणोपकारित्वात् करणम्। तच्च ज्ञानकर्म्मव्यापारसामान्ये कारणमपि न तत्र करणम् असाधारणकारणस्यैव करणत्वात् रूपादिज्ञाने चक्षुरादीनामिव तस्य असाधारण्यात्ग्राह्यविशेषाभावात् किन्तु सुखाद्युपलब्धौ असाधारण्यात् तत्रैवास्य करणत्वमिति नैयायिकादयः। वेदान्तिनस्तु मनसोनेन्द्रियत्वमङ्गीकुर्व्वन्ति तच्च आत्मशब्दे दर्शितम्। अतएव "पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम्। अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनमिति" मनोबुद्ध्योरिन्द्रियात् पृथङ्निर्द्देशः। साङ्ख्यमते "सात्त्विक एकादशकः प्रवर्त्तते वैकृतादहङ्कारात्। भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम्" सां०का० रजोगुणोपष्टब्धसात्त्विकादेवाहङ्कारात् एकादशेन्द्रियोत्पत्तिरुक्ता तेनाहङ्कारिकाणीन्द्रियाणि। "घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः" गौ०सू० भौतिकानीति नैयायिकाः। "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चेति" श्रुतेः आत्मोपादानानीति वेदान्तिनः। अत्र इन्द्रियेभ्यो मनसः पृथङ्निर्देशादपि मनसोनेन्द्रियत्वम् अतएव कठोपनिषदि गीतायाञ्च "इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः" "इन्द्रियाणि हयानाहुर्मनः प्रग्रहमेव चेति" च इन्द्रियमनसोर्भेदनिर्देशः"। यथा च तदुत्पत्तिः तथा पञ्चदश्यां दर्शितम् यथा। "तमःप्रधानप्रकृतेस्तद्भोगायेश्वरेच्छया। वियत्पवनतेजोऽम्बुभुवो भूतानि जज्ञिरे। सत्त्वांशैः पञ्चभिस्तेषां क्रमाद्धीन्द्रियपञ्चकम्। श्रोत्रत्वगक्षिरसनघ्राणाख्यमुपजायते। तैरन्तःकरणं सर्वैर्वृत्तिभेदेन तत् द्विधा। मनोविमर्शरूपं स्याद्बुद्धिः स्यान्निश्चयात्मिका। रजोंशैः पञ्चभिस्तेषां क्रमात् कर्म्मेन्द्रियाणि तु। वाक्पाणिपादपायूपस्थाभिधानानि जज्ञिरे" १दीपे। तेषां स्थानकार्य्यादिकमुक्तं तत्रैव २दीपे "श्रोत्रं त्वक्चक्षुषी जिह्वा घ्राणं चेन्द्रियपञ्चकम्। कर्णादिगोलकस्थं तत् प्राप्तं धावेत् बहिर्मुखम्। कदाचित् पिहिते कर्णे श्रूयते शब्द आन्तरः। प्राणवायौ जाठराग्नौ जलपानेऽन्नभक्षणे। व्यज्यन्ते ह्यान्तराः स्पर्शा मीलने चान्तरं तमः। उद्गारे रसगन्धौ चेत्यक्षाणामान्तरग्रहः। पञ्चोक्त्यादानगमनविसर्गानन्दकाः क्रियाः। कृषिवाणिज्यसेवाद्याः पञ्चस्वन्तर्भवन्ति हि। वाक्पाणिपादपायूपस्थैः कर्म्मेन्द्रियपञ्चकम्। मनो दशेन्द्रियाध्यक्षं हृत्पद्मगोलकस्थितम्। तच्चान्तःकरणं बाह्येष्वस्वतन्त्रं विनेन्द्रियैः। अक्षेष्वर्थार्पितेष्वेव गुणदोषविचारकम्। सत्त्वं रजस्तमश्चास्य गुणा, विक्रियते हि तैः। वैराग्यं क्षान्तिरौदार्य्यमित्याद्याः सत्त्वसम्भवाः। कामक्रोधौ लोभमोहावित्याद्या रजउत्थिताः। आलस्यभ्रान्तितन्द्राद्या विकारास्तमउत्थिताः। सात्त्विकैः पुण्यनिष्पत्तिः पापोत्पत्तिश्च राजसैः। तामसैर्नोभयं किन्तु वृथायुःक्षपणं भवेत्"। तत्रेन्द्रियाणां कार्य्यभेदा अपि सां०का० दर्शिता यथा 'शब्दादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः। वचनादानविहरणोत्

सर्वोन्नत्याच महताम्"। कारिकायां तन्मात्रस्य बीजत्वात् तेषाम् ध्यानम् यथा च घ्राणस्य गन्धपदवत् तथा कर्णे पदवत् चक्षुषो रूपपदवत्। जिह्वाया रसपदवत्। त्वचश्च स्पर्शपदवत् तन्मात्रार्थं सर्वं भवति। एवं नाना दीनां गन्धादिविषयोऽन्यानि। "बाह्यमस्य विविधं इन्द्रिय पाद तस्य विषयात्मकम्। तामसस्वार्थं पाद वि षयात्मकमं करणम्" वा वा। "आत्मनस्य विविधं बहिश्चक्षुरादि यत्र इति। शरीरात्मकरणवि- शेषान् करणम्। एवमा बाह्यविविध मनश्चान्तःकरण विषयाश्च विषयाभासानि विषयसंबन्धाविभावात्मक वादेन तन्मात्रेण हारोपयति। यत महीन्द्रियात्मको बद्धेन कर्मेन्द्रियाणि द्र यथाच आकारेण वा भी। "विषयाणां ग्रहोऽथ च कर्म बहिरिन्द्रियाणि च" इह। "बौद्धानीन्द्रियाणि" इह। "इन्द्रियाणीन्द्रियार्थेष रागद्वेषौ व्यवस्थितौ" "इन्द्रियाणि प्रमाथीनि" गीता। तत्र बाह्यानि ज्ञानेन्द्रियाणीति बहुशास्त्रसिद्धान्तम् क्वचित् बौद्धे भावस्वात् ज्ञानो ज्ञानार्थः। यथा इन्द्रियाणाम् बाह्यगन्धादिविषयग्रहणम् बहुशास्त्राभिमतम् अन्यत्रिदं इ इन्द्रियं ज्ञानादीनां ज्ञानेन्द्रियाणि। कर्मेन्द्रियाणि कर्मादीन्द्रियाणि तेषां गोलकात्मकं इत्यादि च वायादि तत्र जिह्वाख्यात् ज्ञानमेवम्। तदेतत् जीवानां लिङ्ग- शरीरत्वेनोपि तत्सूक्ष्मतत्कारणत्वम् तन्मात्रात्मकं इति। गौतमी मोक्षार्थे तैजसानि। तत्त्व लिङ्ग- श्लोकाद्वे सूचित तत्र ११११ इत्येवम्। एतेषां १ गौणं च। 'इन्द्रियार्थाः' इति तथादीन्द्रिया वर्णित तावत् तथा तत्सर्वं तेषां

इन्द्रियगोचर इ इन्द्रियाणां गोचरः विषयः। यथादि तु विशेष तै हि प्रतिनियतमेवैकमिन्द्रियं ग्राह्यं यथा श्रोत्रस्य शब्दः तथेन्द्रियं तत्तदादिविषयस्य चक्षुरादेर्द्रव्यादिरूपादि रसनाया रसः घ्राणस्य गन्ध इत्यादि। तत्त्वाख्यानि आकाशादिषु तत्र इन्द्रियग्राह्या ज्ञानानि यथा "श्रोत्रस्य शब्दविषयकं तत्त्वादिरपि गृहा। तथा रसादिरसनायामप्यकोशि च मतिः। आदिपदात् तदपि तत्तद्गोचरत्वम्। तथा रसस्य शुद्धादिविषय। इत्यत्र तत्तत्कारणमात्रादिविषया चक्षुरादयः गोचरेन्द्रियाणि तदपि प्रत्यक्षं तस्य। तिमात्रपदोपदादनप्रकार इन्द्रियाद्यर- म्। विशेषार्थे गौणमपि तदादि च तावत्। वा इति आदि गन्धमाह। गोचरो स्वात्मा भोग्यत्वाद् आदि गन्धादि। यदा नाम अन्यथा अमृतेत्रोदितः। इत्यपि। गन्धाद्योतदर्थेषु पयस्याः इति जन्य। तथा "तावत् आदिश गोचरम्" गोचरमिति। यथा इतरा च आकाशम् "गोचरे च वायः" इतिशास्त्रेऽपि गोचरेन्द्रियं गृह्यते। तथा इन्द्रियार्थेष्वपि इन्द्रियाणां गोचरे इति "मनोऽपि तत्र कर्णादिषु प्रपञ्चितम्" इति तथा इत्यादि गन्धादिरसस्पर्शादिरूपाणि

इन्द्रियग्राम इ ऐड़। इन्द्रियसमूहार्थे "इन्द्रियादीनि यथा निग्रहयति कर्मणि" इह। इन्द्रियसमूहयोरथवा। "मन्वे तत् इन्द्रियग्रामं" वाता।

इन्द्रियज त्रि इन्द्रियात्मकात्ते जन-ड। इन्द्रियजनि तत्कानि प्रत्यक्षे। तदिन्द्रियसमवायसंयोगजन्यत्वेन ज्ञाता। इन्द्रियसमवायसंयोगज इन्द्रियाणि च विषय संनिकर्षेण ग्राह्यं प्रत्यक्षम् विषयसम्बन्धेन तत्र ज्ञा- नम्। आकारोदैव तेषां ज्ञानसाधनम् प्रत्यक्षज्ञानम्।

इन्द्रियज्ञान न इन्द्रियेण ज्ञानम् ज्ञानम्। तदर्थे ज्ञाने।

इन्द्रियनिग्रह इ इन्द्रियाणां निग्रहः विषयेभ्यः गृहीत्वा तत्- निवर्तनं निग्रहः तेन निरोधः। इन्द्रियाणां विषयेषु सा- मान्यतो तत्प्रतिरोधे इत्यादिनिग्रहादि। मनसः तत्- वशा "इति। यथा तत्कालस्य वैराग्यपरिज्ञानेन्द्रियनिग्रह। वैराग्य तत्स्मरणीयो दर्शन वर्णनकथनम् ज्ञानम्। इन्द्रियनिग्रहः अपरविनियोगस्य निरोधाभिव्यक्तिः इयो च स्व। स्वयोगवशतात् योगानां ज्ञानेन्द्रियाणां मनसाधीनां च कर्मेन्द्रियाणां च आचारेषु अविनियोगवशेन रोधते च। "इन्द्रियविरोधे योगविश्वासोपस्थितो योगात्मा"। इन्द्रियाणां कर्मणां तथोऽयं अतीन्द्रियम्। तदत्र इति यथा तथा प्रमादिनोऽपि अतीन्द्रियोपयोगेन्द्रियार्थानां विषये अपि अध्यवसायानामिन्द्रियाणां हि यतो ज्ञानाद् इत्यभिधीयते। अ- तुष्ट इति तथा वायुनिर्विषयतादि जीवानां प्रवीय। आशीविषयोगादय सर्वेषां मदात्मनो जगतोऽस्यार्थं जनम्। तत्रादौव च जीवस्य। नरात्मनश्च तद्गुणैर्मी योग अन्यात्मस्वात्मनोऽस्य। तदेवं इन्द्रियवश्ये तत्र वयतम् निजविषयज्ञानात् निग्रहम् च वैराग्यम्। अनिग्रहादेन्द्रियाणां यतो वशमधिकानि वा वा। इन्द्रियसमोध इन्द्रियते च जीवमैव वैव। तथा च तत्र प्रमाणतो "जीवस्य आत्मज्ञानं सदैव तदा" चक्रादिगोचरमात्मा नियतवानजलमां

च" सू० "शुचे सत्वशुद्धिस्ततः सौमनस्यं तत ऐकाग्र्यं तत इन्द्रियजयस्ततश्चात्मदर्शनयोग्यत्वम् बुद्धिसत्त्वस्य भवतीति" भा० एष च बाह्य उपायः। आभ्यन्तर उपायस्तत्रैवोक्तः। "ग्रहणस्वरूपास्मितान्वयार्थवत्त्वसंयमादिन्द्रियजय" पा० सू० 'सामान्यविशेषात्मा शब्दादिर्ग्राह्यः तेष्विन्द्रियाणां वृत्तिर्ग्रहणम् (१रूपम्) न च तत्सामान्यमात्रग्रहणाकारम् कथमनालोचितः स विषयविशेष इन्द्रियेण मनसानुव्यवसीयेतेति। स्वरूपं पुनः प्रकाशात्मनो बुद्धिसत्त्वस्य सामान्यविशेषयोरयुतसिद्धावयवभेदानुगतः समूहो द्रव्यमिन्द्रियम्। (२रूपम्) तेषां तृतीयं रूपम्। अस्मितालक्षणोऽहङ्कारः तस्य सामान्यस्येन्द्रियाणि विशेषाः। चतुर्थं रूपं व्यवसायात्मकाः प्रकाशक्रियास्थितिशीला गुणाः, येषामिन्द्रियाणि साहङ्काराणि परिणामः। पञ्चमं रूपं गुणेषु यदनुगतं पुरुषार्थवत्त्वमिति पञ्चस्वेतेषु इन्द्रियरूपेषु यथाक्रमं संयमः तत्र तत्र जयं कृत्वा पञ्चरूपजयादिन्द्रियजयः प्रादुर्भवति योगिनः" भाष्यम् तत्फलमपि तत्रोक्तम्। "ततो मनोजवित्वं विकरणभावः प्रधानजयश्च" पा० सू० "कायस्य मनोवदनुत्तमगतिलाभो मनोजवित्वम्। विदेहानाम् (देहानपेक्षाणाम्) इन्द्रियाणामभिप्रेतदेशकालविषयापेक्षो वृत्तिलाभः अतीतानागतदूरस्थसूक्ष्मार्थविषयश्च वृत्तिलाभो विकरणभावः। सर्वप्रकृतिविकारवशित्वं प्रधानभावः इत्येतास्तिस्रः सिद्धयो मधुप्रतीका उच्यन्ते एताश्च करणपञ्चरूपजयादधिगम्यन्ते" भा० एतासाञ्च सांख्यसिद्धीनां पारम्पर्य्येण सत्त्वपुरुषान्यताख्यातिरेव तु मुख्यं फलमिति तत्रैव प्रसिद्धम्।

इन्द्रियवध पु० इन्द्रियाणां वधः स्वस्वकार्य्येषु शक्तिविघातः। इन्द्रियाणां स्वस्वकार्य्यानुकूलशक्तिप्रतिघाते ते च एकादशधा यथाह सा० का० कौमुद्यां "एकादशेन्द्रियवधाः सह बुद्धिवधैरशक्तिरुद्दिष्टा" का० एकादशेन्द्रियवधाः स्वस्वकार्य्ये वैकल्यरूपाः तच्च "बाधिर्य्यमित्यादि कौ० वाक्यम् अशक्तिशब्दे ४७२ पृष्ठे उदाहृतम्

इन्द्रियबोधन त्रि० इन्द्रियं बोधयति स्वपानसाध्यवैकल्यस्य बुध+णिच्+ल्यु। स्वपानसाध्यवैकल्यमोचके मद्ये मद्यपाने हि इन्द्रियमात्रस्य स्वस्वकार्य्यव्यापारापाटवकरणात् आत्मवीर्य्याणि बोधयतीति तस्य तथात्वम्। "सर्वं पित्तकरं मद्यम्" इत्युपक्रम्य "पाके लघु विदाह्युष्णं तीक्ष्णमिन्द्रियबोधनम्"। "कषायमधुरं मद्यं सुगन्धीन्द्रियबोधनम्"। "वातघ्नो मधुरप्रायो हृद्य इन्द्रियबोधनः" सुश्रु०।

इन्द्रियवत् त्रि० इन्द्रियं अस्त्यस्य प्राशस्त्येन वाऽत्यस्य मतुप् मस्य वः। १प्रशस्तेन्द्रिये २प्रशस्तेन्द्रिये च स्त्रियां ङीप्। इन्द्रियेण तुल्यम् इन्द्रियस्येव इन्द्रिये इव वा वति। इन्द्रियतुल्ये अव्य० इन्द्रियं वीर्य्यमस्त्यस्य मतुप् मस्य वः वेदे पूर्वपदस्य नि० दीर्घः। वीर्य्यान्विते। "तेन पश्वना ऋषिरिन्द्रियावत्" शत०। "ऋषिश्च इन्द्रियवान् सुदन्ततमः" शत०। क्वचित् वेदे दीर्घोऽन। "सर्वं श्रुतमिन्द्रियवत्" यजु० १४,२,

इन्द्रियवृत्ति स्त्री ६त०। "शब्दादिषु पञ्चानामालोचनमात्रमिष्यते वृत्ति। वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानाम्" सांख्योक्ते श्रोत्रादीनां शब्दादिषु प्रकाशनार्थे १व्यापारे कर्मेन्द्रियाणां २वचनादानादिव्यापारे च। तत्र बुद्धीन्द्रियवृत्तिश्च इन्द्रियजन्या बुद्धेस्तत्तदाकारेण परिणामः सा च निर्विकल्पकस्थानीया इति सां० कौ० समर्थितं तच्च ८२६ पृ० आलोचनशब्दे दर्शितम् कर्मेन्द्रियवृत्तिश्च वचनादानादिरूपो व्यापारः। मनोरूपेन्द्रियवृत्तिस्तु सङ्कल्पविकल्पाध्यवसायरूपा मनोबुद्ध्योः परिणामभेदः।

इन्द्रियसम्प्रयोग पु० इन्द्रियाणां सम्प्रयोगः स्वस्वविषयेषु प्रयोगः व्यापारणम्। विषयैरिन्द्रियसम्बन्धे असत्ख्यातिशब्दे ५२२ पृष्ठे उदा०।

इन्द्रियसन्निकर्ष पु० इन्द्रियस्य स्वस्वविषयैः सह सन्निकर्षः सम्बन्धभेदः। प्रत्यक्षसाधने इन्द्रियस्य स्वस्वविषयैः सम्बन्धभेदरूपे प्रत्यक्षजनकव्यापारे। स च न्यायमते षोढा यथा "विषयेन्द्रियसम्बन्धो व्यापारः सोऽपि षड्विधः। द्रव्यग्रहस्तु संयोगात् संयुक्तसमवायतः द्रव्येषु समवेतानां, तथा तत्समवायतः तत्रापि समवेतानां, शब्दस्य समवायतः। तद्वृत्तीनां समवेतसमवायेन तु ग्रहः। विशेषणतया तद्वदभावानां ग्रहो भवेत्" भाषा०। तथा च द्रव्यस्य प्रत्यक्षे इन्द्रियसंयोगः कारणम् द्रव्यसमवेतगुणकर्मजातीनां प्रत्यक्षे इन्द्रियसंयुक्तसमवायः। द्रव्यसमवेतसमवेतानां गुणत्वकर्मत्वादीनां प्रत्यक्षे इन्द्रियसंयुक्तसमवेतसमवायः। शब्दस्य प्रत्यक्षे श्रोत्रसमवायः शब्दवृत्तिशब्दत्वादेः श्रोत्रसमवेतसमवायः कारणम्। "अभावप्रत्यक्षे समवायप्रत्यक्षे च इन्द्रियसंयुक्तस्वरूपसम्बन्धविशेषणता हेतुः। वैशेषिकमते तु समवायस्य न प्रत्यक्षम्। अत्र यद्यपि विशेषणता नानाविधा तथा हि भूतलादौ घटाभावः संयुक्तविशेषणतया गृह्यते सङ्ख्यादौ रूपाद्यभावः संयुक्तसमवेतविशेषणतया, संख्यात्वादौ रूपाद्यभावः संयुक्तसम-

[illegible]

इन्द्रिय[illegible] [illegible]

इन्द्रियायम् [illegible]

इन्द्रियादि [illegible]

इन्द्रियाधिष्ठान [illegible]

इन्द्रियायतन [illegible]

[illegible]

इन्द्रियाराम [illegible]

इन्द्रियार्थ [illegible]

इन्द्रियाविन् [illegible]

विभि वेदे पूर्व्वपददीर्घः । १चक्षुरिन्द्रिये २प्रत्यक्षेन्द्रिये च ।
'सएवाक्षिणीन्द्रिय इधा तन्द्रियाध्येव भवति" श्रुतिः ।

इन्द्रियेश पु० ६त० । १जीवे तदधिष्ठानेनैव तेषां प्रवृ-
त्तेस्तथात्वम् २इन्द्रियाधिष्ठातृदिगादिदेवादिषु च ।

इन्द्रेज्य पु० ६त० । वृहस्पतौ शक्रेज्येन्द्रपूज्यादयोऽप्यत्र

इन्द्रेश्वर पु० इन्द्रेण स्थापित ईश्वरः ईश्वरलिङ्गम् । महे-
न्द्रपर्वतस्थे वृत्रासुरवधजनितब्रह्महत्याविघाताय शक्रेण
स्थापिते शिवलिङ्गभेदे तत्कथा भा० वि० क्षालि० पुरा-
णम् । "इत्त कृत्वा ततः शक्रोमाहेन्द्रे स्थाप्य शङ्करम् ।
लिङ्गं विमुक्तः पापौघैस्तत्र स त्रिदिवं गतः । अद्यापी-
न्द्रेश्वरं दृष्ट्वा तथा रामेश्वरं प्रभुम् । मुच्यते ब्रह्महत्या-
या नरो वै नात्र संशय "।

इन्ध दीप्तौ रुधा० आ०अक० सेट् निष्ठायामनिट् । वर्त्त-
मानेचाऽतोनिष्ठा । इन्धे, इन्धाते,इन्धते, "य त्वा जनास
इन्धते ऋ०८,४,२ इन्धीत, इन्धाम् । इन्त स इन्धम् ।
ऐन्ध ऐन्धिष्ट इन्धाम्—बभूव । आस चक्रे इन्धिष्यते ऐन्धि-
ष्यत । इन्धितव्यम् । इन्धिता इन्धनम् । इद्धोगर्त्तते ।
क्विप् समित् इन्धान "अग्निमिन्धानो मनसा धियम् सचेत
मर्त्यः"ऋ० । भावे इध्यते ऐन्धि । "परो यदिध्यते दिवि
छा०उ०तु पदगणव्यत्यास ।

इन्ध पु०इन्ध+करणे–घञ् । १काष्ठे इन्ध–ण्वुच् । २दीप्तियुक्ते ।
३वच्चामके ऋषिभेदे पु० तत० गोत्रे नडा०फक् । ऐन्धा-
यनस्तत्कोलापत्ये पुंस्त्री । दीप्तियुक्ते दक्षिणनेत्रे विशेषेण
स्थिते ४परमात्मनि पु० । तस्य तदर्थत्वञ्च समर्थितम्
वृ०उ०भा० । "इन्धोह वै नामैष योऽयं दक्षिणेऽक्षन्
पुरुषस्तं वा एतमिन्धं सन्तमिन्द्र इत्याचक्षते परोक्षेणैव,
परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विष "।"इन्धोह वै नाम
इन्ध इत्येव नामाय 'चक्षुर्वै ब्रह्मोति" आदि-
त्यान्तर्गतः पुरुष एष ,योऽयं दक्षिणेऽक्षन् अक्षिणि विशे-
षेण व्यवस्थितः । स च सत्यनामा त वा एतं पुरुषं
दीप्तिगुणत्वात् प्रत्यक्षं नामास्य इन्ध इति तमिन्धं
सन्तमिन्द्र इत्याचक्षते परोक्षेण, यस्मात् परोक्षप्रिया
इव हि देवाः प्रत्यक्षद्विषः प्रत्यक्षनामग्रहण द्विषन्ति"भा०
"इन्धयति दीपयति इन्ध–णिच् अच् । ५दीपके त्रि०।
एतयास् पूर्वस्थयो । आग्रहाग्नेया समासे मुम् । अग्-
ग्नीमिन्ध अग्निमिन्ध । "होताध्वर्युरावया अग्निमिन्धो
पावग्राम" यजु० २५,२८, अग्निमिन्धश्च अग्नीत्
नाम ऋत्विक् ।

इन्धन न० इध्यतेऽनेन इन्ध+करणे–ल्युट । १काष्ठे "इन्धनौघ
दगप्यग्निस्त्विषा नात्येति पूषणम्" माघ । 'कामिनीष
विवाहेषु गवां भक्ष्ये तथेन्धने" मनुः । इन्धने इन्धना-
धिकारे इत्यर्थे "इन्धनार्थमशुष्काणाम्"प्रा०वि०स्मृति ।
इन्धयति इन्ध–णिच्–ल्यु । २दीपनकर्त्तरि त्रि०। भावे
ल्युट् । ३प्रज्वालने न० ।

इन्धन्वन् त्रि० इन्धन+मत्वर्थीय । मदे वनिप् नि० यलो-
लोप । इन्धनयुक्ते । "इन्धन्वभिर्धेनुभीरप्सदूधभिः" ऋ०
२,३४,५, "इन्धन्वभिः समिन्धनयद्भिः" भा०।

इन्व गतौ भ्वा० निरु०। इनधातौ ८२८ पृष्ठे विवृति ।

इन्वका स्त्री इन्वति इन्व–अच् व इव कायति कै–क । मृग-
शिरोमध्योपरिस्थे इल्वलाख्यताराम् अमरटीका ।

इभ पु० इण्–भ किच्च । १हस्तिनि, "वन्येभदामायितगन्ध-
दुर्द्धराः माघ २तत्सङ्ख्यातुल्यसङ्ख्याके अष्टसङ्ख्यान्विते
च । गजाहि अष्टसु दिक्षु स्थिता ऐरावतादयोऽष्टौ
वर्त्तन्ते इति तेषामष्टत्वम् । ते च "ऐरावतः पुण्डरीको
वामनः कुमुदोऽञ्जनः । पुष्पदन्तः सार्व्वभौमः सुप्रतीकश्च
दिग्गजाः " अमरोक्तक्रमेण पूर्व्वादीशानान्तदिक्षु स्थिताः ।
अस्य च उत्तरपदस्थत्वे श्रेष्ठार्थद्योतकता व्याघ्रादेराकृति
गणत्वात् उपमितसमासः । स्त्रियां ङीप् । जातित्वात्
पोटागर्भेन समासेऽस्य पूर्वनिपातः पुवद्भावश्च इभपोटा

इभलक्षणविभागादि वृह०स० "मध्वाभदन्ताः सुविभ-
क्तदेहा न चोपदिग्धाश्च कृशाः क्षमाश्च । गात्रैः समैश्चाप-
समानवंशा वराहतुल्यैर्जघनैश्च भद्राः ॥ वक्षोऽथ कक्षावलय
श्लथाश्च लम्बोदरस्त्वग्बृहती गलश्च । स्थूला च कुक्षि
सह पेचकेन सैंही च दृग्मन्दमतङ्गजस्य ॥ मृगास्तु
ह्रस्वाधरवालमेढ्रास्तन्वङ्घ्रिकण्ठद्विजहस्तकर्णाः । स्थूलेक्ष-
णाश्चेति यथोक्तचिह्नैः सङ्कीर्णनागा व्यतिमिश्र
चिह्नाः ॥ पञ्चोन्नतिः सप्त मृगस्य दैर्घ्यमष्टौ च हस्ताः
परिणाहमानम् । एकद्विवृद्धावथ मन्दभद्रौ सङ्कीर्णनागो
ऽनियतप्रमाणः ॥ भद्रस्य वर्णो हरितो मदश्च मन्दस्य
हारिद्रकसन्निकाशः । कृष्णो मदश्चाभिहितो मृगस्य
सङ्कीर्णनागस्य मदो विमिश्रः ॥ ताम्रौष्ठतालुव-
दनाः कलविङ्कनेत्राः स्निग्धोन्नताग्रदशनाः पृथुलाय-
तास्याः । चापोन्नतायतनिगूढनिमग्नवंशास्तन्वेकरोमचित-
कूर्मसमानकुम्भाः । विस्तीर्णकर्णहनुनाभिललाटगुह्याः
कूर्मोन्नतैर्द्विनवविंशतिभिर्नखैश्च । रेखात्रयोपचितवृत्तकराः
सुवालाः धन्याः सुगन्धिमदपुष्करमारुताश्च । दीर्घाङ्गु-

अधर्म्मे—स्वार्थिकप्रवृत्तिमति "अधर्माच्चेति वक्तव्यमिति" ठकि तु आधर्म्मिक इत्यप्यत्र त्रि० ।

अधि अव्य० न+धा—कि । अधिकारे, ऐश्वर्य्ये, स्वत्वे, अधिकृत्येत्यर्थे, उपरि, आधिक्ये, अतिशये च । अस्य ऐश्वर्य्ये, स्वत्वे च कर्म्मप्रवचनीयत्वेन तद्योगे सप्तमी, अधि रामे भूः, अधि भुवि राम इति । "अधि अध्ययनैश्वर्य्यवशित्वस्मरणाधिक्येषु" इति गणरत्ने उक्तम् तत्रोपाध्यायादधीते इत्यादावध्ययने, इङोऽध्ययनार्थकत्वस्य अधिर्द्योतकः । ऐश्वर्य्ये अधिपतिः, वशित्वे अधीनः, अधिगतमिमम् अत्या०स० । स्मरणे मातुरध्येति इक स्मरणार्थत्वमधिर्द्योतयति । अधिके, अधिकमिति अधि+कन् । "अधिपरी अनर्थकाविति" पा० उक्तेः आनर्थक्ये गतित्वाभावात् नोपसर्गत्वं तेन अध्यागच्छति इत्यादौ गतिश्चेत्यभावात् "गतिर्गताविति" पा० निघातो न । अतएव अस्य धात्वर्थमात्रद्योतकत्वेऽपि विशिष्टक्रियाद्योतकत्वाभावात् अनर्थकत्वव्यवहारः विशिष्टक्रियायोगाभावाच्च नोपसर्गत्वम् तेन "तस्मिन्नाखण्डलतुर्भागे प्राङ्नाकमधितस्थुषीति" इत्यत्र न षत्वम् सति च क्रियाविशेषद्योतकत्वे अधिष्ठातेत्यादाविव उपसर्गत्वेन षत्वमिति भेदः । मुग्धबोधे तु "नात्वाश्चर्य्यो स्वतो नातिक्रमेऽति पर्य्यधी गताविति" गत्यर्थद्योतकत्वे नोपसर्गत्वमित्युक्तम् तेन नाकमधितस्थुषीत्यस्य गत्यर्थकतयोपसर्गत्वाभावान्न षत्वमिति विवेकः । तथा अधिके, "इतो वा सातिमीमहे दिवो वा पार्थिवादधि" इति ऋ० १,६,१० "अधीमहे आधिक्येन याचामहे" इति भाष्यम् । उपरि "ये नाकस्याधि रोचने दिवीति" ऋ० १,१९,६, "नाकस्य दुःखरहितस्य सूर्य्यस्य उपरीति" भाष्यम्, अधिकारे "यदत्र मामधिकरिष्यतीति" सि० कौ० । विभाषा कृञीति पा० । वा गतित्वमत्र विनियोक्तुरीश्वरस्य गम्यते अधिकारो विनियोग । आधिक्ये "अधिगत्य जगत्यधीश्वरादिति" नैष० अधिगत्येत्यादौ गमेर्विशिष्टज्ञानार्थस्य द्योतकत्वात् उपसर्गत्वम् "धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्त्तते, तमेव विशिनष्ट्यन्य उपसर्गगतिस्त्रिधे"त्युक्ते विशिष्टज्ञानार्थता, तेन गतिसमासे ल्यप् । "अधिगत विधिवद्यद्-पालयदित्यादौ" दायत्वेन स्वत्वमित्यर्थः । एवमन्यत्रापि विशेषार्थद्योतकता विज्ञेया । आधीयते दुःखमनेनेति आ+धा—कि वा पृ० ह्रस्वः । मन पीडायाम् पु० ।

अधिक त्रि० अध्यारूढ एव स्वार्थे कन् उत्तरपदलोपश्च । प्रधाने अतिरिक्ते, "क्रम न ससेष्वधिको बबाधे" इति रघुः । आधिक्यञ्च योग्यपरिमाणातिक्रम अतिशयश्चद्विविध । तत्रानुरूपातिक्रमे "अकालप्रसवा नार्य्य इत्युपक्रमे "हीनाङ्गीरधिकाङ्गीश्च जायन्ते यदि वा त्रय" इत्यरिष्टप्रकरणे उदाहार्य्यम् । "हीनाङ्गमधिकाङ्गञ्च श्राद्धभोज्ये विवर्ज्जयेदिति" स्मृति । "इयमधिकमनोज्ञा वल्कलेनापि तन्वीति" शकु० । "अधिकं फलमश्नुते" इति पुरा० । असाधारणे च । "ब्राह्मणस्याधिकं लब्धं, क्षत्रियस्य विजितं, निर्विष्टं वैश्यशूद्रयोरिति" गौतमः "ब्राह्मणस्याधिकं लब्धमिति ब्राह्मणस्य प्रतिग्रहादिना यल्लब्धं तदधिकमसाधारणम् । क्षत्रियस्य विजितमित्यत्राधिकमित्यनुवर्त्तते क्षत्रियस्य विजयदण्डादिलब्धमसाधारणम् । "निर्विष्टं वैश्यशूद्रयोरिति" । अत्राप्यधिकमित्यनुवर्त्तते वैश्यस्य कृषिगोरक्षादिलब्धं निर्विष्टं तदसाधारणं, शूद्रस्य द्विजशुश्रूषादिना भृतिरूपेण यल्लब्धं तदसाधारणम् । एवमनुलोमजानां प्रतिलोमजानाञ्च लोकप्रसिद्धेषु स्वस्ववृत्तेषु यद्यदसाधारणमुक्तं सूतानामश्वसारथ्यमित्यादि तत्तत् सर्वं निर्विष्टशब्देनोच्यते सर्वस्यापि भृतिरूपत्वात् "निर्वेशो भृतिभोगयोरिति" त्रिकाण्डीस्मरणात् । तत्तदसाधारणं वेदितव्यम्" इति मिताक्षरा । दर्पणोक्ते अर्थालङ्कारभेदे यथा दर्पणे "आश्रयाश्रयिणोरेकस्याधिक्येऽधिकमुच्यते" । "किमधिकमस्य ब्रूमो महिमानं वारिधेर्हरिर्यत्र । अज्ञात एव शेते कुक्षौ निक्षिप्य भुवनानि" इत्यत्राश्रयस्य । "युगान्तकालप्रतिसंहृतात्मनो जगन्ति यस्यां सविकाशमासत । तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसम्भवा मुदः" इति माघे तु आश्रिताधिक्यम् । भावार्थे ष्यञ्—आधिक्यम् । उचितप्रमाणातिरेके न० । [अत्यन्तोत्कृष्टे च ।

अधिकतर त्रि० अधिक+तरप् । द्वयोर्मध्ये उत्कृष्टे एकस्मिन्,

अधिकतम त्रि० अधिक+तमप् । बहूनां मध्ये एकस्मिन् उत्कृष्टे, अत्यन्तोत्कृष्टे च ।

अधिकमास पु० कर्म्म० । मलमासे तद्विवरणमधिमासशब्दे ।

अधिकरण न० अधि+कृ—ल्युट् । आधारे, व्याकरणशास्त्रे "कर्त्तृकर्म्मव्यवहितामसाक्षाद्धारयत् क्रियाम् । उपकुर्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतमिति" हरिपरिभाषिते अधिकरणसंज्ञके कर्त्तृकर्म्मद्वारा क्रियाश्रये कारके, यथा गेहे स्थाल्यामन्नं पचतीत्यादौ गृहस्य कर्त्तृद्वारा, स्थाल्याश्च कर्म्मद्वारा, परम्परया पाकक्रियाश्रयत्वात्, गृहादेः । "आधारोऽधिकरणमिति" "सप्तम्यधिकरणे इति" पा० ।

[illegible]

अधिकरणिक पु० अधिकरणम् धर्म्माधिकरणम् आश्रयतयाऽस्त्यस्य ठन् । विचारकरणाय धर्म्माधिकरणमण्डपे नियुक्ते प्राड्विवाकादौ । तत्र नियुक्त ठञ् । आधिकरणिकोऽप्यत्र पु० ।

अधिकर्म्म(न्) अव्य० कर्म्मणि विभक्त्यर्थेऽव्ययी० वा अच्समा० । कर्म्माधिकृत्येत्यर्थे । अधिकं कर्म्म प्रा०स० । अधिककर्म्मणि । न०व० । अधिककर्म्मयुक्ते त्रि० ।

अधिकर्म्मकर त्रि० अधिकं कर्म्म तत्करोति कृ—आनुलोम्यादौ ट । शुश्रूषकभेदे दासभेदे । क्विप् अधिकर्म्मकृदप्यत्र त्रि० ।

अधिकर्म्मकृत त्रि० अधिकं कर्म अधिकर्म तत् कृत येन निष्ठान्तस्य परनि० । "सर्वेष्वधिकृतो यः स्यात् कुटुम्बस्य तथोपरि । सोऽधिकर्म्मकृतो ज्ञेय" इति स्मृत्युक्ते शुश्रूषकभेदे ।

अधिकर्म्मिक पु० अधिकृत्य हट्टं कर्म्मणेऽस्त्यस्य अधिकर्म–ठन् । हट्टाध्यक्षे, हट्टस्थवणिग्भ्यः शुल्कादानकर्म्मणि नियुक्ते ।

अधिकाङ्ग न० अधिकोऽङ्गात् । वर्मधरैर्योधैर्हृदयमध्ये वर्मदार्ढ्यार्थं बद्धपट्टिकादौ । ब० । अधिकाङ्गवति त्रि० । "अजाविघातने चैव अधिकाङ्ग प्रजायते" इति शाता० ।

अधिकार पु० अधि+कृ–घञ् । आरम्भे, यथेष्ट क्रयविक्रयादिकर्त्तृत्वसम्पादके स्वामित्वे, "अधिकारः फले स्वाम्यमधिकारी प्रभुर्भवेदिति" मीमांसोक्ते विहितकर्म्मफलस्वामित्वे, विनियोज्यपुरुषस्य सम्बन्धे, यथा याजनादिकर्मणि ब्राह्मणादेः, राज्ञः प्रजापालनादौ, वैश्यस्य कृष्यादौ, शूद्रस्य द्विजसेवायाम्, "नैमित्तिकोऽयं प्रायश्चित्ताधिकार" इति मिताक्षरा । स्वामित्वे–"सर्व्वे स्युरधिकारिण" इति स्मृतिः । तत्र च वैदिकादिकर्म्मसु कर्त्तव्यताज्ञानाधीनप्रवृत्तिहेतुरधिकारः । यथा याजनादौ ब्राह्मणस्येत्यादि । शूद्रस्य नाध्ययनादिष्वधिकारः यथोक्तं "निषेकादिश्मशानान्तो यस्य वेदोदितो विधिः । तस्य शास्त्रेऽधिकारोऽस्मिन्नान्यस्यैव कदाचनेति" मनुना । न केवलम् अध्ययने शूद्राणामधिकारः यागादावप्यनधिकारः यथोक्तं जैमिनीयसूत्रभाष्यादौ । "चातुर्वर्ण्यमविशेषात्" इत्यायद्य "निर्द्देशाद्वा त्रयाणां स्यादग्न्याधेये ह्यसम्बन्धः क्रतुषु ब्राह्मणश्रुतिरित्यात्रेय" इति । 'वा'शब्दः पक्षं व्यावर्त्तयति, "त्रयाणाम्" अधिकारः स्यात् कुतः ? अग्न्याधेये निर्द्देशात् अग्न्याधेये त्रयाणां निर्द्देशो भवति, "वसन्ते ब्राह्मणोऽग्निमादधीत, ग्रीष्मे राजन्यः, शरदि वैश्य" इति शूद्रस्य आधाने श्रुतिर्नास्ति इत्यनग्निः शूद्रः असमर्थोऽग्निहोत्रादि निर्वर्त्तयितुम् । तस्मात् "अग्निहोत्रं जुहुयात् स्वर्गकाम" इत्येवमादिः शूद्रस्य प्रापिका श्रुतिर्नास्ति । ब्राह्मणादीन् एवाधिकृत्य सा प्रवर्त्तते, ते हि समर्था अग्निमत्त्वात्, आहवनीयादयो न शूद्रस्य, अविधानात्, संस्कारशब्दत्वाच्च आहवनीयादीनाम् । तस्मात् अनधिकृतोऽग्निहोत्रादिषु शूद्र इत्यात्रेय मन्यते स्म" इति भा० । तथा कर्म्मप्रतिपादकसर्व्वशास्त्रविहितकर्म्मसु मनुष्याणामेवाधिकारः न तिरश्चां न वा देवादीनां यथोक्तं तत्रैव "फलार्थत्वात् कर्मणः शास्त्रं सर्वाधिकारं स्यात्" इत्याद्य "कर्त्तुर्वा श्रुतिसंयोगाद्विधिः कार्त्स्न्येन गम्यते" इति सू० "वा"शब्दः पक्षं व्यावर्त्तयति । न चैतदस्ति तिर्य्यगादीनामपि अधिकार इति । कस्य तर्हि ? । यः समर्थः कृत्स्नं कर्म अभिनिर्वर्त्तयितुम् । न चैते, शक्नुवन्ति तिर्य्यगादयः कृत्स्नं कर्म्माभिनिर्वर्त्तयितुम्, तस्मात् एषां न सुखस्याभ्युपायः कर्म, कथं यो न शक्यते कर्त्तुम्, सोऽभ्युपायः स्यात् ? इति । न देवानां, देवतान्तराभावात् न हि आत्मानम् उद्दिश्य त्यागः सम्भवति, त्याग एवासौ न स्यात्, न ऋषीणाम्, आर्षेयाभावात् न भृग्वादयो भृग्वादिभिः सगोत्रा भवन्ति, न चैषां सामर्थ्यं प्रत्यक्षम् । "अपि च तिर्य्यञ्चो न कालान्तरफलेन अर्थिनः, आसन्नं हि कामयन्ते । "ननु च उक्तं, कालान्तरफलार्थिनः तिरश्चः पश्यामः, शुनः श्येनायतद्दंष्ट्राम् अष्टमप्यां च उपवसत" इति उच्यते न जन्मान्तरफलार्थिन उपवसन्ति । 'कथं अवगम्यते ? वेदाध्ययनाभावात्, ये वेदमधीयते ते एतद्विदुः, "इदं कर्म कृत्वा, इदं फलमत्र प्राप्नोति इति" न चैते वेदमधीयते, नापि स्मृतिशास्त्राणि, नाप्यन्येभ्यः अवगच्छन्ति, तस्मात् न विदन्ति धर्मम् । अविद्वांसः कथम् अनुतिष्ठेयुः, तस्मात् न धर्म्माय उपवसन्ति इति । किमर्थं तर्ह्येषाम् उपवासः ? । उच्यते, रोगात् अरुचिरेषाम् । कथं पुनर्नियते काले रोगो भवति ? । उच्यते नियतकाला अपि रोगा भवन्ति यथा तृतीयकचातुर्थकावेति । तस्मात् मनुष्याणाम् अधिकार इति । न च तिरश्चां द्रव्यपरिग्रहः, न हि एते द्रव्यं स्वेच्छया उपयुञ्जाना दृश्यन्ते, तस्मात् अनीशाना धर्मस्य । यत्तु, देवग्रामो हस्तिग्राम इति, उपचारमात्रं तत् । तस्मात् अपि न तिरश्चाम् अधिकार इति । यानि पुनर्लिङ्गानि, "देवा वै सत्रमासत" इत्येवमादीनि, अर्थवादास्ते विधिप्ररोचनार्थाः । विद्यते हि विधिरन्यः तेषु सर्वेषु,

न च [illegible] [illegible] कर्मणामविशेषात् । [illegible] [illegible] [illegible] । [illegible] "[illegible] शाद्दरायणः [illegible]" इति [illegible] [illegible] "शाद्दरायणः" [illegible] [illegible] [illegible] [illegible] बादरायण आचार्यो [illegible] [illegible] ? [illegible] । [illegible] [illegible] । [illegible] [illegible] । [illegible] [illegible] । [illegible] [illegible] । [illegible] [illegible] । "[illegible]" "[illegible]" [illegible] । [illegible] । [illegible] । [illegible] ? इति" । [illegible] [illegible] । [illegible] [illegible] । [illegible] "[illegible]" [illegible] । "[illegible]" इति" [illegible] । "[illegible]" [illegible] । "[illegible]" इति [illegible] । [illegible] [illegible] । [illegible]" इति [illegible] ।

[illegible] पूर्व [illegible] । यथा "[illegible] इति [illegible] । न [illegible] "[illegible]" [illegible] अधिकारस्थिता [illegible]" [illegible] । [illegible] "[illegible]" [illegible] । [illegible] "[illegible]" इति [illegible] [illegible]" [illegible] । [illegible]

अधिकारविधि पु॰ अधिकारे [illegible] विधिर्विधानम् । [illegible] । [illegible] । [illegible] "[illegible]" [illegible] [illegible] [illegible] ।

अधिकारिता स्त्री॰ अधिकारिणो भावः तल् । [illegible] अधिकारे "[illegible]" [illegible] । [illegible] । अधिकारित्वम् [illegible] ।

अधिकारिन् त्रि॰ अधिकरोति [illegible] । [illegible] । [illegible] "अधिकारी [illegible]" [illegible] । [illegible] "[illegible]" इति "[illegible]" इति [illegible] । [illegible]

सने "ये मन्त्रास्ते तु सज्जन्ते मह्मणोरूपकल्पने" इत्युक्तं । अतएवोक्तम् "प्रशान्तचित्ताय जितेन्द्रियाय प्रक्षीणदोषाय यथोक्तकारिणे—प्रदेयमेतत् सततं मुमुक्षवे इति । अत्र यथोक्तकारिणे इत्यनेन प्राक् ज्ञानोत्पत्ते वर्णाश्रमविहित कर्मानुष्ठेयमेवेत्युक्तं शा० सूत्रकृताऽपि "विहितत्वादाश्रम कर्मापि" इत्युक्तम् गीतायामपि "आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते । योगारूढस्य तस्यैव शमः कारणमुच्यते" इत्यनेन आरुरुक्षो यथोक्तकर्माधिकार उक्तः "कषाये कर्मभिः पक्वे ततो ज्ञानं प्रजायते" इत्यनेन कषायशब्द वाच्यचित्तदोषक्षयार्थं कर्मावश्यकतेत्युक्तम् । "द्वे ब्रह्मणी वेदितव्ये परञ्चापरमेव चेति" श्रुतावप्यधिकारिभेदात् निराकारसोपाधिकयोः द्वयोर्ब्रह्मणोर्वेद्यतोक्ता । गीतायामपि "लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मया नघ ! ज्ञानयोगेन साङ्ख्यानां, कर्मयोगेन योगिनामिति" अधिकारिभेदात् ज्ञानकर्मणोरधिकार इत्युक्तम् । "समग्रं ससाधनं कर्म कर्त्तव्यमधिकारिणा । निष्कामेण सदा पार्थ । काम्यञ्च कामान्वितेन चेति" भवि०पु० । "अधिकारिण्याऽर्थिना विदुषा समर्थेनेति" रघु० तेन विदुषः तत्तत्कर्मजन्यफलार्थित्वम् तत्तत्कर्म करणयोग्यत्वम् अपर्युदस्तत्वञ्च अधिकारिताप्रयोजकम् । तत्र फलार्थित्वञ्च सति कामे एव, मुमुक्षुत्वे तु न फलार्थित्वावश्यकतेति भेदः । मार्कण्डेयपुराणे रुचिवाक्येन "पितृभ्यश्च दिवि ये च मूर्त्ता स्वधाभुजः काम्यफलाभिसन्धौ । प्रदानशक्ताः सकलेप्सितानां विमुक्तिदा येऽनभिसंहितेष्विति" अनेन फलार्थिनं प्रति तत्तत्फलदातृत्वं, तदनर्थिनं मुमुक्षुं प्रति मुक्तिदातृत्वमिति सप्रपञ्चम् एवं देवतानामप्यधिकारिभेदेन फलदातृत्वम् । अनभिसंहितेषु अनुद्दिष्टेषु फलेष्वित्यर्थः । अधिकारोऽस्त्यस्य इनि । स्वामित्ववति "सर्वे स्युरधिकारिणः" इति स्मृतिः स्त्रियां ङीप् । "ततोऽत्र देवी वचनाधिकारिणीति" नैष० ।

अधिकार्थवचन न० अधिकार्थस्य स्तुतिनिन्दाभ्यामारोपितस्य वस्तुधर्मादतिरिक्तस्य गुणस्य वचनम् । स्तुत्यर्थवादे, निन्दार्थवादे च । यथा वातच्छेद्यं तृणमित्यत्र दुर्बलत्वेन निन्दा, काकपेया नदीत्यत्र च पूर्णजलत्वेन स्तुतिर्गम्यते "कृत्यैरधिकार्थवचने" इति पा० ।

अधिकाम पु० अधिकः कामः । अत्यन्ताभिलाषे । स० । तद्वति त्रि० । कामे विभक्त्यर्थे अव्य० । काममधिकृत्येत्यर्थे अव्य० ।

अधिकृच्छ्र पु० अधिकं कृच्छ्रं कष्टं साधनतयाऽस्त्यस्य अच् । "विस्तरेणानुपूर्व्यापि कथितश्च यथा शुभे । मासेन लोकेऽधिकृच्छ्रः कथ्यते द्विजसत्तमैः" इति (गरुडपु०) उक्ते मास-साध्ये व्रतभेदे । प्रा० स० । अधिककष्टे न० । तद्वति त्रि० ।

अधिकृत पु० अधि+कृ—क्त । आयव्ययाद्यवेक्षणे अध्यक्षे कर्म्मजन्यफलसम्बन्धिनि नियुक्ते, स्वामित्ववति च त्रि० । "महीपतीनां पृथगर्हणार्थं समादिदेशाधिकृतानधिश्रीरिति" रघु ।

अधिकृति स्त्री अधि+कृ—क्तिन् । अधिकारे । [आरोहणे ।

अधिक्रम पु० अधि+क्रम—भावे घञ् अमन्तत्वान्न वृद्धिः ।

अधिक्षित् त्रि० अधि+क्षि—भावे कर्त्तरि वा क्विप्-तुक् च । प्रभवे, तत्कारिणि च । "विशामासामभयानामधिक्षितम्" ऋ० १०।९२।२४ ।

अधिक्षिप्त त्रि० अधि+क्षिप—क्त । स्थापिते, निन्दिते कृताधिक्षेपे, प्रेरिते, तिरस्कृते च ।

अधिक्षेप पु० अधि+क्षिप—भावे घञ् । तिरस्कारे, स्थापने प्रेरणे च ।

अधिगत त्रि० अधि+गम कर्मणि-क्त । प्राप्ते, ज्ञाते च । "अधिगतं विधिवत् यदपालयदिति" रघु "अधिगतसकलकलाकलापकमिति" का० । अधिगताखिलवेदार्थ", इति वे० सा० ।

अधिगम पु० अधि+गम—घञ् । ज्ञाने, प्राप्तौ, स्वीकारे च । "अध्यात्मयोगाधिगमेनेति" गीता । निष्पादे प्राप्तौ च । "स्वामी सत्पृथक्क्रयसविभागपरिग्रहाधिगमेष्विति" गौत० । "अधिगमो निष्पादे प्राप्तिरिति" मिता० ।

अधिगव अव्य० गवि विभक्त्यर्थे अव्ययी० वेदे अच् समा० । गवीत्यर्थे "स्वादीयो यदधिगव क्षीरमिति" वेद० ।

अधिगुण पु० अधिको गुणः प्रा० स० । अतिशयितत्वप्रयोजक-गुणे । स० । तद्वति त्रि० । "याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा" इति मेघ० । गुणे—विभक्त्यर्थे अव्ययी० । गुणमधिकृत्येत्यर्थे अव्य० । अधिगतो गुणो येन । ज्याधिरूढे धनुषि न० ।

अधिजिह्व पु० अधिका जिह्वा यस्य । द्विजिह्वे सर्पे तस्य द्विजिह्वत्वञ्च अमृतास्वादाशया कुशविलेहनात् । यथोक्तं भा०आ०प० । "यत्रैतदमृतञ्चापि स्थापितं कुशसंस्तरे । तद्विज्ञाय हृतं सर्पाः प्रतिमायाकृतञ्च तत् । सोमस्थानमिदञ्चेति दर्भांस्ते लिलिहुस्तदा । ततो द्विधा कृता जिह्वा सर्पाणां तेन कर्मणा । अभवंश्चामृतस्पर्शाद्दर्भास्तेऽथ पवित्रिणः । एवं तदमृतं तेन हृतमाहृतमेव च । द्विजिह्वाश्च कृताः सर्पा गरुडेन महात्मना" इति ।

अधिविक्रिया स्त्री विक्रेय वस्तुनि क्रयार्थं धनम् अधिकृता विक्रिया वा । (आइदिया) अधिक्रियायाम् ।

अधिश्रय न० अध्याश्रया अधि यत्र वा न० अधिकं श्रयणं वा न० । आरोपितगुणके अर्थे "तमि भाति अवयवे" इति च ।

अधिज्योतिष अव्य० ज्योतिषि इत्यर्थे अव्ययी० अव्य० । सर्वतारज्योतिषोऽधिकरणेऽर्थे ।

अधित्यका स्त्री अधि+त्यकन् । पर्वतस्योर्ध्वभूमौ । "उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका" इति अमरः । अद्रेरूर्ध्वभूमिरधित्यका इति कृत्वा । "अधित्यकायामिव धातुमय्याम्" रघुः ।

अधिदन्त पु० अध्यारूढो दन्तम् अत्या० स० । दन्तोपरि जातदन्ते (गजदाँत) । शब्द० । अव्य० । दन्ते विभक्त्यर्थे अव्ययी० । दन्तसमीपार्थे अव्य० ।

अधिदेव पु० अधिकोदेवः इष्टदेवतादिः प्रा० स० । कुलदेवतादिके इष्टदेवे । देवे विभक्त्यर्थे अव्ययी० । देवसमीपार्थे अव्य० । अधिदेवं मनः तत्र । अध्यात्ममधिदैवतम् । आधिदैविक दैवेभ्यो जाते दुःखादौ त्रि० ।

अधिदेवता स्त्री अधिष्ठात्री देवता प्रा० स० । अधिष्ठात्री देवतायाम् । देवतायाम् अधिकृत्य अधिष्ठान भावेन वर्त्तमानानां प्रत्यक्षतेन विभक्तुमशक्यम् । यच्च जगत् परमेश्वरस्य शरीरम् इ च अन्तर्यामि ब्राह्मणे । "यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो, यं पृथिवी न वेद, यस्य पृथिवी शरीरं, यः पृथिवीमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । योऽप्सु तिष्ठन्नद्भ्योऽन्तरो यमापो न विदुर्यस्यापः शरीरं, योऽपोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । योऽग्नौ तिष्ठन्नग्नेरन्तरो यमग्निर्न वेद, यस्याग्निः शरीरं, योऽग्निमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । योऽन्तरिक्षे तिष्ठन्नन्तरिक्षादन्तरो यमन्तरिक्षं न वेद यस्यान्तरिक्षं शरीरं योऽन्तरिक्षमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यो वायौ तिष्ठन् वायोरन्तरो यं वायुर्न वेद, यस्य वायुः शरीरं, यो वायुमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यो दिवि तिष्ठन्दिवोऽन्तरो यं द्यौर्न वेद, यस्य द्यौः शरीरं यो दिवमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । य आदित्ये तिष्ठन्नादित्यादन्तरो, यमादित्यो न वेद, यस्यादित्यः शरीरं य आदित्यमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यो दिक्षु तिष्ठन् दिग्भ्योऽन्तरो यं दिशो न विदुर्यस्य दिशः शरीरं, यो दिशोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यश्चन्द्रतारके तिष्ठंश्चन्द्रतारकादन्तरो यं चन्द्रतारकं न वेद, यस्य चन्द्रतारकं शरीरं यश्चन्द्रतारकमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । य आकाशे तिष्ठन्नाकाशादन्तरो यमाकाशो न वेद यस्याकाशः शरीरं, य आकाशमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यस्तमसि तिष्ठंस्तमसोऽन्तरो यं तमो न वेद, यस्य तमः शरीरं यस्तमोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यस्तेजसि तिष्ठंस्तेजसोऽन्तरो यं तेजो न वेद, यस्य तेजः शरीरं, यस्तेजोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृत इत्यधिदैवतम् । अथाधिभूतम् । यः सर्वेषु भूतेषु तिष्ठन् सर्वेभ्यो भूतेभ्योऽन्तरो यं सर्वाणि भूतानि न विदुर्यस्य सर्वाणि भूतानि शरीरं, यः सर्वाणि भूतान्यन्तरो यमयत्येष त आत्मान्तर्याम्यमृत इत्यधिभूतम् । अथाध्यात्मम् । यः प्राणे तिष्ठन् प्राणादन्तरो यं प्राणो न वेद, यस्य प्राणः शरीरं यः प्राणमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यो वाचि तिष्ठन् वाचोऽन्तरो यं वाङ् न वेद, यस्य वाक् शरीरं यो वाचमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यश्चक्षुषि तिष्ठंश्चक्षुषोऽन्तरो यं चक्षुर्न वेद, यस्य चक्षुः शरीरं, यश्चक्षुरन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यः श्रोत्रे तिष्ठञ्छ्रोत्रादन्तरो यं श्रोत्रं न वेद, यस्य श्रोत्रं शरीरं यः श्रोत्रमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यो मनसि तिष्ठन्मनसोऽन्तरो यं मनो न वेद, यस्य मनः शरीरं यो मनोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यस्त्वचि तिष्ठंस्त्वचोऽन्तरो यं त्वङ् न वेद, यस्य त्वक् शरीरं यस्त्वचमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यो विज्ञाने तिष्ठन् विज्ञानादन्तरो, यं विज्ञानं न वेद, यस्य विज्ञानं शरीरं यो विज्ञानमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यो रेतसि तिष्ठन् रेतसोऽन्तरो, यं रेतो न वेद, यस्य रेतः शरीरं यो रेतोऽन्तरो यमयत्येष त आत्मान्तर्याम्यदृष्टो द्रष्टाऽश्रुतः श्रोताऽमतो मन्ताऽविज्ञातो विज्ञाता नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोता, नान्योऽतोऽस्ति मन्ता, नान्योऽतोऽस्ति विज्ञातैष त आत्मान्तर्याम्यमृतोऽतोऽन्यदार्तम्" इति । अस्योक्तं विशेषणविधानं दिगादिविभागाभिदेवतादिभूतादि-वर्णं यथा अध्यात्मस्वरूपात् न भेदादिति इत्य । "दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाः" इति सार । अधिष्ठातृदेवताविषयमदैवतादिकमुक्तम् वाक्यादारभ्य अह

त्वपञ्चदेवानाञ्च वैकारिकत्वमिति' राघवभट्टेन व्याख्यातम्। "वैकारिका दिगाद्याश्च चन्द्रैकादश स्मृता। इन्द्रियाणामधिष्ठातृदेवास्ते परिकीर्त्तिता" इति तद्धृताभियुक्तोक्तिः। तथा च श्रोत्रस्य दिक्, त्वचो वात, नेत्रस्य अर्क, रसनाया वरुण, घ्राणस्य अश्विनौ, वागिन्द्रियस्य वह्नि, हस्तस्य इन्द्र, पादस्य उपेन्द्र, पायो मित्र, उपस्थस्य (क) प्रजापति, मनस चन्द्र, इत्येते एकादशेन्द्रियाणामधिष्ठातृदेवाः। "ईश्वरं भास्करे विद्यादुमां विद्यान्निशाकरे। स्कन्दमङ्गारके विद्याद्बुधे नारायणं विदुः। गुरौ वेदनिधिं विद्यात् शुक्रे शक्रो विधीयते। शनैश्चरे यमं विद्याद्राहोः कालं तथैव च। चित्रगुप्तोऽधिपः केतोरित्येते ग्रहदेवता" इति (मत्स्यपुरा०) उक्ता ग्रहाणामधिदेवाः। एतेषां पुनरधिष्ठातृदेवाश्च प्रत्यधिदेवतात्वेन व्यवह्रियन्ते ते च प्रत्यधिदेवताशब्दे दर्शयिष्यन्ते। अधिदेवताप्यत्रैव। "आदित्याभिमुखाः सर्वे साधिप्रत्यधिदेवता" इति मत्स्यपु०। "शशाङ्कमूर्त्तेरधिदेवताकृतिरिति" भट्टिः। चन्द्राधिदेवता उमा।

अधिदैवत न० अधिष्ठातृ दैवतम् प्रा०स०। अधिदेवताशब्दार्थे "शिवाधिदैवतं ध्यायेत् वह्निप्रत्यधिदैवतमिति" "विचिन्त्यो माधिदैवत"मिति च विष्णुध०पु०। दैवते विभक्त्यर्थे अव्ययीभाव। दैवतमधिकृत्येत्यर्थे अव्य०। "अथाधिदैवतम् आदित्यो वा" इति छन्दो० उ० "इत्यधिदैवतमिति वृ०उ०"। अधिदैवमप्यत्र अव्य०। "अधिदैवं किमुच्यते इति" गीता।

अधिनाथ पु० अधिको नाथ प्रा०स०। अधीश्वरे। "तत्राधिनाथमधिकृत्य दिवस्तथासाविति" मेघ०।

अधिनाय पु० अधिनीयते वायुना गन्धाधारसूक्ष्मांशनयनद्वारा तत्तत्स्थानं प्राप्यतेऽसौ अधि+नी—घञ्। गन्धे।

अधिप पु० अधिपाति अधि+पा—क। प्रभौ ईश्वरे। "अथ प्रजानामधिपः प्रभाते" इति रघु। "श्रियः कुरूणामधिपस्येति" भार०।

अधिपति पु० अधिकः पति, अधि+पा—डति वा। ईश्वरे स्वामिनि "स वा एष सर्वेषां भूतानामधिपतिरिति" श्रुति। "सर्वस्याधिपतिर्हि स" इति मनु। "ततो भुजङ्गाधिपतेः फणाग्रैरिति" कुमा०। पत्यन्तत्वात् भावादौ यक् आधिपत्यम्। अत्यन्तैश्वर्य्ये न०। "शैलाधिपस्य स्वयमन्वतिष्ठदिति" कुमा०। सपूर्वपदकत्वात् स्त्रियां ङीप् नश्चान्तादेश। "विष्टम्भिनीं दिशामधिपत्नीमिति यजु० १४,५, अधिपत्नीं स्वामिनीमिति" दीप।

अधिपा त्रि० अधिपाति अधि+पा क्विप् अधिपतौ, अधिपालके च "स्वयंदूतस्त्वमधिपा उ अस्मोऽभि" ऋ०७,८८,२।

अधिपु(पू)रुष पु० अधिकः उत्तमः पु(पू)रुष प्रा०स०। परमेश्वरे। पु(पू)रुषे विभ० अव्ययी०। पु(पू)रुषमधिकृत्येत्यर्थे अव्य०। [बहुप्रजायां स्त्री।

अधिप्रज त्रि० अधिका प्रजा यस्य। बहुप्रजायुक्ते। प्रा०स०।

अधिभू पु० अभिभवति स्वामीभवति सामर्थ्येनाधिः अधि+भू—क्विप्। प्रभौ।

अधिभूत अव्य० भूतेषु विभ० अव्ययी०। भूतान्यधिकृत्येत्यर्थे "अधिभूतं किमुच्यत" इत्यर्जुनप्रश्ने "अधिभूतं क्षरो भाव" इति भगवदुत्तरम् इति गीता। "भूतं प्राणिमात्रमधिकृत्य भवतीत्यधिभूतमुच्यते" इति श्रीधर। अधिभूत भव अनुशतिका० द्विपदवृद्धिः आधिभौतिकम्। भूतान्यधिकृत्य जाते तु स्वादौ त्रि०।

अधिभोजन न० अधिकमत्यन्तं भोजनम् प्रा०स०। अत्यन्नभोजने। भोजनं निरुक्ते धननामसु पठितम् अधिकं धनं मूल्यं यत्र। अतिमूल्यलभ्ये वस्तुनि त्रि०। "दश वस्त्राधिभोजना इति ऋ०६,४७,२४ अधिभोजना अधिकं धनं मूल्यं येषां तादृशानि दश वस्त्राणीति भाष्यम्।

अधिमन्थ पु० अधिकं मथ्यतेऽनेन अधि+मन्थ—करणे घञ्। "उत्पाट्यत इवात्यर्थं नेत्रं निर्मथ्यते तथा। शिरसोऽर्द्धं तु तं विद्यादधिमन्थं स्वलक्षणैः" इत्युक्ते अरणिकाष्ठमन्थनावयवभेदे।

अधिमांस न० अधिकं मांसमत्र। "विस्तीर्णं मृदु बहुलं यकृत्प्रकारं श्यावं वा तदधिमांसजार्म विद्यादिति वैद्यकोक्ते रोगभेदे।

अधिमांसक पु० अधिको मांसो यत्र ब० कप्। "हनूस्थे पश्चिमे दन्ते महाशोथो महारुज। लालास्रावी कफकृतो विज्ञेयः सोऽधिमांसक" इति वैद्यकोक्ते दन्तरोगविशेषे।

अधिमात्र त्रि० अधिका मात्रा यस्य अधिकं प्रमाणमस्य मात्रच् वा। अधिकप्रमाणे।

अधिमास पु० अधिको रविमासादतिरिक्तः शुक्लप्रतिपदादिदर्शान्तश्चान्द्रो मास प्रा०स०। मलमासे 'असंक्रान्तमासोऽधिमासो निरुक्त' इतिस्मृत्युक्तो रविसंक्रान्तिवर्जितो मासोऽधिमास। तथा हि "मीनादिस्थो रविर्येषामारम्भप्रथमे क्षणे। ते चैत्राद्या" इत्युक्तदिशा मीनस्थे रवौ यस्य चान्द्रमासस्यारम्भ स चैत्र एव मेषस्थरवारब्धो वैशाख

शशाङ्कास्त्र मासाः पृथक् सूर्य्यमासैर्विहीनास्तु कल्पेऽथवा तेऽधिमासा इति"॥ इष्टवर्षेऽधिमासानयनं तत्रैवोक्तं यथा "कथितकल्पगतार्कसमागणो रविगुणो गतमाससमन्वितः। खदहनै(३०) र्गुणितस्तिथिसंयुतः पृथगतोऽधिकमाससमाहतात् (१५९३३००००००) ॥ रविदिनाः (१५५५२००००००००)प्तगताधिकमासकैः इतदिनैः सहितो द्युगणो विधो" इति। अत्र वासना कल्पगताब्दा द्वादशगुणिता रविमासा जातास्ते चैत्रादिगतचान्द्रतुल्यैः सौरैरेव युतास्त्रिंशद्गुणा इष्टमासप्रतिपदादिगततिथितुल्यैः सौरैरेव दिनैर्युताः एवन्ते सौरा जातास्तेभ्यः पृथक् स्थितेभ्योऽधिमासानयनं त्रैराशिकेन, यदि कल्पसौरदिनैः कल्पाधिमासा लभ्यन्ते तदैभिः किमिति फलम् गताधिमासाः। तैर्दिनीकृतैः पृथक् स्थितः सौराहर्गणः सहितश्चान्द्रो भवति यतः सौरचान्द्रान्तरमधिमासदिनान्येव" इति। सूर्य्यसिद्धान्तेऽप्युक्तम्। "भवन्ति शशिनो मासाः सूर्य्येन्दुभगणान्तरम्। रविमासोनितास्ते तु शेषाः स्युरधिमासकाः" इति॥ सूर्य्यचन्द्रभगणयोरन्तरं चन्द्रस्य मासाः भवन्ति ते चान्द्रमासा रविमासोनिताः सन्तः शेषा अवशिष्टा ये चान्द्रमासास्तेऽधिकमासा एव भवन्ति मान्ये। अनेन चान्द्रस्याधिमासानां स्पष्टीकृतम्। अत्रोपपत्तिः। तिथ्यन्तव्यात्मकस्य रवीन्दुयुतिकालरूपदर्शान्तावधेश्चान्द्रस्य, द्वादशराशिमितेन सूर्य्येन्द्वन्तरेणैव सिद्धिः कथमन्यथा दर्शान्ते जातस्य मन्दशीघ्रयोः सूर्य्येन्द्वोर्योगस्य पुनर्दर्शान्ते सम्भवः। द्वादशराश्यन्तरं त्वेकं भगणान्तरमतो भगणान्तरेण चान्द्रो मासः सिद्धः। सौरमासापेक्षया यदन्तरेण चान्द्रमासानामधिकत्वं त एवाधिमासा इति।

अधियज्ञ पु० अधिकृतो यज्ञो यस्मात् प्रा०ब०। परमेश्वरे। "अधियज्ञः कथं? कोऽत्र"त्यर्जुनप्रश्ने। "अधियज्ञोऽहमेवात्र देहे देहभृतां वर!" इति भगवदुत्तरम् गीतायाम्। "अत्रास्मिन् देहेऽन्तर्य्यामित्वेन स्थितोऽहमधियज्ञः यज्ञादिकर्म्मप्रवर्त्तकस्तत्फलदाता चेति" श्रीधरः। यथा च तस्य सर्व्वान्तर्य्यामित्वं तथा अधिदेवताशब्देऽन्तर्य्यामिब्राह्मणे पुरस्ताद्दर्शितम्। यज्ञे विभ० अव्ययी०। यज्ञमधिकृत्येत्यर्थे अव्य०। "अधियज्ञं ब्रह्म जपेदिति मनुः, यागे विभ०अव्ययी०। अधियागमित्युक्तार्थे अव्य०। अधिकः अधिकाङ्गयागः मा०स०। अधिकाङ्गे यागे पु०।

अधियोग पु० अधिकोयोगः प्रा०स०। ज्योतिषप्रसिद्धे यात्रिकशुभयोगे। स च गमनसमयलग्ने—तस्माद्वा षष्ठ्यर्थे, पञ्चमे, सप्तमे, नवमे, दशमे, वा आयतनस्थाने शुभजीवभार्गवाणां मध्ये द्वयोः स्थितौ सत्यां भवति। "योगे क्षेममथाधियोगगमने क्षेमं विपूर्णां वध इति" मुहू०।

अधियोध पु० आधिक्येन युध्यति अधि+युध—अच्। अतियोद्धरि। विभ०अव्ययी०। योधे इत्यर्थे अव्य०।

अधिरथ अध्यारूढः रथं रथिनम् अत्या०स०। अतिरथे। कर्णपितरि पु०। "विवेशाधिरथोरङ्गं यष्टिप्राणो ह्वयन्निवेति" भा० आदि०। तस्यापत्यम् इञ्। आधिरथिः कर्णे पु०। कर्णपर्व्वणि भूरिप्रयोगोऽस्य।

अधिराज् पु० अधिराजते अधि+राज—क्विप्। साम्राज्यवति, नृपे, सम्राड्नृपे च "प्रायोपविष्टो गङ्गायामनादृत्याधिराट् श्रियमिति" भाग०। अधिकशोभान्विते त्रि०।

अधिराज पु० अधिको राजा टच् समा०। अधीश्वरे साम्राज्यवति, नृपे च। "शैलाधिराजतनया न ययौ न तस्थाविति" "हिमालयोनाम नगाधिराज" इति च कुमा०।

अधिराज्य न० अधिकं राज्यं प्रा०स०। साम्राज्ये। "अत्यन्यान् पृथिवीपालान् पृथिव्यामधिराज्यभागिति"।

अधिराष्ट्र न० अधिकृतं राष्ट्रमत्र प्रा०ब०। राज्ये। विभ० अव्ययी०। राष्ट्रमधिकृत्येत्यर्थे अव्य०।

अधिरुक्म त्रि० अधिगतं रुक्मम् आभरणं येन प्रा०ब०। अधिगतसुवर्णाभरणे मानवे। "अधिरुक्मा विभीयते" इति ऋ० ८,४६,३३, "अधिरुक्मा अधिकरुक्माभरणेति" भाष्यम्।

अधिरूढ त्रि० अधि+रुह—कर्त्तरि—क्त। उपरिभागे आरोहणकर्त्तरि, अतिवृद्धिमति च। [यथेनारोपिते।

अधिरोपित त्रि० अधि+रुह—णिच्—पुक् कर्म्मणि क्त। अति-

अधिरोहण न० अधि+रुह भावे—ल्युट्। उपर्य्यारोहणे। घञ्। अधिरोहोऽप्यत्र पु०।

अधिरोहणी स्त्री अधिरुह्यतेऽनया अधि+रुह—करणे ल्युट्। (मइ) इति, (सिँड़ि) इति च प्रसिद्धे काष्ठशयादिनिर्म्मिते उच्चस्थानारोहणसाधने सोपानभेदे। अधिरोहसाधनत्वेनास्यास्तथा इति। अधिरोहिणीत्यप्यत्र इति शब्दकल्पद्रुम सम्मुग्धत्वम्। रायमुकुटादिभिः ल्युटैव तत्पदसाधनाद्भास्य इत्यन्यता।

अधिलोक अव्य० लोके विभ० अव्ययी०। लोके इत्यर्थे।

अधिवक्तृ त्रि० अधि+वच—तृच्। पक्षपातेन वक्तरि। "विश्वाहेन्द्रो अधिवक्ता" इति ऋ० १,१००,१०, अधिवक्ता पक्षपातेन वचनयुक्त इति भा०। स्त्रियां ङीप्।

अधिवचन न० अधि+वच—ल्युट्। पक्षपातेन कथने। "अधिकवचनं पक्षपातेन वचन"मिति माधवाचार्य्यः।

अधिवक्तृ त्रि अधिकार्थं वक्ति वच तृच् । अधिकवक्तरि रक्षके । "अधिवक्तारो अस्मभ्यं भूतेति" ऋ० ८, १, १५, अधिवक्ता अधिकवक्ता रक्षकेति भा० ।

अधिवाक पु० अधि–वच–घञ् । पक्षपातेन वचने । "अधिवाकेषु दिति भिषजाभ्युर्दत" इति ऋ० ८। १६, ५, "अधिवाकाय वदतामर्थनार्थादि" भा० ।

अधिवास पु० अधि+वस निवासे–घञ् । निवासे "नी अधिवासदिह्वयुरवज्ञातिनानीति" ह्रेमा । अधि+वास सुरभीकरणे भावे घञ् । गौरवे "कुसुमदामाधिवासकामिनामिति" माघ "अधिवासस्पृहया पारव" इति रघु । अधिवासयति देवता अनेन अधि+वस–णिच् करणे घञ् । यज्ञादौ पूर्वदिने देवतावाहनादि कर्म्मणि । "अधिवास गते शस्मीति" स्मृति अधिवासे भि- तानेति" उपवीतेन पूर्वदिनकर्त्तव्ये कर्म्मणि । "कार्य्यविधेषु कार्य्येण शतपञ्चवर्णेन दिनपूर्वे अधिवासिते देवि अधिवासे कर्त्तव्या । सत्कारार्थं प्रकारे च ।

अधिवासन न० अधिवासयति सुरभयति देवता अनेन अधि+वस–णिच ल्युट् । कार्य्यादौ पूर्वदिने देवताबाहनपूर्वक- गन्धमाल्यादिकर्म्मणि । अधिवासयति सुरभीकरोति अधि+वास सुरभीकरणे भावे ल्युट् । गन्धमाल्यादिभिः सुरभीकरणसं- स्कारभेदे मद्भवत्रि च "गन्धो भवा विना ताभ्यां सूर्य्य इव सर्वं इति । सर्वं अधिवासिनमुर्द्दं यदुक्ता अवतारेषु । विज्ञायं पाद्यं शेषं भाजनाकरणम् । तेन एव विधानेन विधेयमधिवासने" इति कात्यायन्यादि वैद्यादि । "दार्व गन्धाम्बु वस्त्रं तथा अधिवासनमिति" हरा ।

अधिवासित त्रि अधि+वास–सुरभीकरणे कर्म्मणि क्त । सुरभीकृते गन्धमाल्यादिभिः संस्कारे । अधि+वस– निवासे णिच कर्म्मणि क्त । कृताधिवासे देवादौ ।

अधिवाहन न० अधि+वह–णिच–ल्युट् । उपरि प्रापणे धारणे च । णिच वाहनी । वाहनं यानमिति ध्वजे अर्थवम् ।

अधिविकर्त्तन न० अधि+वि+कृत–छेदने ल्युट् । खण्डन- च्छेदे "भारतर्न विकारमतो अधिविकर्त्तनमिति ऋ । ८८, ११ ।

अधिविन्न स्त्री अधिका विन्ना० भार्य्या । विवाहान्तर- स्थ अर्थ्ये । "अधिविन्न प्रकाशते इति" शब्दरत्नाव० ।

अधिविन्ना स्त्री अधि+विद–लाभे कर्म्मणि क्त । कृताधि- वेदनायां यस्या उपरि विवाहान्तरं कृतं तस्यां स्त्रियाम् "अधिविन्ना तु या नारी निर्गच्छेद्रुषिता गृहात् । अधिविन्नस्त्रिये देयमाधिवेदनिकं धनमिति" याज्ञ ।

अधिवेत्तृ पु० अधि+विद–लाभे कर्त्तरि तृच् । विवाहोपरि विवाहान्तरकर्त्तरि ।

अधिवेद अव्य० वेदे–विभक्त्यर्थे अव्ययी० । वेदविषये इत्यर्थे । अधि+विद–भावे घञ् । विवाहोपरि विवाहान्तरकरणे पु० ।

अधिवेदन न० अधि+विद–भावे भावे ल्युट् । विवाहोपरि विवाहान्तरकरणे । तत्र निमित्तादि उक्तम् । आधिवेदनिकम् अधिवेदननिमित्तकम्धने स्त्रीधने च तद्धिते त्रि । "अधिविन्नस्त्रिये देयमाधिवेदनिकं धनमिति" याज्ञ । "आधिवेदनिकाद्यञ्च स्त्रीधनं परिकीर्त्तितमिति" स्मृति । अधिवेदननिमित्तकं तु सहस्रपणादिदानादि विज्ञेय अन्ये तत्प्रमाणमेव ।

अधिवेदनीय स्त्री अधि+विद–लाभे कर्म्मणि–अनीयर् । यदीयायोपरि विवाहान्तरकरणयोग्या सा स्त्री स्त्रियाम् । कर्म्मणि यत् । अधिवेद्याप्यत्र स्त्री । "मद्यपासाध्वीवृत्ताधिवेद्या" इति याज्ञ ।

[ल्युट् । पाकार्थे ।

अधिश्रयण न० अधि+श्रि–आधारे णिच्–ल्युट् चुल्ल्याम् भावे

अधिश्रय पु० अधि+श्रि–आधारे भावे अच् । चुल्ल्यादौ निर्धिमध्ये पाकार्थं स्थापने अपणे ।

अधिश्रयण न० अधि उपरि श्रयते स्थाप्यते पाकार्थं यत्र आधारे ल्युट् । चुल्ल्यां उपरि स्थापने तदपूर्णकार्य्ये च । अधिश्रीयते स्थाप्यते पाकार्थं ल्युट् ङीप् । चुल्ल्याम् (चाला) इति (चुला) इति च ख्यातायाम् स्त्री ।

अधिश्रयणीय त्रि अधिश्रयणाय पाकाय हितम् छ । पाक- भाजनादौ । अधिश्रयितुमर्हति अधि+श्री–पाके कर्म्मणि अनीयर् । पाकार्थे स्थाप्ये त्रि ।

अधिश्रयितवै अव्य० अधि+श्री–पाके भावे तवै छान्दसे ऽर्थे । स्थापयितुं पाकार्थमधिश्रयितुं मुखादिरिति वेद ।

अधिश्री त्रि अधिका श्रीर्यस्य । अधिकश्रीयुक्ते अधिक- सम्पत्तियुक्ते च "एव यज्ञेनाधिश्रीभिरिव इति श्रुत्या सम्पद्विशेषाधिकारिरिति" रत्न ।

अधिषवण न० अधिषूयते सोम यत्र अधि+षु अभिषवे आधारे ल्युट् । सोमाभिषवसाधनफलकाद्वये, "अंश निरपाद्यधिषवणे" इति वेद । भावे ल्युट् । अभिषवे ।

अधिष्ठाता त्रि अधितिष्ठति स्था तृच् । अधिष्ठाने कर्त्तरि । अत्र दर्शितं प्रमाणाधिकरणमुक्ता" इति च १।६८, अधिष्ठाता स्वं अधिष्ठानकर्त्तृ इति भा ।

अधिष्ठातृ त्रि॰ अधि+स्था–तृच् षत्वम्। अध्यक्षे, नियमित-कार्य्यविशेषाकरणेन कृतासमावेक्षके, नियन्तरि च। "आत्मेन्द्रियाद्यधिष्ठातेति" भाषा॰। अधिदैवे च। "इन्द्रियाणामधिष्ठातृदेवास्ते परिकीर्त्तिता" इति पुरा॰। ते च अधिदेवताशब्दे दर्शिताः सर्वाधिष्ठाता तु परमेश्वर एव तदपि तत्रैवान्तर्यामित्राह्मणेन दर्शितम्। "तत्सान्निध्या-दधिष्ठातृत्वं मणिवदिति" सांख्यसू॰। यथायस्कान्तमणेः सान्निध्यमात्रेण शल्यनिष्कर्षकत्वं न सङ्कल्पादिना तथैवादिपुरुषस्य संयोगमात्रेण प्रकृतेर्महत्तत्त्वरूपेण परिणमनम्। इदमेव च सोपाधिकस्रष्टृत्वमित्यर्थः। तथाचोक्तम्। "निरिच्छे संस्थिते रत्ने यथा लोहः प्रवर्त्तते। सत्ता-मात्रेण देवस्य तथा चैव जगज्जनि। अत आत्मनि कर्त्तृत्वमकर्त्तृत्वं च संस्थितम्। "निरिच्छत्वादकर्त्तासौ कर्त्ता सन्निधिमात्रत" इति सां॰भा॰। स्त्रियां ङीप्।

अधिष्ठान न॰ अधि+स्था–ल्युट्। नियमितकार्य्यविशेषाकरणेन सान्निध्यमात्रेण नियमनाय, स्थितौ, वेदान्तशास्त्रप्रसिद्धे आरोपाधिकरणे च। वेदान्तिनाञ्च अध्यासस्याधिष्ठानं यथा तथाऽध्यासशब्दे वक्ष्यते। अधिकरणे ल्युट्। पुरे आधारमात्रे, आश्रये च। "तदधिष्ठानाश्रयदेहे तद्वाद इति" सा॰सू॰। "तस्य लिङ्गस्य यदधिष्ठानमाश्रयो वक्ष्यमाणभूतपञ्चकं तस्याश्रये षाट्कौशिके देहे इति भाष्यम्"। करणे ल्युट्। चक्रे, प्रभावे च अमरेण, प्रभावेन च हि महच्चयुद्धस्थ्यादिसम्भव। अधिष्ठानञ्च नियन्तृत्व यथोक्तं शास्त्रे। "संहतपरार्थत्वात् त्रिगुणादिविपर्य्य-यादधिष्ठानादिति" "इतश्च पुरुषोऽस्ति अधिष्ठानात् त्रिगुणात्मकानामधिष्ठीयमानत्वात् यद्यत् सुखदुःखमोहात्मकं तत् सर्वं परेणाधिष्ठीयमानं दृष्टं यथा रथादि यन्त्रादिभिः, सुखदुःखमोहात्मकञ्चेदं बुद्ध्यादि, तस्मादेतदपि परेणाधिष्ठात-व्यम्। स च परस्त्रैगुण्यादन्य आत्मेति" सा॰कौ॰। भावे ल्युट्। सन्निधिमात्रे। "अतोऽधिष्ठानं कुर्वीति" छायाकृम-मन्त्र। "भोक्तुरधिष्ठानाद्भोगायतननिर्म्माणमन्यथा पूति-भावप्रसङ्गात्" इति सांख्यसू॰ "भोक्तुः प्राणस्याधिष्ठानात् व्यापारादेव भोगायतनस्य शरीरस्य निर्म्माणं भवति। अन्यथा प्राणव्यापाराभावे शुक्रशोणितयोः पूतिभावप्रसङ्गात् मृतदेहवदित्यर्थः। तथाच रससञ्चारादिव्यापारविशेषैः प्राणो देहस्य निमित्तकारणं धारकत्वादिति भाव इति भा॰। ननु प्राणिनं निर्व्यापारस्याधिष्ठाने प्रयोजनाभाव इति तत्राह। "भृत्यद्वारा स्वाम्यधिष्ठितिर्नैकान्त्यात्" इति सा॰सू॰। "देहनिर्म्माणे व्यापाररूपमधिष्ठानं स्वामिनश्चेतनस्यै-कान्त्यात् अपेक्षा नास्ति किन्तु प्राणरूपभृत्यद्वारा यथा राज्ञः पुरनिर्म्माण इत्यर्थः। तथा च प्राणस्याधिष्ठातृत्वं साक्षात् पुरुषस्याधिष्ठातृत्वं प्राणसंयोगमात्रेणेति सिद्धम्। कुलालादीनां घटादिनिर्म्माणेष्वप्येवम्। विशेषस्त्वेव तत्र चेतनस्य बुद्ध्यादेरप्युपयोगोऽस्ति बुद्धिपूर्व्वकसृष्ट्या-दिति। यद्यपि प्राणाधिष्ठानादेव देहनिर्म्माणं तथापि प्राणद्वारा प्राणिसंयोगोऽप्यपेक्ष्यते पुरुषार्थमेव प्राणेन देह-निर्म्माणादित्याशयेन भोक्तुरधिष्ठानादित्युक्तम् इति भा॰। अधिष्ठीयते कर्म्मणि ल्युट्। अधिष्ठिते सन्निधिमात्रेण नियन्त्रिते। "इन्द्रियाणि मनो बुद्धिरस्याधिष्ठान-मुच्यते" इति गीता।

अधिष्ठित त्रि॰ अधि–स्था–कर्म्मणि क्त। अध्युषिते "त्रिलोक्य-वस्त्रोक्षमधिष्ठितस्त्वयेति" कुमा॰। सन्निधिमात्रेण नियो-जिते "ईश्वराधिष्ठिताः सर्वे स्वं स्वं कार्य्यं हि कुर्वते इति पुरा॰।

अधिहरि अव्य॰ हरौ, विभ॰ अव्ययी॰। हरिमधिकृत्येत्यर्थे

अधीकार पु॰ अधि+कृ–घञ् उपसर्गस्य दीर्घत्वम्। अधि-कारशब्दार्थे "सर्वाकरेष्वधीकारो महायन्त्रप्रवर्त्तनम्" इत्युपपातकगणनायां मनु। "स्वागतं स्वानधीकारा-निति" कुमा॰।

अधीत न॰ अधि+इङ–भावे क्त। अध्ययने, कर्म्मणि क्त। कृताध्ययने अभ्यस्ते च त्रि॰ "ईषदीषदनधीतविद्ययेति" कुसु॰। "अधीतवेदवेदाङ्गत्वेनेति" वे॰सा॰।

अधीति स्त्री अधि+इङ् अध्ययने क्तिन्। अध्ययने "अधी-तिबोधाचरणप्रचारणैरिति" नैष॰। अधि+इक–स्मरणे क्तिन्। स्मरणे "नू ते पूर्व्वस्य वसो अधीतौ तृतीये इति ऋ॰२,४,८, "अधीतौ स्मरणे" इति भाष्यम्।

अधीतिन् त्रि॰ अधीतमनेन अधीत+इनि। कृताध्ययने। "स गुरुत्तरामङ्गवतीमधीतिनीमिति" कुमा॰। एतदिष्य-न्तयोगे च कर्म्मणि सप्तमी वेदेऽधीतीत्यादि किन्तु कर्म्मा-विवक्षया प्रथमं भावे एव क्त पश्चात् कर्म्मणा योग कृतपूर्व्वी कटमित्यत्रेव। यथोक्तं हरिणा। "अकर्म्मकत्वे सत्येव क्तान्ते भावाभिधायिनि। पश्चात् क्रियावता कर्त्रा योगो भवति कर्म्मणेति"। विस्तरः शब्दशक्तिप्रकाशिकायां द्रष्टव्यः।

अधीन त्रि॰ अधिगतमिनं प्रभुम् अत्या॰स॰। आयत्ते। मिता-धीन इत्यादौ तु मित्रे अधि–इति वाक्ये समासे अध्युत्तर-पदात् ख। "क्व नु मां त्वदधीनजीवितामिति" कुमा॰।

"तातावीमतसा याव विवुधाषाममय च" इति मनुः।
"दत्वानुभा दुरावैर्वं नरधीना हि विशः" इति रघुः।
अधीर त्रि धीरः धैर्यान्वितः न त । चटुके "कामका भर्त्सयन् अधीरस्वपुनरस्वेति" रघुः। काव्ये, रोमा- दिताकुलचित्ते च। स्त्रियां कातरायाम् च स्त्री। अहथर्व नातिकायाम् यथा

अधीवास अधि+वस आधारे करणे घञ्। कर्मव वास एव चञ्चादुपि दृश्यते। "अधीवासं परिदधोऽसौ वीरू सिमीधे" इति भागः १०,८,११ अधीरे वर्तते अंसारत्रेबेमधीवासः। चञ्चानुप इति महुमाला। "अधीवासेन यच्चादयतीति भाष्य १ ६११ वन स्विमतमर्व वाधोऽधीवास" इति वैदरीय।

अधीश त्रि अधिक ईशः प्रा स । ताम्भीति अधिपती च। "महाधीशा सर्वे सुभुवनपतिभिः संयुत" इति भाग०।
अधीश्वर त्रि अधिक ईश्वरः प्रा स । स्त्रियां वीप्। राजनि "अधिकत्र कालमोवरार्तिति" भव। प्रभौ च।
अधीष्ट न अधि+इष क्त-भावे क्त। सत्कारपूर्वकनियोगे "विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङिति पा "अधीष्टं सत्कारपूर्वको व्यापारः" इति सि कौ। तत्र वि क्त। सत्कारपूर्वकं नियोजिते त्रि।
अधुना अव० अस्मिन् काले इदम्+धुना च। अस्मिन् काले इदानीमित्यर्थे इत्यर्थः। सम्प्रति अर्थे च । अधुनातन त्रि० इदानीमवे त्रि। [वितर्कर्दोषः]
अधुनातन त्रि अधुना+भवार्थे ट्युल तुट् च। इदानीन्तने
अधुर त्रि० न धूः वितथ धाले ना यस्य अधूरत्ना। भारभृते निर्भारभूते च न त। अधू—अभावे अधिके च। नत्वे त भारभृता। अधूरवः इति।
अधूमक त्रि० नास्ति धूमो यस्य। धूमशून्ये अग्न्यादौ।
अधृत त्रि० न धृतः। धैर्यं धारणं न धैर्याने न धृतो यत्र नरैरेव धृतो दन्ताः। कथितु धृतितिः? इति यत्र "न धरितो धरणम् तैर्धार्यावाहुनाद् सर्वास्तिमानात् धर्म तपः स्यात्। "धर्मदा धरता धार्या इति विभ् वरद०।
अधृति स्त्री हर्षितादौ धैर्ये धा अभावार्थे न त। मानसावधौ, धैर्याभावे, च।
अधृष्ट त्रि धृष्ट निर्लज्जतः न त त । लज्जासीले। धृष्—अविनीते क्त न त। धर्षणिमूर्ति "मम मो निमन्त्रणाभारतविधि" भा १।१०१ धार्मयनविज्ञम् स्यादि भा । धर्षितेति च । "मूर्तासीमतीयोऽपरत्" इति

रू० ११२ । धत्ता धर्षितेषा इति भा ।
अधृष्य त्रि न धृष्यः न त०। भर्नित्रयोगे "अदृष्या- तिमनु मारीतमौतिशव इति रघः। तत्र निर्णजम भावे अधृ धर्षति यत्र। कठात्मके तपार्थ ईत्व त्रि।
अधेनु स्त्री न त। दोहनशून्यायां गवि। "अधेनु दव वावस्थिति" ऋ १।११७।२ अधेनुम् अदोग्ध्री- मिति" भा। [धूम त्रि।
अधैर्य न धैर्याभावे न त। चपलतायां न। भय-
अधोक्ष त्रि अधः अक्षम् अक्षात् अक्षति अवति वा अक्ष—वस अस-न वा वेदे अधोऽक्षोऽधस्तात्। अधस्तात् प्राप्ते। "अधोऽक्षता निमा, अधोक्षाभिरिति भ० १ ११,८, "मदाता अधस्तायसाहूपति महा दर्शाहीनि मेव मध्यये" इति भा । [अधस्तीय। परिधानक।
अधोऽंशुक न अधरस्थम् अधर+अंशुकार्थे वस्त्र अधरक
अधोऽम्ब न अधरस्थं यत्र तार्थे अधर+अम्बार्थे अधि न। इवितीनायाधोभागे। "इंवस्त्वार्थं मामो निम्नान- मीति" भा ११। १ १० इवितवतितीनावाधीय मैव मातृकृता निवरमीति" वेदभा।
अधोऽक्षज पु अधात् इन्द्रियात् जायते जन-ड ६त । अधस्तु तत्त्वज्ञानम् अधरं प्राकृतज्ञानादीनि यत्र अधर-अक्षार्थे अधि अधरादेव। इन्द्रियाधीने "अधो न क्षीयते जातु यस्मादधोक्षजस्ततः" अनुशासने मा स्मृतो। "नामो भगुरधोक्षज" इति विष्णुस० "धीरूपं हरिपी नायकदोषीधारयन। अधो मराव बद्धेव सर्वोऽधोक्षजस्तने इति भाष्ये तथा च अधा- धराधनन्त्य पितामहेव आक्रमय अस्याम्। अधोभूते अधस्तिरोभावो निरयेन माचरणैषु अवन्ये जायते प्रकाशते इति अस यत्र इति मा। अधार्थ।
अधोगति स्त्री अधस्तिन् अधमाम् गतयो गति गत्यादिविषये "अधमगां सर्वेषामिति" इम। गत्यथ च भावत्यातेन मुक्ताद्यपत्यात् अधस्तम् "धीरं च वरे गत्वा गदमा इति (वि शिरो) वीर्यवाने तत्र गत्वाभिसिन्धा वीर्येमिति च। "वायु- रुत्मायनमानयोऽली वायवयोषाः शक्तीदृशानी" अधेन नायावर्तितवे वर्गेषोका। अयो गत्वाभावात्मनम्, मू- मोगमत्वे विरूर्व स्थात्। "अथ्यनुपरकात् वर्षीय अधि मापत्य रसाय शाखापात्योनिन्नम्। अधो- गतिस्त पातकेन। अधःप्रदेशगाने गमने च "मूर्त-

नामधोगतिरिति" काद०। अधोऽधस्तात् गतिर्यस्य ब० । नरकगामिनि त्रि० "असमेक्षितमर्यादं नास्तिकं विप्रलुम्पकम् अरक्षितारमत्तारं नृपं विद्यादधोगतिमिति" मनु ८,३९, ४१, अधोगति नरकगामिनमिति कुल्लूकभट्ट ।

अधोगामिन् त्रि० अधरस्मिन् अध गच्छति गम—णिनि । नरकगामिनि,अधोभागे—गन्तरि च । स्त्रियां ङीप् ।

अधोघण्टा स्त्री अधरात् अधस्तादारभ्य घण्टेव तदाकारफल-वत्त्वात् । अपामार्गे रक्तमाला ।

अधोजानु न० अधरं जानुन प्रथमार्थे अस्मि । जानुनोऽधरे ब्राह्मणादीनां प्रमाणविशेषमभिधाय "सर्वेषां वाधोजानु इति का० २१,४,१८, "वा विस्तार्थे सर्वेषां जानुनोरध-स्तात् अधोजान्विति" तद्व्याख्या ।

अधोजिह्विका स्त्री अल्पा जिह्वा जिह्विका अल्पार्थे कन् अधोऽधरा जिह्विका कर्म० । (आलजिभ) इति ख्याता-याम् तालुस्थजिह्विकायाम् ।

अधोदारु न० अधरं दारु अधर+प्रथमार्थे अस्मि । काष्ठ-मयद्वारस्याधरकाष्ठे (गोबराट्) ।

अधोदिश् स्त्री अधरा दिश् अधर+प्रथमार्थे अस्मि कर्म० । दक्षिणस्यां दिशि । अस्या अधरत्वञ्चोदक्शब्दे वक्ष्यते ।

अधोदृष्टि त्रि० अधरस्मिन् अध दृष्टिरस्य । योगाभ्यास-समये नासिकाग्रमात्रदर्शनयुक्ते, तत्प्रकारस्तु "किञ्चित् प्रकाशविस्मितोऽयतारैर्भ्रूविक्रियायां विरतप्रसङ्गैः । नेत्रैरवि-स्पन्दितपक्ष्ममालैर्लक्ष्मीकृतघ्राणमधोमयूखैरिति' कुमारे "करचाम्यवक्षिप्तक्षय स्थाणुवच्चिरकालक । आत्मानं हृदये ध्यावेन्नासाग्रन्यस्तलोचन" इति योगसारे "गीतायामपि "सम्प्रेक्ष्य नासिकाग्रं स्वमित्यादिना" दर्शित । अधो-दर्शनयुक्तमात्रे त्रि० । "अधोदृष्टिर्नैकृतिक" इति मनु ४,१९६ । कर्म० । अधस्थदृष्टी स्त्री ।

अधोऽधस् अधस्+अधस्तात् सामीप्ये द्वित्वम् । समीपाधोदेशे "नयनधोऽधोदृष्टत पयोधरानिति" माघः ।

अधोपहास पु० अधः अधोभागस्य,कामन्दिरस्य उपहास परिम्लान्तः । स्त्रीणामधोभागस्योपहसने । "यदेव विद्वानधोपहासं चरत्यार्णं, स्त्रीणां सुकृतं हरन्ति" इति छ०उप० । इत्युक्तं आवर्ज्यतीति भाष्यम् ।

अधोभक्त न० अधर भक्तं यस्मात् अधर+प्रथमार्थे अस्मि ५त० । भक्तभोजनान्ते पीयमानजले ।

अधोभाग अधरोभागः अधर+प्रथमार्थे अस्मि कर्म०। अधर-भागे "पूर्वभागो गुरुः इ सामधोभागस्तु योषितामिति" ।

अधोभुवन न० अधरमध भुवनम् लोक । सप्तसु पाता-लेषु । तत्स्थानञ्च 'भूमेरर्द्धं क्षारसिन्धोरुदक्स्थं जम्बुद्वीपं प्राहुराचार्यवर्या अर्द्धेऽन्यस्मिन् द्वीपषट्कस्य याम्ये क्षारक्षीराद्यम्बुधीनां निवेश ॥ लवणजलधिरादौ दुग्ध-सिन्धुश्च तस्मादस्तमस्तरप्सि श्रीश्च यस्माद्बभूव । महि-तचरणपद्मः पद्मजन्मादिदेवैर्वसति सकलवासो वासुदेवश्च यत्र ॥ दध्नो घृतस्येक्षुरसस्य तस्मान्मद्यस्य च स्वादुजलस्य चान्त्य । स्वादूदकान्तर्वडवानलोऽसौ पातालकोका पृथिवीपुटानीति सि०शि० ॥ अधिक भूगोलशब्दे वक्ष्यते ।

अधोमुख त्रि० अधो मुखं यस्य ब० । ज्योतिष-शास्त्रे प्रसिद्धेषु नक्षत्रभेदेषु । यथा "मूलाश्लेषा कृत्तिका च विशाखा भरणी तथा । मघा पूर्वात्रय चैव अधोमुख-गण स्मृत" इति । गोजिह्वाख्यवृक्षे (अनन्तमूल) अवाङ्मुखे स्त्रियां वा ङीप् । "सख्यदृष्टिरधोमुख" इति "अधोमुखैरूर्द्ध्वमुखैस्य पतिभि" इति रघु । रुद्रा-भेदे च तत्स्वरूप रुद्राशब्दे वक्ष्यते ।

अधोराम पु० अधोभागे अधस्ताद्भागे राम शुक्ल दृष्टितर्प-कत्वात् तस्य रामत्वम् । अधोभागे शुक्लवर्णे "आश्विनाव-धोरामाविति' य०२४,१,"अधोरामौ अधोभागे शुक्लवर्णा-वजाविति' वेददीप । [अधोभुवमशब्दे विवरणम् ।

अधोलोक पु० अधोऽधरो लोक कर्म०। भूमेरध स्थपाताले।

अधोवर्चस् त्रि० अधोगामि वर्च ज्योतिर्यस्य । अवाचीन-ज्योतिष्के "तस्ते विद्वान् वरुण ! प्रब्रवीम्यधोवर्चस" इति वेदः ।

अधोवायु पु० अधोगामी वायु शा०त० । अपानवायौ पर्द्दशब्दकारके वाते "अधोवायुसमुत्सर्गे प्रहासेऽनृतभाषणे" इत्युपक्रम्य "कर्म कुर्वन्नुपस्पृशे"दित्युक्त स्मृतौ ।

अध्यक्ष त्रि०अधिगतोऽक्ष व्यवहारम् अत्या०स०। स्वपक्ष छल-धारणादिव्यवहारेष्वधिकृते। अध्यक्ष्णोति व्याप्नोति अधि+ अक्ष—अच् । व्यापके । अधिगत भूततया अक्षमिन्द्रियम् अत्या०स०। प्रत्यक्षज्ञाने । अर्श आदित्वात् अच् । तद्वि-षये त्रि० । "द्रव्याध्यक्षे सत्त्वयोगो मनसा ज्ञानकारण-मिति" भाषा०। "सेनापतिबलाध्यक्षाविति" मनु । अधि-ष्ठातरि सन्निधिमात्रेण नियन्तरि च "मयाध्यक्षेण प्रकृति सूयते सचराचरमिति" गीता "यदध्यक्षेण जगता वयमा-रोपितास्त्वमेति' कुमा० क्षीरिकावृक्षे पु० शब्दार्णव ।

अध्यग्नि अव्य० अग्नौ अग्निसमीपे वा विभक्त्यर्थे सामीप्ये,

अध्यम्बर अव्य० अम्बरे-विभ० अव्ययी०। अम्बरमधिकृत्येत्यर्थे।

"कतमोऽध्यर्द्ध" ? इति पुनः शाकल्यप्रश्ने, "योऽयं पवत" इत्युत्तरं तत्र पवत इत्यनेन वायुरुक्तः । "तदाहुर्यदयमेकएव पवते अथ कथमध्यर्द्ध" ? इति । वायोरेकत्वेन अध्यर्द्ध-शब्दार्थस्य सार्द्धत्वस्यासम्भवे पुनराक्षिप्ते "यदस्मिन् इदं सर्व-मध्यार्ध्नोत् तेनाध्यर्द्ध" इत्युत्तरम् तेन अधिकर्द्धिहेतुत्वात् वायोरध्यर्द्धत्वात् तथात्वम् अधि+ऋध—अच् अध्यार्ध्नोत् ।

अध्यवसाय पु० अधि+अव—सो—घञ् । इदमेवमेवेति विषय-परिच्छेदे निश्चये । स चात्मधर्म इति नैयायिकाः बुद्धिधर्म इति सांख्यादयः । "उपात्तविषयाणामिन्द्रियाणां वृत्तौ सत्यां बुद्धे रजस्तमोऽभिभवे सति यः सत्त्वसमुद्रेकः सोऽयमध्यव-साय इति वृत्तिरिति चाख्यायते" इति सांख्यतत्त्वकौमुदी-परिभाषितलक्षणः, "कर्त्तव्यमिति योऽयं निश्चयः चित्-सान्निध्यात् मापन्नचैतन्याया बुद्धेः परिणामः सोऽयमध्य-वसाय" इत्युक्तलक्षणो वा निश्चयः । "प्रतिविषयाध्यवसायो दृष्टमिति सां०का० । उत्साहे च । उत्साहश्च कर्म्मसु सुकरत्वेन ज्ञानात् उद्यमभेदः ।

अध्यवसायित त्रि० अध्यवसायो जातोऽस्य तारा० इतच् । जाताध्यवसाये । [निश्चयवति च ।

अध्यवसायिन् त्रि० अधि+अव—सो—णिनि । उत्साहान्विते

अध्यवहनन न० अधि—उपरि अवहननम् । पूर्व्वावघातेन निस्तुषीकरणेऽपि पुनरवघाते । तेन च "व्रीहीनवह-न्तीति" नियमपालनम् ।

अध्यशन न० अधिकमशनम् । "अजीर्णे भुज्यते यत्तु तद-ध्यशनमुच्यते" इति सुश्रुतोक्ते अजीर्णेऽपि अधिकाशने । "यथोक्तैः प्रकोपणैर्विरुद्धाध्यशनस्त्रीप्रसङ्गेत्यादि" सुश्रुतम् ।

अध्यस्त त्रि० अधि+अस—कर्म्मणि क्त । कृताध्यासे आरो-पिते, अध्यासशब्दे वक्ष्यते तल्लक्षणे मिथ्याभूते पदार्थे । शुक्तौ रजतमध्यस्तम् ब्रह्मणि जगदध्यस्तमित्यादि ।

अध्यात्म अव्य० आत्मानं देहमिन्द्रियादिकं चेतनं ब्रह्म वाऽधिकृत्य टच् समा० । देहमिन्द्रियादिकम् आत्मानं ब्रह्म वाधिकृत्येत्यर्थः । तत्र देहाधिकारे "अध्यात्ममिति" बृ०उ० अधिदेवताशब्दे दृश्यम्, तत्र मायाद्यधिकारेण अन्तर्या-मित्वमुक्तम् । चेतनाधिकारे "अध्यात्मयोगाधिगमेनेति" । "अध्यात्मरतिरासीनो निराकाङ्क्षो निरामिषः" इति मनुः । "आत्मानं ब्रह्माधिकृत्येति" कुल्लू० । "जरामरणमोक्षाय मामाश्रित्य यतन्ति ये । ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलमिति" गीता । "ते जना परं ब्रह्म कृत्स्नमध्यात्मञ्च विदुः । ये तत् मामव्य देहादिव्यति-रिक्तं शुद्धमात्मानञ्च जानन्तीति" श्रीध० । "अक्षरं परमं ब्रह्म स्वभावोऽध्यात्ममुच्यते" इति गीता । "स्वस्यैव ब्रह्मण एवांशतया जीवस्वरूपेण भावो भवनं स एवात्मानं देहम-धिकृत्य भोक्तृत्वेन वर्त्तमानोऽध्यात्मशब्देनोच्यते" इति श्रीधरः । तेन देहाधिकारेण भोक्तृतया ब्रह्मणोऽंशस्य जीवभवनेऽस्य पारिभाषिकत्वं सूचितम् "अध्यात्मविद्या विद्यानां वादः प्रवदतामहमिति" गीता सा च विद्या न्यायवैशेषिकमते देहभिन्नत्वेन, सांख्यादिमते प्रकृतिभिन्न-त्वेन आत्मनः स्वरूपादिप्रतिपादिका । वेदान्तिमते तु ब्रह्माभिन्नत्वेनेति भेदः । सर्व्वेषां मतेऽध्यात्मतत्त्व-ज्ञानरूपत्वात्तस्या अध्यात्मविद्यात्वम् । तत्र नैयायिकवैशे-षिकमते आत्मा द्विविधः जीवात्मा परमात्मा च । तत्र जीवात्मानमधिकृत्य उदयनाचार्य्येण आत्मतत्त्वविवेकरूपप्रक-रणं, परमात्मानमधिकृत्य च कुसुमाञ्जलिनामकमपरं प्रकरणं निरमायि । सांख्ये ईश्वरानभ्युपगमेन पुरुषस्य प्रकृत्यादिभ्यो विवेकज्ञानाय षडध्यायीरूपं कपिलमुनिना, तन्मूलकमीश्वर-कृष्णेन च सांख्यकारिका सप्तति निरमायिषत, वाच-स्पतिना च ता व्याख्याताः ततएव विस्तरोऽवसेयः । पातञ्जले तु जीवानामीश्वरस्य च भेदस्वीकारेऽपि ईश्वरप्रणिधानेन पुरुषस्य प्रकृत्यादिभ्यो भेदसाक्षात्कार इति भेदः । अधिकं तत्तच्छब्दे वक्ष्यते । "मयि कर्म्माणि स-र्व्वाणि संन्यस्याध्यात्मचेतसेति" गीता । "अध्यात्मचेतसा विवेकबुद्ध्या" । अध्यात्म जात ठञ् । अनुशतिका० द्विपद-वृद्धिः । आध्यात्मिक दैहिके मानसिके च दुःखादौ त्रि० ।

अध्यात्मदृश् त्रि० अध्यात्मं पश्यति दृश—क्विन् । आत्मनो विषयत्यागेनात्ममात्रदर्शके ।

अध्यात्मयोग पु० आत्मानं चेतनमधिकृत्य योगः । विषयेभ्यः प्रतिसंहृत्य चेतसश्चात्मनि समवधाने । "अध्यात्म-योगाधिगमेनेति" ।

अध्यात्मरामायण न० आत्मानमधिकृत्य कृतं रामस्यायनं यत्र । वाल्मीकिप्रणीते अध्यात्मज्ञानप्रतिपादके प्रश-स्ते रामचरितज्ञापके स्वनामख्याते ग्रन्थभेदे ।

अध्यात्मशास्त्र न० अध्यात्मं प्रतिपादकं शास्त्रम् । आत्म-स्वरूपादि प्रतिपादकग्रन्थे ।

अध्यापक पु० अध्यापयति अधि+इङ् णिच्—ण्वुल् । अध्ययनकारयितरि, उपाध्याये च । "भृतकाध्यापको यस्तु भृतकाध्यापितस्तथेति" मनुः । अस्य अकान्तत्वेऽपि याज-कादिगणे पाठात् षष्ठीसमासः तेन वेदाध्यापकः न्याया-

[illegible] इति। [illegible] द्विविधः [illegible] [illegible] विद्भ्या "[illegible]" [illegible] विद्यात्। [illegible] [illegible]"।

अध्यापन न॰ अधि+इङ्-णिच्-भावे ल्युट्। पाठनायाम्। "[illegible]" मनुः। [illegible]

अध्यापित त्रि॰ अधि-इङ्-णिच् कर्मणि क्त। पाठिते "[illegible]" श्रुतिः।

अध्याप्य त्रि॰ अधि इङ्-णिच्-कर्मणि यत्। पाठनीये [illegible] "[illegible]" इति [illegible]।

अध्याय पु॰ अधि+इङ्-घञ्। [illegible] [illegible] "[illegible]" इति [illegible]।

अध्यारूढ त्रि॰ अधि+आ+रुह कर्मणि कर्त्तरि वा क्त। [illegible] अध्यारूढ अधिके च।

अध्यारोप पु॰ अधि+आ-रुह-णिच्-भावे घञ्। [illegible]

अध्यारोपण न॰ अधि+रुह-णिच् भावे ल्युट्। अधि [illegible]।

अध्यावाप पु॰ अधि+आ+वप-घञ्। [illegible]। [illegible]।

अध्यावाहनिक न॰ [illegible] [illegible] "[illegible]" [illegible]।

अध्यास पु॰ अधि+अस-क्षेपे घञ्। [illegible]

देशान्तरस्थरजतादिकं तु न इन्द्रियसन्निकृष्टमित्यगत्या तथा कल्प्यते। अतएव श्रुतौ “यत्र द्वैतमिव भवति तदितर इतरत् पश्यतीति” “अथ रथान् रथयोगान् पथः सृजते” इति च जागरे द्वैतस्य इवशब्देन मिथ्यात्वं सूचितम्। स्वप्ने च रथादेः स्पष्टं सृष्टिरुक्ता। तथाच ब्रह्मणि जगदादेरनिर्वचनीयस्य तदज्ञानेनोत्पत्तिः। इयांस्तु विशेषः रजतादेः स्वप्नरथादेश्च प्रतीतिसमकालत्वं, वियदादेस्तु व्यवहारिकत्वम्। “देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः लौकिकं तद्वदेवेदं प्रमाणं स्वात्मनिश्चयादित्युक्ते व्यवहारकाले वियदादिप्रमेयाणां सत्यत्वं, “परमार्थदृष्ट्या तु मिथ्यात्वमिति” “अन्यदार्त्तमित्यादि”श्रुत्या च ब्रह्मभिन्नानां मिथ्यात्वावगमात्। अधिकमाकरे दृश्यम्।

अध्यासन न० अधि+आस–उपवेशे ल्युट्। निवासे। विभ०अव्ययी०। आसने इत्यर्थे अव्य०।

अध्यासित त्रि० अधि+आस आधारस्य कर्मसंज्ञाया कर्मणि क्त। अधिष्ठिते। “धेन्वा तदध्यासितकातराक्ष्येति” रघु।

अध्याहार पु० अध्याह्रियते ज्ञानायानुसन्धीयते अधि+आ+हृ–घञ्। आकाङ्क्षाविषयपदानुसन्धाने, ऊहे, तर्के, अपूर्व्वोत्प्रेक्षणे च। ऊहस्वरूपमूहशब्दे तर्कस्वरूप च तर्कशब्दे वक्ष्यते। [क्त। अधिष्ठिते स्थानादौ।

अध्युषित त्रि० अधि+वस–आधारस्य कर्म्मसंज्ञया कर्म्मणि

अध्युष्ट्र त्रि० अधिगतमुष्ट्रं वाहनत्वेन अत्या०स०। उष्ट्रवाहनयुक्ते शकटादौ। (उठगाड़ि)।

अध्यूढ त्रि० अधि उपरि ऊढ। अवलम्बनत्वेन उपरिभावेण अवलम्बिते। “तस्मादृच्यध्यूढं साम गीयते” इति छा० उप०। ऋचमवलम्ब्यैव साम्नो गीयमानतया ऋच्यध्यूढत्वम्। अधिकऋद्धियुक्ते, शम्भौ च। कृतसापत्निकाया प्रथमायां “यस्या उपरि विवाहान्तरं कृत” तादृश्यां स्त्रियाम् स्त्री।

अध्यूध्नी स्त्री अधिकमूधोयस्या अनृङ् ङीप् च। समस्तापीनाया धेन्वाम् “अध्यूध्नीं होत्रे प्रयच्छतीति श्रुति जवधाव्यध्यूध्नीवनिष्णुसु समुच्चय इति का० १,८,८१।

अध्येतव्य त्रि० अधि–इङ कर्म्मणि क्त। पाठ्ये “स्वाध्यायोऽध्येतव्य इति” श्रुतिः। अर्हार्थे तव्य। अध्येतुमर्हे ‘ओसव्यमिह शूद्रेण नाध्येतव्यं कदाचनेति’ स्मृति।

अध्येषण न० अधि–इष–प्रेरणे ल्युट्। सत्कारपूर्व्वकमाचार्यादेः प्रेरणे, प्रवर्त्तनमात्रे च। युच् टाप् तत्रिव प्रार्थने स्त्री। अधिका एषणा प्रार्थना। अधिकप्रार्थने स्त्री।

अध्रि त्रि० न–धृ–कि। अधृते। न+धृष–ड्रि, अधृष्ये।

अध्रिगु त्रि० अध्रि+गम–कु–डिच्च ऊडादेशो वा। अधृतगमने। “यदध्रिगावोऽध्रिगू इदाचिदह्नो अश्विना” इति ऋ० ८,२२, ११, “अध्रिगावोऽधृतगमना अध्रिगू–अधृतगमनाविति” भा०।

अध्रिज त्रि० अध्रिमधृतमधृष्यं वा जनयति जन–अन्तर्भूतण्यर्थे, ड। अधृतजनके अधृष्यजनके च। “इति चिन्मन्युमध्रिज इति ऋ०५,७१० “अध्रिज अधृतमन्यैरग्निव्यतिरिक्तैः अधृष्य वा जनयिता” इति भा०।

अध्रुव त्रि० न०त०। अनिश्चिते, चञ्चले, अस्थिरे च। “योध्रुवाणि परित्यज्य अध्रुवाणि निषेवते। ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव हि” इति हितो०।

अध्रुष पु० “शोथः स्थूलस्तोददाहप्रकाशो रक्ताज्ज्ञेयः सोऽध्रुषो रुग्ज्वराढ्य इति” सुश्रुतोक्ते विकृतरक्तादिजे ज्वरकारके शोथरोगभेदे।

अध्वग पु० अध्वन्+गम–ड। पथिके अध्वगमनप्रकारश्च विष्णुसंहितायामुक्त। यथा “नैकोऽध्वानं प्रपद्येत नाधार्मिकैः सार्द्धन्, न वृषलैः, न द्विषद्भिः, नातिप्रत्यूषम्, नातिसायम्, न सन्ध्ययोः, न मध्याह्ने, न सन्निहितपानीयम्, नातितूर्णम्, न रात्रौ, न सन्ततं व्याधितार्त्तैर्वाहनैः, न हीनाङ्गैः, न रोगिभिः, न दीनैः, न गोभिः, मादान्तैः, वयसोदर्कैर्वाहनानामदत्त्वात्मनः क्षुत्तृष्णापनोदने न कुर्यात्। न चतुष्पथमधितिष्ठेत्, न रात्रौ वृक्षमूलम्, न शून्यालयं, न वनम्, न पशूनां मन्दिरमागारम्, न केशतुषकपालास्थिभस्माङ्गारान्, न कार्पासास्थि। चतुष्पथं प्रदक्षिणीकुर्यात् देवताश्च। प्रख्याताश्च वनस्पतीन्, अग्निब्राह्मणगणिकापूर्णकुम्भादर्शच्छत्रध्वजपताकाश्रीवृक्षवर्द्धमाननन्द्यावर्त्तांश्च, तालवृन्तचामराग्निगजाजगोदधिक्षीरमधुसिद्धार्थकांश्च, वीणाचन्दनायुधार्द्रगोमयपुष्पशाकगोरोचनादूर्वाप्ररोहांश्च, उष्णीषालङ्कारमणिकनकरजतवस्त्रासनयानामिषाश्च भृङ्गारोद्धृतोर्व्वरारज्जुमत्पशुकुमारीमीनांश्च दृष्ट्वा प्रायादिति। मत्तोन्मत्तव्यङ्गान् दृष्ट्वा निवर्त्तेत वान्तविरिक्तमुण्डमलिनवसनजटिलवामनांश्च, कषायिप्रव्रजितमलिनांश्च तैलगुडशुष्कगोमयेन्धनतृणकुशपलाशभस्माङ्गारांश्च लवणक्लीबासवमधुसककार्पासरज्जुनिगडमुक्तकेशांश्च वीणाचन्दनार्द्रकाशोष्णीषालङ्करणकुमारीं प्रस्थानकालेऽभिवन्द्येदिति। देवब्राह्मणगुरुदीक्षितानां छायां नाक्रामेत्

[illegible] । न [illegible] । [illegible] न [illegible] । [illegible] न [illegible] । न [illegible] । न [illegible] ।

अध्वमत् त्रि [illegible] । [illegible] ।

अध्वगभोग्य पु [illegible] (आमड़ा) इति ख्याते [illegible] ।

अध्वगा स्त्री [illegible] (गङ्गा) इति [illegible] ।

अध्वन् पु [illegible] ।

अध्वनीन त्रि [illegible] ।

अध्वन्य त्रि [illegible] ।

अध्वपति त्रि [illegible] ।

अध्वर पु [illegible] ।

[illegible]

अध्वरकर्मन् न [illegible] ।

अध्वरमीमांसा स्त्री [illegible] ।

अध्वरथ पु [illegible] ।

अध्वर्यु पु [illegible] ।

अध्वशल्य पु [illegible] ।

अध्वश्रम त्रि [illegible] ।

अध्वाति पु [illegible] ।

अध्वान्तशात्रव पु [illegible] ।

अध्वायन न [illegible] ।

अन जीवने अदा०पर० अक०सेट्। अनिति आनीत्। अन् आन, अच् अन, ल्युट् अननम्। आनयति अनिनिषति। क्विप् अन् "सर्वं खल्विदं ब्रह्म तज्जलानिति विश्वे च- नेदमा ऋ० ४ १०,२, अना प्राणेनेति भा० छा०उप० "यद्येष आकाश आनन्दो न स्यात् कोह्येवान्यात्? कः प्राण्यात्? इति श्रुति "प्राणिवस्तत्र मानार्थमिति" भट्टि। प्राद्युपसर्गतोविशेषगत्यर्थता। प्र+प्रागतौ, प्राण अप+अधोगतौ अपान', उद्+उर्द्ध्वगतौ उदान, वि+ आ+विविधगतौ व्यान, सम्+समन्ताद्गतौ समान। "यद्धि प्राणिति स प्राणः यदपानिति सोऽपान" इति श्रुति। जीवन च प्राणधारणं तेन धात्वर्थोपसङ्गृहीतकर्मकत्वादकर्मक यत्र तु योगात् देहनिर्माणमित्युक्तमर्थमधिगतानशब्दे। उप- सर्गनिमित्तात् णत्वमत्वेऽप्यत्र णत्व प्राण्।

अन जीवने दिवा० आत्म०अक० सेट्। अन्यते आनिष्ट।

अन पु० आ+नी–बा०ड पृ० आदेर्ह्रस्व अन–बा० अच् वा। आनयने प्राणने च "प्राणोऽपानो व्यान उदान समानोऽन इत्येतत् सर्वं प्राण इति" वृ०उप०। "अथ प्राण उच्यते। प्राणो मुखनासिकसञ्चार्योहृदयवृत्ति। प्रण- यनात् प्राण। अपनयनान्मूत्रपुरीषादेरपानोऽधोवृत्ति आ- नाभिस्थान। व्यानो व्यानयनकर्मा, व्यान प्राणापानयो सन्धिर्वीर्यवत्कर्महेतु। उदान उत्कर्षोर्द्ध्वगमनादिहेतुरा- पादतलमस्तकस्थान ऊर्द्ध्ववृत्ति। समान सम नयनाद्भुक्तस्य पीतस्य च कोष्ठस्थामोऽग्निपक्ता। अन इत्येषां वृत्तिविशेषाणां सामान्यभूता सामान्यदेहचेष्टासम्बन्धिनी वृत्तिरेवं यथोक्त प्राणादिवृत्तिजातमेतत् सर्वं प्राण एवेति" भा०। प्राणे च "स होवाच किं मेऽन्नं भविष्यतीति" यत्किञ्चिदिदमा श्वभ्य आ शकुनिभ्य इति होचुस्तद्वा एतदनस्यान्नमनो ह वै नाम प्रत्यक्षमिति छा०उ०। "स होवाच मुख्य प्राण, किं मेऽन्नं भविष्यतीति" मुख्यप्राण प्रष्टारमिव कल्पयित्वा वागादीन् प्रतिवक्तॄनिव कल्पयन्ती श्रुतिराह। यदिदं लोकेऽन्नजात सर्वप्राणिनामा श्वभ्य आ श्वभि सह, आ शकुनिभ्य सह शकु- निभि सर्वं प्राणिनां यदन्नं तत्तवान्नमिति होचुर्वागादय इति। प्राणस्य सर्वमन्नं प्राणोऽत्ता सर्वस्यान्नस्येत्येवं प्रतिपत्तये कल्पिताख्यायिकारूपाद्वाक्याद्धत्यस्तेन श्रुतिरुद्येवाह। तद्धै एत- दयत्किञ्चिल्लोके प्राणिभिरन्नमद्यते अनस्य प्राणस्य तदन्नम् भा०

अनंश त्रि० नास्ति अंशोदायग्रहणाधिकारोऽस्य। अंशानधि- कारिणि अनुक्ते क्लीबपतितादौ। ते च "सर्वे हि धर्मयुक्ता भागिनो द्रव्यमर्हन्ति यस्त्वधर्मेण द्रव्याणि प्रतिपादयति ज्येष्ठोऽपि तमभाग कुर्वीतेति" आप०। "सवर्णास्वोपयुक्ता- स्वाहे सप्तात् पैठके धने। तत्पिण्डदाः श्रोत्रिया ये तेषां तदभिधीयते। उत्तमर्णाधमर्णेभ्य पितर त्रायते सुत। अतस्तद्विपरीतेन नास्ति तेन प्रयोजनम्। तया गवा किं क्रियते या न धेनुर्न गर्भिणी। कोऽर्थ पुत्रेण जातेन यो न विद्वान् न धार्मिक। शास्त्र- शौर्यार्थरहितस्तपोविज्ञानवर्जित। आचारहीन पुत्रस्तु मूत्रोच्चारसमस्तु स इति वृह०। "श्राद्धादे पुत्रकर्तृकतया महाफलश्रुतेस्तत्कर्मवेतनं धनसम्बन्धस्य अतस्तदकुर्वत कुतो वेतन? मिति दा०भा०। अतएवाह मनु। "सर्व- एव विकर्मस्था नार्हन्ति भ्रातरो धनम्"। तथा "अनंशौ क्लीवपतितौ जात्यन्धवधिरौ तथा। उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रिया इति।" पतितस्तत्सुत क्लीव पङ्गुरुन्म- त्तको जड। अन्धोऽचिकित्स्यरोगार्त्तौ भर्त्तव्यास्ते निर- शका" इति कात्या०। देवल "मृते पितरि न क्लीवकुष्ठ्युन्म- त्तजडान्धका। पतित पतितापत्य लिङ्गी दायांशभागिन। तेषां पतितवर्ज्जेभ्यो भक्तवस्त्रं प्रदीयते। तत्सुता पितृ- दायांश लभेरन् दोषवर्जिता" इति। बौधायन। "अतीतव्यवहारान् ग्रासाच्छादनैर्बिभृयु, अन्धजडक्लीव- व्यसनिव्याधितादींश्चाकर्मिण पतिततज्जातवर्जम् इति"। "पितृद्विट् पतित षण्ढो यश्च स्यादौपपातिक। औरसा अपि नैतेऽश लभेरन् क्षेत्रजा कुत?। इति" नार०। "अक्रमोढासुतश्चैव सगोत्राद्यस्तु जायते। प्रव्रज्यावसितश्चैव न रिक्थं तेषु चार्हति। अक्रमोढा- सुतस्त्वृक्थी सवर्णश्च यदा पितु। असवर्णप्रसूतश्च क्रमोढायाश्च यो भवेत्। प्रतिलोमप्रसूतोयस्तस्या पुत्रो न रिक्थभाक्। ग्रासाच्छादनमात्र तु देय तद्बन्धुभिर्मतम् अन्यूनामप्यभावे तु पित्र्यं द्रव्य तदाप्नुयात्। स्वपित्र तद्धनं प्राप्तं दापनीया न मान्यथा इति कात्या०। एव दर्शिता। अ ग अवयव। तत्कृत्ये निरयवे आका- शादौ, परमेश्वरे च। [यथा। कदल्याम् जटाधर।

अनंशुमत्फला स्त्री न अंशुमत् मोचकाभ्यन्तरस्यत्वात् फल

अनक पु० अयकवत्। अधमे, कुत्सिते च।

अनक्ष् त्रि० न अक्ष्णोति व्याप्नोति विषयमिन्द्रियेण अक्ष–क्विप् न०त०। अन्धे चक्षुरिन्द्रियशून्ये। "प्रतिश्रोणा स्या व्यन- गष्टेति" ऋ०२, १५, ७, "पूर्व्यमस्य अधुना चक्षुर्ला- भात् व्यचष्टेति भा०।

अनक्ष त्रि० नास्ति अक्ष चक्षु नेत्रादिकमिन्द्रियं वा यस्य न०।

[illegible]

[illegible]

त्रि० । कज्जलशून्ये त्रि० । "नेत्रे दूरगनञ्जने पुलकि-तेति" सा० द० ।

अनडुज्जिह्वा स्त्री अनडुहोजिह्वेव । गोजिह्वायाम् (शा-न्तमूल) । तस्या गोजिह्वाकृतिपत्रत्वात्तथात्वम् ।

अनडुह् पु० अनः शकटं वहतीति नि० । (एँड़े) इति प्रसिद्धे गवि । स्त्रियां गवि ङीपि अनडुही, अनड्वाहीति च । वत्सादि० क । अनडुत्क अनडुद्युक्तदेशादौ त्रि० । ऋषिभेदे । तद्गोत्रापत्ये गर्गा० यञ् । आनडुह्य तद-पत्ये पु०स्त्री ।

अनणु पु० न अणु । स्थूलधान्ये "अनणुरणु दयमाणोऽणुनर्थ-कादयाय" लीला० । अणुभिन्ने स्थूले त्रि० स्त्रियां ङीप् ।

अनतिक्रम म० न०त० । अतिक्रमाभावे । [त्तनीये ।

अनतिक्रमणीय त्रि० न०त० । अतिक्रमणीयभिन्ने अनुल्ल-

अनतिद्भुत त्रि० सर्व्वाण्यि अतिक्रमान् न भवति अति-भू-द्रुतच् न०त०ष० । सर्वातिक्रमेणाभूते यथार्थभूते । "महा स इन्द्र ! गिर्वण क्रियन्ते अनतिद्भुता" इति ऋ० ८,९१,२, अनतिद्भुता सर्वानतिक्रम्य न भवन्ति इन्द्रगुणव्यापकानि यथार्थभूतानीति" भा० ।

अनतिप्रश्न्य त्रि० अतिप्रश्नमर्हति यत् न०त० । अति-प्रश्नानर्हे वस्तुनि । "सहोवाच गार्गि ! मातिप्राक्षी मा ते मूर्द्धा व्यपप्तदनतिप्रश्न्यां वै देवतामतिपृच्छसीति" ए०उ०

अनतिरिक्त त्रि० न० । अधिके । "न्यायोक्ते स्वानधिकरण-वृत्तिभिन्ने च "अनतिरिक्तवृत्तित्वमवच्छेदकत्वमिति"गदा० ।

अनतिविलम्बिता स्त्री न अतिविलम्बिता अभावार्थे न०त० । अतिविलम्बाभावे वाग्गुणभेदे च । वाग्गुणाश्च हेमचन्द्रे दर्शिता यथा "संस्कारवत्त्वमौदार्य्यमुपचार परीतता । मेघगम्भीरनिर्घोषप्रतिनादविधायिता दक्षि-णत्वमुपनीतरागत्वं च महार्थता । अव्याहतत्वं शिष्टत्व संशयानामसम्भव । निराकृतान्योत्तरत्व हृदय ङ्गमिताऽपि च । मिथ साकाङ्क्षता प्रस्तावौचित्य तत्त्व निष्ठता । अप्रकीर्णप्रसृतत्वमश्लाघ्यान्यनिन्दिता । आभिजात्यमतिस्निग्धमधुरत्व प्रशस्यता । अमर्म्मवेधि तौदार्य्यं धर्म्मार्थप्रतिबद्धता । कारकाद्यविपर्य्यासोविभ्र-मादिवियुक्तता चित्रकृत्त्वमद्भुतत्व तथानतिविलम्बिता अनेकजातिवैचित्र्यमारोपितविशेषता । सत्त्वप्रधानता वर्ण-पदवाक्यविविक्तता । अव्युच्छित्तिरखेदित्वम्पञ्चत्रिंशच्च वाग्गुणा " इति ।

अनद्धा अव्य० न अद्धा । अनिश्चये "अनद्धा वैतद्यदि-माल्लोकान्नतीति" वेद । नञ्-क्त न०त० । अपरिबद्धे त्रि० ।

अनद्धापुरुष न अद्धा सत्कार्य्ये निश्चयो यस्य तादृश पुरुष । देवपितृकार्य्यविमुखे । "अनद्धापुरुषमोच्यते" इति का० १६,२,१२, 'अनद्धापुरुष देवपितृकार्य्ये विमुखमध्वर्यु मिति" वेददीप ।

अनद्य पु० न अद्य भक्ष्यम् अभावस्थे न०त० । गौर-सर्षपे राजनिघ० । भक्ष्यभिन्ने त्रि० ।

अनद्यतन पु० न अद्यतन । अद्यतनभिन्ने भूते भविष्यति च काले "अनद्यतने लङि"ति "अनद्यतने लुडिति" च पा० । अनद्यतने भूते लङ अपचत्, अनद्यतने भविष्यति लुट् पक्तेति "परोक्षानद्यतने लिडिति" पा० पपाच । तत्कालवृत्तौ त्रि० । अद्यतनश्च "अतीतायाराते पश्चा-र्द्धेन, आगामिन्या रात्रे पूर्व्वार्द्धेन सहितोदिवसोऽद्यतन" इति सि०कौ० तद्भिन्न कालः ।

अनधिकार पु० न अधिकार अभावार्थे न०त० । अधि-काराभावे । ब० । अधिकारशून्ये ।

अनधिकारचर्चा स्त्री अनधिकारस्य चर्चा चिन्ता । यत्र यस्याधिकारो नास्ति तस्य तद्विषये चिन्तायाम् ।

अनधिकारिन् त्रि० न अधिकारी । अधिकारिभिन्ने ।

अनधिकृत त्रि० न अधिकृतः । अधिकृतभिन्ने ।

अनधिगत त्रि० न०त० । गतभिन्ने, प्राप्तभिन्ने, ज्ञातभिन्ने च अनधिगताबाधितार्थज्ञानत्वेन प्रमाणत्वमिति वे०प० ।

अनधिष्ठित त्रि० न अधिष्ठित । अधिष्ठितभिन्ने ।

अनधीन त्रि० न अधीन परस्य । स्वाधीने । स्वायाम् कर्त्तरि । कौटतक्षे । स हि कस्या वसन् न कस्यचित् अधीन

अनध्यक्ष न० अध्यक्षम् अभावे न०त० । प्रत्यक्षाभावे "मनो-ऽपि न तथा ज्ञानाद्यनध्यक्ष तदा भवेत्" इति भाषा० अध्यक्षं प्रति आश्रयमहत्त्वस्य कारणत्वेन मनसश्च "अयौ-गपद्याज्ज्ञानानां तस्याणुत्वमिहेष्यते इत्युक्तं अणुत्वेन ज्ञानादिप्रकारक अहं जानामीत्याद्याकार ज्ञानं प्रत्यक्ष न स्यात् ज्ञानाश्रयत्वेन अभिमतस्य मनसो महत्त्वाभावादिति तदाशय । ब० । अध्यक्षरहिते त्रि० ।

अनध्याय पु० अध्यायोऽध्ययनम् अभावार्थे न०त० । अध्यय नाभावे । न अधीयतेऽस्मिन् काले इति अधिकरणे घञ् । अध्ययनाय निषिद्धे "चातुर्मास्यद्वितीयादौ स्मृतिप्रोक्तान-ध्यायकाले "अष्टकासु च सङ्क्रान्तौ शयने बोधने हरेः । अनध्याय प्रकुर्व्वीत" तेत्याद्युक्ते काले, "निर्घाते भूमिचलने" इत्याद्युक्ताकालिकानध्यायकाले च । अनध्यायकालाश्च स्मृतौ

[illegible]

पौर्णमास्यौ तस्मात्ता परिवर्जयेत् । पांशुवर्षे दिशां दाहे गोमायुविरुते तथा । श्वखरोष्ट्रे च रुवति पङ्क्तौ च न पठेद् द्विज । नाधीयीत श्मशानान्ते ग्रामान्ते गोव्रजेऽपि वा । वसित्वा मैथुनं वासः श्राद्धिकं प्रतिगृह्य च । प्राणि वा यदि वाऽप्राणि यत्किञ्चिच्छ्राद्धिकं भवेत् । तदालभ्याप्यनध्यायः पाण्यास्यो हि द्विजः स्मृतः । चौरैरुपप्लुते ग्रामे सम्भ्रमे चाग्निकारिते । आकालिकमनध्यायं विद्यात् सर्वाद्भुतेषु च । उपाकर्मणि चोत्सर्गे त्रिरात्रं क्षपणं स्मृतम् । अष्टकासु त्वहोरात्रमृत्वन्तासु च रात्रिषु । नाधीयीताश्वमारूढो न वृक्षं, न च हस्तिनम् । न नावं, न खरं, नोष्ट्रं, नेरिणस्थो, न यानगः । न विवादे, न कलहे, न सेनायां, न सङ्गरे । न भुक्तमात्रे, नाजीर्णे, न वमित्वा, न सूतके । अतिथिञ्चाननुज्ञाप्य, मारुते वाति वा भृशम् । रुधिरे च स्रुते गात्राच्छस्त्रेण च परिक्षते । सामध्वनावृग्यजुषी नाधीयीत कदाचन । वेदस्याधीत्य वाप्यन्तमारण्यकमधीत्य च" इति । याज्ञवल्क्यस्तु । "त्र्यहं प्रेतेष्वनध्यायः शिष्यर्त्विग्गुरुबन्धुषु । उपाकर्मणि, चोत्सर्गे, स्वशाखश्रोत्रिये मृते । सन्ध्यागर्जितनिर्घातभूकम्पोल्कानिपातने । समाप्य वेदं द्युनिशमारण्यकमधीत्य च । पञ्चदश्यां चतुर्दश्यामष्टम्यां राहुसूतके । ऋतुसन्धिषु भुक्त्वा वा श्राद्धिकं प्रतिगृह्य च । पशुमण्डूकनकुलमार्जारश्वाहिमूषिकैः । कृतेऽन्तरे त्वहोरात्रं, शक्रपाते, तथोच्छ्रये । श्वक्रोष्टुगर्दभोलूकसामबाणार्त्तनिस्वने । अमेध्यशवशूद्रान्त्यश्मशानपतितान्तिके । देशेऽशुचावात्मनि च विद्युत्स्तनितसंप्लवे । भुक्त्वार्द्रपाणिरम्भोऽन्तरर्द्धरात्रेऽतिमारुते । पांशुवर्षे दिशां दाहे सन्ध्यानीहारभीतिषु । धावतः पूतिगन्धे च शिष्टे च गृहमागते । खरोष्ट्रयानहस्त्यश्वनौवृक्षेरिणरोहणे । सप्तत्रिंशदनध्यायानेतांस्तात्कालिकान् विदुः" इति । वशिष्ठः । "तत्रानध्याया सन्ध्यास्वस्तमिते सूतके शवे दिवाकीर्त्ये नगरेषु कामं गोमयपर्युषिते परिलिखिते वा श्मशानान्ते शयानस्य श्राद्धिकस्य । मानवञ्चात्र श्लोकमुदाहरन्ति । फलान्यपस्तिलान् भक्ष्यमन्यच्छ्राद्धिकं भवेत् । प्रतिगृह्याप्यनध्यायः पाण्यास्या, ब्राह्मणाः स्मृता इति ॥ धावतः पूतिगन्धप्रसृतेरिणशाखारूढस्य, नावि, सेनायाञ्च, भुक्त्वा चार्द्रपाणे, वाणशब्दे, चतुर्दश्याममावास्यायामष्टम्यामष्टकासु प्रसारितपादोपस्थस्योपाश्रितस्य गुरुसमीपे मैथुनव्यपेतायां वाससा मैथुनव्यपेतेनानिर्णिक्ते न ग्रामान्ते-च्छर्दितस्य, मूत्रितस्योच्चरितस्य, वजुषाञ्च सामशब्दे, वाणोर्षे निर्घातभूमौ च न चन्द्रसूर्योपरागेषु, दिङ्नादपर्वतनादकम्पप्रपातेषूपलरुधिरपांशुवर्षेष्वाकालिकम् । उल्काविद्युत्सज्योतिषमपर्त्त्वाकालिकं वा । आचार्ये च प्रेते त्रिरात्रमाचार्यपुत्रशिष्यभार्यास्वहोरात्रम् । ऋत्विग्योनिसम्बन्धेषु च" इति । शङ्खोऽप्याह । "अनध्यायेष्वध्ययनं वर्जयेच्च प्रयत्नतः । चतुर्दशीं पञ्चदशीमष्टमीं राहुसूतकम् । उल्कापातं महीकम्पमशौचं ग्रामविप्लवम् । इन्द्रप्रयाणं सुरतं घनसङ्घातनिस्वनम् । वाद्यकोलाहलं युद्धमनध्यायं विवर्जयेत् । नाधीयीताभियुक्तोऽपि प्रयत्नाच्च च वेगतः" इति । "यद्दिनमहः क्रियते तद्दिनमनध्यायः" इत्युक्तेः देवोत्सवादिदिनेऽपि अनध्याय इति केचित् तेन सारस्वतोत्सवे श्रीपञ्चमीदिवसे रथयात्रोत्सवादौ चानध्यायः । "महानवम्यां द्वादश्यां भरण्यामपि पर्वसु । तथाक्षयतृतीयायां शिष्यान्नाध्यापयेद्बुधः । माघमासे तु सप्तम्यां रथाख्यायाञ्च वर्जयेदिति" हारीतः । एवं नानास्मृत्युक्तेषु च येन सर्वसम्प्रदायाचरणीयम् ।

अनन न० अन–भावे ल्युट् । जीवने, गतौ च "प्राणननवान् प्राण" इत्यादि वे०सा० ।

अननुगत त्रि० न अनुगतः । अनुगतभिन्ने अनुगतस्तु तुल्याकारप्रतीतिप्रयोजको धर्मभेदः यथा घट इति बुद्धौ घटत्वम् एव घटत्वम् तस्य सर्वत्र एकरूपेण प्रतीयमानत्वात् । अननुगतञ्च तत्सद्व्यक्तित्वादिकं तस्य सर्वत्र प्रतीत्यभावात् । अपर्याप्ते, अनधीने च ।

अननुगम पु० न अनुगम अभावार्थे न०त० । अनुगमाभावे अनुगमश्च तुल्यप्रतीतिप्रयोजकधर्मानुसरणम् एतच्च न्यायादिदर्शनेषु भूरिप्रयोग ।

अनन्त पु० नास्ति अन्त गुणानां यस्य ब० । "गन्धर्वाप्सरसः सिद्धाः किन्नरोरगचारणाः । नान्तं गुणानां जानन्ति तेमानन्तोऽयमव्ययः" इत्युक्तलक्षणे विष्णौ, अनन्त । "संसारमहासमुद्रे मग्नान् समभ्युद्धर वासुदेव ।" इति भविष्यपुरा० । "विष्णुर्वीरोऽनन्त" इति विष्णुस० । मेघे । वलशीर्षे कालादपरिच्छिन्ने शेषनागे, तदवतारे बलभद्रे च । अन्त परिच्छेदः देशतः कालतः वस्तुतश्च नास्ति यस्य । तस्मिन् परब्रह्मणि न० "सत्यं ज्ञानमनन्तं ब्रह्मेति" श्रुतिः । "न व्यापित्वाद्देशतोऽन्तो नित्यत्वान्नापि कालतः । न वस्तुतोऽपि सर्वात्म्यादानन्त्यं ब्रह्मणि त्रिधा । देशकालान्यवस्तूनां कल्पितत्वाच्च मायया । न देशादिकृतोऽन्तोऽस्ति

[illegible] "[illegible]" [illegible] । [illegible] । [illegible] । "[illegible]" [illegible] । [illegible] ।

चमत्[illegible] स्त्री [illegible] ।

चमत्[illegible] [illegible] ।

चमत्[illegible] [illegible] ।

चमत्[illegible] स्त्री "[illegible]" [illegible] । [illegible] ।

चमत्[illegible] [illegible] ।

चमत्[illegible] [illegible] ।

चमत्[illegible] [illegible] ।

चमत्कार त्रि [illegible] । "[illegible]" [illegible] । "[illegible]" [illegible] । "[illegible]" [illegible] । "[illegible]" [illegible] ।

[illegible] "[illegible]" "[illegible]" [illegible] । [illegible] । [illegible] ।

चमत्[illegible] स्त्री [illegible] ।

चमत्[illegible] [illegible] । "[illegible]" [illegible] ।

चमत्[illegible] त्रि [illegible] । [illegible] ।

चमत्[illegible] [illegible] ।

चमत्[illegible] [illegible] । "[illegible]" [illegible] । "[illegible]" [illegible] ।

चमत्[illegible] [illegible] । "[illegible]" [illegible] । [illegible] ।

चमत्[illegible] [illegible] । "[illegible]" [illegible] ।

चमत्[illegible] [illegible] ।

चमत्[illegible] [illegible] । "[illegible]" [illegible] ।

चमत्[illegible] [illegible] । "[illegible]" [illegible] ।

चमत्[illegible] स्त्री [illegible] ।

वासुकिपत्न्याम् । वासुकौ परमेश्वरे च पु० "यक्ष्मयोर्मा पुरुष" इति श्रुत्या तस्य यक्ष्मयोर्षलोक्तेस्तथात्वम् ।

अनन्तश्री पु० अनन्ता अपरिमिता श्री परा शक्तिरस्य । परमेश्वरे "पराऽस्य शक्तिर्विविधैव श्रूयते इति" श्रुत्या तस्य बहुशक्तिप्रतिपादनात्तथात्वम् ।

अनन्ता स्त्री नास्ति अन्तोऽस्या ब० । विशल्यायामोषधौ (अनन्तमूल) इति ख्याते मूलभेदे, पार्वत्याम्, पृथिव्याम्, दुरालभायां, दूर्वायां, हरितक्यां, आमलक्याम्, गुडूच्याम्, अग्निमन्थवृक्षे, अग्निशिखावृक्षे, श्यामलतायाम्, पिप्पल्यां, नीलदूर्वायाम्, श्वेतदूर्वायां, शारिवौषधौ च ।

अनन्त्य न० अनन्तस्येदम् यत् । हिरण्यगर्भपदे ।

अनन्द त्रि० न नन्दयति नन्द–णिच्–अच् न०त० । आनन्दयितृभिन्ने" अनन्दा, नाम ते लोका इति कठ०व० ।

अनन्न न० न०त० । अदनीयभिन्ने । "न किञ्चिदनन्नं भवति श्वा भ्यः श्वा शकुनिभ्य" इति छा०उ० ।

अनन्य त्रि० न अन्य सर्वना० । अन्यभिन्ने स्वस्मिन् 'अनन्यरतिरासीन" इति मनु अनन्यस्मिन् स्वस्मिन् रतिरनुरागोऽस्येति तदर्थः । नास्ति अन्यो यस्य उपास्यत्वेन विषयत्वेन वा । अन्यासेवके "अनन्याश्चिन्तयन्तोमामिति" अनन्यविषये च । "पुरुष स पर, पार्थ ! भक्त्या लभ्यस्त्वनन्ययेति" च गीता । अस्य नञ उत्तरत्र पदान्तरसत्त्वे असमर्थसमासाश्रयणात् तदर्थेनैवान्वय । यथा "अनन्यदृष्टि सवितारमैक्षतेत्यादौ" अन्यत्र दृष्ट्यभावस्य, अनन्यचेता इत्यादौ अन्यत्र चेतोऽभावस्य, अनन्यकाम इत्यादौ अन्यत्र कामाभावस्य च बोधनमेवमन्यत्र ।

अनन्यगतिक त्रि० नास्ति अन्या गतिरस्य कप् । अन्योपायरहिते तन्मात्राश्रये च । "अनन्यगतिके जने विगतपातके पातके" इत्युद्भटः ।

अनन्यज पु० नास्ति अन्यद्यस्मात् सर्ववस्तुभेदाना तदात्मकत्वात् अनन्यो विष्णु तस्मात् जायते जन–ड ५त०। कामदेवे । तस्य कृष्णात् रुक्मिण्यां जन्मेति भाग० १०स्क०"तस्माच्च तादृशीमवस्थां गतायां जनस्यानन्यजेनेति" दशकु० ।

अनन्यदेव पु० न अन्यद्यस्मात् सर्वात्मकत्वात् तादृशोदेव । परमेश्वरे विष्णौ "सर्वदेवमयोहरिरित्युक्तेस्तथात्वम् ।

अनन्यपूर्वा स्त्रीन अन्य पूर्वो यस्या सा अन्यपूर्वा न भवति । अन्याभुक्ताया स्त्रियाम् "मनुप्रभृतिभिर्मान्यैर्भुक्ता यद्यपि राजभि । तथाप्यनन्यपूर्वेव तस्मिन्नासीद्वसुन्धरेति" रघु ।

अनुरक्त त्रि० अनु+रञ्ज क्त । अनुरागयुक्ते, अनुगत रक्तं रागम् अत्या०स० । प्राप्तरक्तवर्णे ।

अनुरक्ति स्त्री अनु+रञ्ज–क्तिन् । अनुरागे ।

अनुरञ्जक त्रि० अनुरञ्जयति अनुरक्तं करोति अनु+रञ्ज–णिच्–ण्वुल् । अनुरागयुक्तकारके ।

अनुरञ्जन न० अनु+रञ्ज–णिच्–भावे ल्युट् । अनुरागयुक्तकरणे "विश्वेषामनुरञ्जनेन जनयन्नानन्दमिति" रामा० । कर्त्तरि ल्यु । अनुरञ्जके त्रि० ।

अनुरञ्जित त्रि०अनु+रञ्ज–णिच्–कर्म्मणि क्त । यस्य अनुरागः कृतः तस्मिन्, अनुरक्तीकृते जने ।

अनुरणन अनु+रण–ल्युट् । घण्टादिशब्दज प्रतिध्वन्यात्मके शब्दस्थाने व्यञ्जनरूपशब्दशक्तिभेदे, ध्वनिभेदे च ।

अनुरत त्रि० अनु+रम–कर्त्तरि क्त । अनुरक्ते, अभिरते च ।

अनुरति स्त्री अनु+रम–भावे क्तिन् । अनुरागे ।

अनुरस त्रि० अनुगतो रसम् । माधुर्य्यादिरसानुगते "भूमिजं गुरु नातिवातल भूमितयास्यानुरसं" इति "मधुरानुरसं रूक्ष लवणानरस लघु । नार्य्यास्तु मधुरं कान्य कषायानुरस हिममिति" च सुश्रुतम् ।

अनुरहस त्रि० अनुगत रहः अत्या०स० अच्समा० । निर्ज्जनदेशानुगते ।

अनुराग पु० अनु+रञ्ज+घञ् । अत्यन्तप्रीतौ, स्नेहे च । अनुरूपो रागः प्रा०स० । अनुरूपरागे । "अनुरागवन्तमपि लोचनयोरिति" माघ "प्रणादस्तु शब्द स्यादनुरागज" इत्यमरः । "प्रियानुरागस्य मन सच्चन्नतेरिति" रघु । अनुगतो रागं गतिस० । प्राप्तलौहित्यवर्णे त्रि० ।

अनुरागिन् त्रि० अनु+रञ्ज–घिनुण् कुत्वम् । अनुरागयुक्ते स्त्रियां ङीप् । "वेश्याश्चाप्यनुरागिणीमिति" सा०द० ।

अनुरात्र अव्य० रात्रौ विभ० अव्ययी० अच्समा० । रात्राविव्यर्थे, प्रतिरात्रे च । "तस्मात् स्त्र्यनुरात्र पत्यावियच्छते" इति श्रुति । अनुगतो रात्रिम् । रात्र्यनुगते त्रि० ।

अनुराधा स्त्री० अनुगता राधा विशाखाम् अत्या०स० । सप्तविंशतिधाविभक्तस्य राशिचक्रस्य सप्तदशभागात्मके नक्षत्रभेदे "रेवत्युत्तररोहिणीमृगशिरोमूलानुराधामघेति" ज्योति० । "राधे विशाखे पुष्यमनुराधाज्येष्ठा सु मचलेषिति" श्रुति । "गिरिशिगुणरसेन्द्रियानलशशिविषयगुणर्तुपञ्चवसुपक्षा । विषयैकचन्द्रभूतार्णवाग्निरुद्राश्विवसुदहनाः । भूतगतपक्षवसवो द्वात्रिंशत्तारकामानम् । क्रमशोऽश्विन्यादीनां कालस्ताराप्रमाणेन । नक्षत्रजसदृशे फलमङ्गैर्लारकामितैः सदृशत् । दिवसैर्ज्वरस्य नाशो व्याधेरन्यस्य वा यान्व "इति इ०उक्तेस्तस्याः चतुस्तारात्मकत्वम् । अश्वियमदहनकमलजशशिसूलभृददितिजीवफणिपितरः । योन्यर्यमदिनकृत्त्वष्टपवनशक्राग्निमित्राश्च । शक्रो निर्ऋतिस्तोयविश्वे देवा हरिर्वसुर्वरुणः । अजपादोऽहिर्बुध्न्यः पूषा चेतीश्वरा भानाम्" इति उक्तत्वरीसोक्तस्या मित्रदेवताकत्वम् । तस्य च योगतारा "ज्येष्ठाश्रवणमैत्राणां वाईस्पत्यस्य मध्यमा" इति सूर्य्यसि० उक्तेर्मध्यमा तारा । तत्र भव अणो लुक् "लुक्तद्धितलुकीति" पा० स्त्रीप्रत्ययस्य लुक् । अनुराधसञ्जाते त्रि० । नक्षत्रेण युक्तः काल इत्यणस्तु लुप् "लुपि युक्तवद्व्यक्तिवचनमिति" पा० अनुराधा अनुराधानक्षत्रयुक्तकाले तत्र सप्तम्यर्थे तृतीयेति भेदः । पृ० दीर्घः । अनूराधाप्यत्र ।

अनुरुद्ध–त्रि अनु+रुध–कर्म्मणि क्त । अपेक्षिते ।

अनुरुध् त्रि०अनु+रुध–क्विप् । अनुरोद्धरि अपेक्षके । कर्मणि क्विपि भेदे उपसर्गदीर्घ । अनुरुद्धे । "आचितपूर्व्वास्परा अनूरुद्ध ऋ० २,५५,५, "अनूरुद्ध अनुरुद्धमिति" भा० ।

अनुरूप अव्य० रूपस्य सादृश्ये योग्यत्वे वा अव्ययी० । रूपस्य सादृश्ये, योग्यतायाञ्च । अर्श आद्यच् । तद्वति त्रि० । "यथानुरूपाभिनिवेशतोषिणेति" कुमा० । "सत्त्वानुरूपा सर्व्वस्य श्रद्धा भवति भारत" गीता । द्वादशाहसाध्ये यागे वर्द्धिष्यमाणगतानां त्रयाणां तृचानां मध्ये मध्यमे तृचे । "स्तोत्रियानुरूपौ तृचौ भवत एवखल्वस्तृचा भवन्ति तत्र उत्तम पर्य्यास" इति ता०ब्रा० । प्राकृतानां वर्द्धिष्यमाणगतानां त्रयाणां तृचानां स्तोत्रिय, अनुरूप, पर्य्यासश्चेति त्रीणि नामानीति भा० ।

अनुरोध पु० अनु+रुध–घञ् । अनुसरणे, आराध्यादेरिष्टसम्पादनेच्छायाञ्च । "पितृश्चानुरोधेन द्विविध कृतमासनमिति" "नानुरोधोऽस्त्यनध्याये" इति च मनु ।

अनुरोधिन् त्रि०अनु+रुध–णिनि । अपेक्षके । स्त्रियां ङीप् । "पतिव्रतानां समयानुरोधिनीति" रामा० । (भीषणे ।

अनुलाप पु० अनुवीप्सायां वारंवारं लप्यते लप–घञ् । पुन-

अनुलिप्त त्रि० अनु+लिप–क्त । गन्धादिना कृतानुलेपे

"चन्दनागुरुकस्तूरीकुङ्कुमोशीरमिश्रितैः । सर्वाङ्गीणो भवत्याद्यः स्वरितेष्ट प्रलेपकीर्ति" इत्यत् ।

अनुलेप पु० अनु+लिप–भावे घञ् । चन्दनादिलेपने । करणे घञ् । अन्वेषणाभावे चन्दनादौ ।

अनुलेपक त्रि० अनुलिम्पति अनु+लिप–ण्वुल् । चन्दनादिभिः शरीरलेपनकारके । स्त्रियां टाप् । यथा सर्वां चन्दिमा अत् । अनुलेपिकम् अप्यर्थे त्रि० ।

अनुलेपन न० अनु+लिप–भावे ल्युट् । चन्दनादिलेपने "अनोलेपनं यथा दयान्त्यर्गन्धकारणादिति" इत्यत् । करणे ल्युट् । अन्वेषणाभावे चन्दनादौ द्रव्ये ।

अनुलेपित त्रि० अनु+लिप–णिच्–कर्मणि क्त । "अनुलिप्तौ

अनुलेपिन् त्रि० अनुलिम्पति अनु+लिप–णिनि । अनुलेपके

अनुलोम पु० यथाक्रमे लोमानि अत्यत्र । यथाक्रमे । "अनुलोमविलोमाभ्यां सा‍ङ्गस्यार्थाम् अनेकधा इति तन्त्र "अत अतिलोमानिलोमाद्युलोमविधि" इत्यत्र अत्र लोम आत्कलम् दीव अ‍ा प्रा च । अनु अनुसारे यथाक्रमत्वे च त्रि० "अपर्वानि इमानि सर्वाणि अनुलोमरूपा धारयन्ती" इति रिपुञ्जय अनुलोम अर्थं येन प्रतिलोमे कर्मणि त्रि यो । अनुलोमरूपे च । "अनुलोमेन हवीषि च प्रतिलोमेन दीक्षणम्" इति ।

अनुलोमज पु० स्त्री अनुलोमेन यथाक्रमेण जाता जन–ड । वर्णविशेषविवाहोत्पत्तौ निम्नाश्रित अनुलोमेभ्यो वर्णेभ्यो जाते मूर्धाभिषिक्ताद्यां सङ्कीर्णवर्णे । अनुलोमजाय "विप्रान् मूर्धाभिषिक्तो हि क्षत्रियायां विशःस्त्रियाम् । अम्बष्ठः शूद्र्यां निषादो जातः पारशवोऽपि वा" "क्षत्रात् शूद्रायामुग्रः स्यात् अनुलोमजास्" ... "शूद्रायां वैश्यात् करण शूद्रः निषादवैश्य विधि अत्र" इति च यान च ।

अनुलोमयमकम् इ० स्त्री अनुलोमं विलोमप्रतियमकेन अत अत्र । अनुलोमकवत् पूर्वनियमादौ । स्त्रियां टाप् । "अनोऽनुलोमयमकाः प्रतिलोमयमका अपीति" अत्रेति ।

अनुवंश पु० अनु वंशे विवाहकर्मे अनुगतौ । नीति प्रमाणे अत्र अत्र परिवहा अत् । अनुवंशजाताः कर्मे त्रि ।

अनुवक्र त्रि० अनुगतं वक्रम् कुटिलम् वक्रं अनुवक्रं गति अनु+वच अच् । इत्यत्र अनादिशालादिकरणादौ । स्त्रियां ङीप् ।

अनुवक्र त्रि० अनुगतमेव वक्रं । यतिविषये अस अभाव "अनिमिषा अयावध इति सर्वांशाकारवाद्याभिनवा ब्राह्मणत्वादिश्रुति भवति ।

अनुवचन न० अनु+वच–ल्युट् । पाठे अध्यापने "अर्थैव माणवकावितियद्वषिषि नैदानुवचनेन" इति शिक्षा अर्जुनविधावचनमिति" च श्रुतिः ।

अनुवत्सर पु० अनुकूलो वत्सरः वत्सराविशेषे । "अत्यनुवत् सङ्वत्सरे इवान्तर्वत्सरिदुवत्सरः । अन्वीवत्सरतृतीय प्रयोगवर्जिताय नवा" इत्युक्ते अनुवत्सरे । "संवत्सरे यथा दान परिवत्सरे अनुवत्सरम् । इदा दान यतनाद्य द्विगुणत्वम्" । इदावत्सरे च यथायोग्यं यत्सायाद्यम्यूर्वनी अनुवत्सरे दान दानाय पद्माय यावदिति" विष्णु इत्यत् । अनुवत्सरपक्षीयम् ।

अनुवर्तन न० अनु+वृत–ल्युट् । अनुगमने अनुसरणे अनु-पदार्थ पूर्वसूत्रस्थपदस्योत्तरसूत्रेऽन्वयार्थमनुसरणे च ।

अनुवर्तिन् त्रि० अनु+वृत–णिनि । अनुगामिनि अनुयायिनि च स्त्रियां ङीप् । "मन्दोऽपि अत्र सर्वे अर्वांटनुवर्तिनी" इति राजा ।

अनुवाक पु० अनूच्यते अनु+वच–घञ् कुत्वम् । वाक्यस्य अभिविधेः अनुवचनाद्यनुप्रवृत्ते अध्यायात्मके ग्रन्थे वेदांशे । "अभिदिवाकरीयोऽनुवाकस्य वाचयस्व इत्येवि" काशी १० ९.२१ "अदाभ्यकिमनुवाकस्य वाचयतेति" वेददीप । "अध्यायाद्यनुवाकेषु वा त्रिवर्गध्याये व्यायाम अव अत्र वा अत । वैदादौ निदानो वा अनुवाको वा ।

अनुवाका स्त्री अनु+वच–घञ् टाप् । अभिधाने प्रपाठ्या अनुवाच्या देवताह्वानार्थे ऋचि । "पुरोऽनुवाक्या याज्या देवि अतु नै अयौ पुरोऽनुवाक्या अयाच्यादाप्रवृत्तो अनुवाक्या पुरोऽनुवाक्या इति वाक्येति वेददीप । "पुरोऽनुवाक्या याज्या च अतवेदि इन्द्र । पुरोऽनुवाक्या यज्ञाङ्गोपदेशात् अत तत्रात्रं अया अत अपनामि पुरोऽनुवाक्येऽनुगता इति वा ।

अनुवाच् पु० अनुवाच्यति अनु+वच णिच्–क्विप् । अनुवाचके अध्यापके ।

अनुवाचन न० अनु+वच–णिच्–ल्युट् । अध्यापने । अध्यापनकारण अनुज्ञ अ । अनुवाचनीय अध्यापनीये त्रि ।

अनुवात पु० अनुगतो वात । शिक्षादिदेशात् पूर्वादिदेशमागते वायौ "प्रतिवातेऽनुवाते च नासीत गुरुणा सहेति" मनु ।

अनुवाद पु० अनु+वद घञ् । विधिप्राप्तस्य यथार्थस्य कथने वेदे यथार्थविधेरत्युक्तेर्यथाऽऽह प्राप्तस्य दीपसु

दध्ना जुहोतीति वाक्येन पुनरनुवादेन दधिकरणकत्व-
मात्रं तत्र विधेयम्। तत्र होमस्यानुवाद एवमन्यत्राप्यूह्यम्
अनुवाद पूर्व्वस्येति का०४,२,१८, "य इच्छेत्त्वनेन वाक्येन
पौर्णमास्याममावस्याया वा विकृतीनामनुष्ठानमुच्यते तच्च
प्रवृत्तित प्रथममेव व्यत कारणात् य इच्छेदित्यनुवाद इति
तद्भा०। अनुवादश्च त्रिविध भूतार्थानुवाद स्तुत्यर्थानुवाद
गुणानुवादश्चेति। तत्र सदेव सौम्येदमग्र आसीदित्यादौ भूता-
र्थानुवाद। "वायुर्वै क्षेपिष्ठा देवतेत्यादौ, स्तुत्यर्थानुवाद।
वायव्य श्वेत छागमालभतेत्यादौ प्राप्ताया वायुदेवताया
स्तुत्यर्थत्वात् तस्य स्तुत्यर्थानुवादत्वम्। अग्निहोत्रं जुहोतीति
प्राप्तस्याग्निहोत्रहोमस्य गुणविधानार्थं प्रवृत्त दध्ना जुहो-
तीत्यादि गुणानुवाद। एवमन्यान्यप्युदाहार्य्याणि। अनु-
वादकथने। "क उत्तम श्लोकगुणानुवादात् पुमान् विर-
ज्येत विना पशुघ्नादिति" भाग० "सिद्धोपदेशे च "अनुवादे
चरणानामिति" पा०। "सिद्धोपदेशे" इति सि०कौ०।

अनुवादक त्रि० अनुवदति अनु+वद–ण्वुल्। अनुवादकारके
अनुवदनशीले च।

अनुवादिन् त्रि० अनुवदति अनु+वद–णिनि। अनुवादका-
रके, अनुवदनशीले, युक्तगीतानुवादिनि च स्त्रियां ङीप्।

अनुवाद्य त्रि० अनु+वद–ण्यत्। उद्देश्ये प्राप्तावपि किञ्चि-
द्विधानार्थमनुकीर्त्तनीये। "अनुवाद्यमनुक्त्वैव न विधेयमुदी-
रयेदिति वृद्धा तथा च। पर्वतो वह्निमानित्येव प्रयोक्तव्य।
वैपरीत्येन, तथा प्रयोगे तु आलङ्कारिकै वाक्यगतविधेया-
विमर्षदोषो भवतीति प्रतिपादितम् यथा "न्यक्कारो ह्यय-
मेव मे यदरय" इति वाक्ये अयमेव न्यक्कार इति प्रयोक्तव्ये
तद्वैपरीत्येन प्रयोगात्तथात्वम्। अतएव "वृद्धिरादैच्"
इति पा० सूत्रे आदैच् वृद्धिसंज्ञ स्यादित्यर्थके वृद्धेर्विधेय-
त्वेन पूर्व्वनिर्देशावश्यम्भावेऽपि वृद्धिशब्दस्य मङ्गलार्थत्वेन
प्राक्प्रयोगो भाष्यादौ समर्थित यथा "पूर्व्वोच्चारित" संज्ञी
परोच्चारित संज्ञेत्याश्रित्य "एतदेकमाचार्य्यस्य मङ्गलार्थं
मृष्यताम्। माङ्गलिक आचार्य्यो महत शास्त्रौघस्य मङ्गलार्थं
वृद्धिशब्दमादित प्रयुङ्क्ते। मङ्गलादीनि हि शास्त्राणि प्रथन्ते
वीरपुरुषकाणि च भवन्त्यायुष्मत्पुरुषाणि च अध्येतारश्च
वृद्धियुक्ता यथा स्युरित्यनेन"। "माङ्गलिको मङ्गल-
प्रयोजन। महतोऽर्थेन एकैक सूत्रं शास्त्रमिति शास्त्रौ-
घस्येत्युक्तम्। मङ्गलादीनीत्यादिना सप्रयोजन प्रोक्त-
प्रयोजनमप्युक्तम्। प्रथन्ते विस्तृतानि भवन्ति तेन समाप्ति-
रथाचितेति भा०उद्यो०।

अनुवासन न० अनु+वास–सौरभ्ये ल्युट्। धूपादिभि सुर-
भीकरणे, वैद्योक्ते स्नेहाद्यै वस्तिकर्म्मणि च। "द्विधा
वस्ति परिज्ञेयो निरूहश्चानुवासनम्। कषायाद्यैर्निरूह
स्यात् स्नेहाद्यैरनुवासनम्" इति वैद्यकम्। अनुवसति,
अनुवासर दीयते वा इ०। सुश्रुतोक्ते अनुवासनद्रव्ये पु०।
तत्र यथाप्रमाणगुणविहित स्नेहवस्तिविकल्पोऽनुवा-
सन पादावकृष्ट। अनुवसन्नपि न दुष्यत्यनुदिवस वा
दीयत इत्यनुवासन। तस्यापि विकल्पोऽर्द्धमात्राव-
कृष्टोऽपरिहार्य्यो मात्रावस्तिरिति"। "निरूह शोधनो
लेखी स्नेहनो बृंहणो मत। निरूहशोधितान् मार्गान्
सम्यक् स्नेहोऽनुगच्छति। अपेतसर्वदोषासु नाडीष्विव
वहज्जलम्। सर्वदोषहरश्चासौ शरीरस्य च जीवन।
तस्माद्धि शुद्धदेहस्य स्नेहवस्तिर्विधीयत" इति। "तत्रो-
न्मादभयशोकापिपासारोचकाजीर्णार्शपाण्डुरोगभ्रममदमूर्च्छा
च्छर्दि-कुष्ठ-मेहोदर-स्थौल्यश्वासकासकण्ठशोषशोफोपसृष्ट-
क्षतक्षीणचतुस्त्रिमासगर्भिणी दुर्बलाग्न्यसहा बालवृद्धौ
च वातरोगादृते क्षीणा नानुवास्या नास्थापयितव्या उदरी
च प्रमेही च कुष्ठी स्थूलश्च मानव। असाध्यता विकाराणा
स्यादेषामनुवासनात्" इति च सुश्रुतम्। अजादिवस्ति-
चर्म्मघनवस्त्रादिनिर्मितेन (पिच्कारीति) प्रसिद्धयन्त्रेण
धातुवैषम्यदोषनाशाय लिङ्गद्वारेण योनिद्वारेण वा दीय-
मान स्नेहादिद्रव्यमनुवासन इति वैद्यकप्रसिद्धि।
अधिक वस्तिकर्म्मशब्दे वक्ष्यते। अनुवासन प्रयोजनमस्य
अनुप्रवच० छ। अनुवासनीय अनुवासनहेतौ त्रि०।

अनुवासित त्रि० अनु–वास–क्त। सुरभीकृते, वस्तिकर्म्मणा
चिकित्सिते च।

अनुवास्य त्रि० अनु+वस–कर्म्मणि यत्। सुरभीकार्य्ये वस्ति-
कर्म्मणा चिकित्स्ये च। "अवश्य स्थापनीयाश्च नानु-
वास्या कथञ्चनेति" सुश्रुतम्।

अनुविधायिन् त्रि० अनु+विधत्ते अनु+वि+धा–णिनि।
यथाविधायिनि, अनुगते च। "गुणानां तदन्वयव्यति-
रेकानुविधायित्वमिति" सा०द०।

अनुविद्ध त्रि० अनु+व्यध–क्त। खचिते। "न सोऽस्ति
प्रत्ययो लोके य शब्दानुगमादृते। अनुविद्ध इवार्थो हि
सर्वं शब्देन भासते' इति वाक्यप०। "कीटानुविद्धरत्ना-
दिसाधारण्येन काव्यता। दुष्टेष्वपि मता यत्र रसाद्यनुगम
स्फुट' इति सा०द०। [वावन्त्याविति' भा०भी०प०।

अनुविन्ध्य पु० अवन्तिदेशीये नृपविशेषे "विन्ध्यानुविन्ध्या-

अनुवृत् त्रि० [illegible] अनु+वृत—क्विप् । [illegible]

अनुवृत्त त्रि० अनु+वृत—क्त । [illegible]

अनुवृत्ति स्त्री० अनु+वृत—क्तिन् । [illegible]

अनुवेध पु० अनु+विध—घञ् । [illegible]

अनुवेल न० [illegible]

अनुवेल्लित न० अनु+वेल्ल—क्त । [illegible]

अनुवेश पु० अनु+विश—घञ् । [illegible]

[illegible] त्रि० [illegible]

अनुव्य त्रि० [illegible]

[illegible]

अनुव्याख्यान न० [illegible]

अनुव्याहार पु० अनु+वि+आ+हृ—घञ् । [illegible]

अनुव्रजन न० अनु+व्रज+भावे ल्युट् । [illegible]

अनुव्रज्या स्त्री० अनु+व्रज—क्यप् । [illegible]

अनुव्रत त्रि० [illegible]

अनुशतिकादि पु० [illegible]

अनुशय पु० अनु+शीङ्—अच् । [illegible]

पञ्चसप्ताहमासत्र्यहार्द्धमासिकम् । बीजायोवाह्यरत्नस्त्रीदोह्यपुंसां परीक्षणम्" । बीजं व्रीह्यादिबीजम् । अयो लौहम् । वाह्यो बलीवर्द्दादि । रत्नं मुक्ताप्रवालादि । स्त्री दासी । दोह्यं महिष्यादि । पुमान् दासः । एषां बीजादीनां यथाक्रमेण दशाहादिकः परीक्षाकालो विशेषः । परीक्ष्यमाणे च बीजादौ यद्यसम्यग्बुद्ध्याऽनुशयो भवति तदा दशाहाभ्यन्तर एव क्रयनिवृत्तिः । न पुनरूर्द्ध्वमित्युपदेशप्रयोजनम् । यत्तु मनुवचनम् । "क्रीत्वा विक्रीय वा किञ्चित् यस्येहानुशयो भवेत् । सोऽन्तर्दशाहात् तद्द्रव्यं दद्याच्चैवाददीत वेति" । तदुक्तलौहादिव्यतिरिक्तोपभोगादिविनश्वरगृहक्षेत्रयानशयनासनादिविषयम् । एवञ्चैतदपरीक्षितक्रीतविषयम् । यत् पुनः परीक्षितं पुनः प्रत्यर्पणीयमिति समयं कृत्वा क्रीतं तद्विक्रेत्रे न प्रत्यर्पणीयम् तदुक्तम् । "क्रेता पण्यं परीक्षेत प्राक् स्वयं गुणदोषतः । परीक्ष्याभिमतं क्रीतं विक्रेतुर्न भवेत् पुनरिति" मिता० । तच्च क्रीतस्य, विक्रीतस्य, अन्यथा वा कृतस्य वस्तुनः, असमीचीनत्वबुद्ध्या यः पश्चात्तापः सोऽनुशय इति बोध्यम् । भुक्तकर्मणोऽवशेषे च "कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवमिति" शा० सू० स्वर्गार्थकर्मणो भुक्तफलस्यावशेषः कश्चिदनुशयो नाम भाण्डानुसारिस्नेहवत् यथा हि स्नेहभाण्डं रिच्यमानं न सर्वात्मना रिच्यते भाण्डानुसार्य्येव कश्चित् स्नेहशेषोऽवतिष्ठते तथानुशयोऽपीति" भा० । "तत इष्टं मत्यञ्च श्रुतिः सा हि सानुशयानामेवावरोहं दर्शयति यथा "तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा अथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा सूकरयोनिं वा चाण्डालयोनिं वेति" । चरणशब्दे नानुशय (शेष) उच्यते । इष्टादि जन्मनैव प्राग्भुक्ताव-शिष्टफलोपभोग गर्भितकर्मणः आकस्मिकस्यासम्भवात् अनुशयसद्भावं सूचयति अभ्युदयप्रत्यवाययोः सुकृतदुष्कृतहेतुकत्वं सामान्यतः शास्त्रैकसमधिगम्यत्वादिति च शा॰भा० ।

अनुशयाना स्त्री अनु+शीङ्—शानच् । परकीयनायिकाभेदे । तद्विवरणं नायिकाशब्दे दृश्यम् । अनुतापकर्त्तरि त्रि० ।

अनुशयिन् पु० अनु+शीङ्—इनि । यावत्कर्मक्षयं चन्द्रलोके स्थित्वा शेषशेषे एव कर्म्मणि पश्चात्तापान्वितया भूमिलोके सम्पदप्रायागन्तु प्रवृत्ते जीवे । "यो यो ह्ययमन्ति मैर्यायिभि तदयेन भावितत्वात् सम्बन्धत्वाच्च संश्लिष्ट-रेत सिगिति" छा०भा० । तस्य रेतःसिगाकृत्या पूर्व्व-सम्भूतत्वात् तद्रूपेण गर्भाशयमनुप्रविष्टोऽनुशयी रेतःसिगा-कृतिर्भवतीति आनन्द० । पश्चात्तापयुते त्रि० । गुणस्य अनुशयत एव भुक्तभोगाया प्रकृतेस्त्याग स्मृतावप्युक्तः । "अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः । अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्त-भोगामजोऽन्य इति "स सपद्य जहात्यजामनुशयी सुप्त कुलाय यथेति" भाग० ।

अनुशयी स्त्री अनुशय्यते पश्चात्तप्यतेऽस्याम् । अनु+शीङ्—अधिकरणे अच् गौरा० ङीप् । पादरोगभेदे, "हरेदनुशयी वैद्यः क्रियया श्लेष्मविद्रधेरिति" भावप्रकाशः ।

अनुशर पु० अनुशृणाति अनु+शॄ—कर्त्तरि—अच् । राक्षसे ।

अनुशासन न० अनुशिष्यते याथार्थ्येन निरूप्यते अनु+शास—भावे ल्युट् । याथार्थ्यख्यापने, निरूपणे, कर्त्तव्योपदेशे च । "एषे देवे प्रतिघाते पञ्चक शतमर्हति । अपकृते तद्द्वि-गुणं तन्मनोरनुशासनमिति" मनुः अनुशासनविरोधादिति छन्दः । करणे ल्युट् । तत्प्रतिपादके शास्त्रे यथा "अथ शब्दानुशासनम्" । "अनुशिष्यन्तेऽसाधुशब्देभ्यो विविच्य बोध्यन्तेऽनेनेति करणल्युडन्ततया शास्त्रपदेन सामानाधि-करण्यमिति भाष्यप्रदीपोद्द्योतः । "अथशब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यमिति भाष्यम्" । "अथ योगा-नुशासनमिति" पातञ्जलसूत्रम् योगोऽनुशिष्यतेऽनेन तादृशं शास्त्रमधिकृतमिति तदर्थः अत्रयत्र अथशब्दस्याधिकारार्थ-त्वात्तथात्वम् "नामलिङ्गानुशासनमित्यमरः" अनुशासन सभामहापर्व प्रयोजनमस्य ठक् आनुशासनिकम् । महा-भारतान्तर्गतानुशासनपर्व्वणि ।

अनुशासित् त्रि० अनुशास्ति याथार्थ्येन कर्त्तव्यमुपदिशति अनु+शास—तृच । कर्त्तव्योपदेशके । स्त्रियां ङीप् । औणा०तन् । अनुशास्तापि तत्रार्थे त्रि० स्त्रियां ङीप् ।

अनुशासिन् त्रि० अनु+शास—णिनि । कर्त्तव्योपदेशके दण्ड-यितरि च "एषस्ते मानुशासी राजेति" विक्र० ।

अनुशिष्ट त्रि० अनु+शास—कर्म्मणि क्त । कृतानुशासने, यस्य हितोपदेश क्रियते तस्मिन्, दण्डिते च ।

अनुशीत अव्य० शीते विभ० अव्ययी० । शीते इत्यर्थे, पार-सुखा० भवादौ ञ्य । आनुशीत्य तत्रभवादौ त्रि० ।

अनुशीलन न० अनुक्षणं शीलनं प्रा०स० । सततमभ्यासे अनुक्षणाचरणे "आनुकूल्येन कृष्णानुशीलनं भक्तिरुच्य-तेति" भक्तिरसा० कृष्णस्य तद्गुणकीर्त्तनस्यानुशीलनं तदर्थः

अनुयोग पु० अनु+युज घञ्। [illegible] अनुयोजने।

अनुयोजन न० अनु+युज-ल्युट्। अनुयोगे। "[illegible]" [illegible]

अनुयोजनीय त्रि० [illegible] अनु+युज-अनीयर् [illegible]

अनुयो(यु)जित न० अनु+युज-भावे क्त [illegible]

[illegible] त्रि० [illegible]

[illegible]

अनुरञ्जिन् त्रि० [illegible] अनु+रञ्ज णिनि। [illegible]

[illegible]

अनुविद्ध त्रि० अनु+विध-क्त। [illegible]

अनुवेधन न० अनु+विध-भावे ल्युट्। [illegible]

अनुमति स्त्री० अनु+मन-क्तिन्। [illegible] ८९८ [illegible]

[illegible]

[illegible]

स्तोयमनुष्टुभिति" स काम्या० सर्वानुक्र० "शुचिमनुष्णिहा माध्यमनुष्टभेति" यजु० ।

अनुष्ठ त्रि० अनुक्रमेण तिष्ठति अनु+स्था—क पत्वम् । अनुक्रमेण स्थातरि "स्थिता विश्वा अनुष्ठा प्रवणेषु जिघ्नते इति ऋ० १,५४,१०, अनुष्ठा अनुक्रमेण तिष्ठन्तीरिति भाष्यम् । भावे अङ टाप् । अनुष्ठाने स्त्री ।

अनुष्ठातृ त्रि० अनु+स्था—तृच् स्त्रियां ङीप् । विधानकर्त्तरि "नाकृतेर्यित फलमनुष्ठातरीति" न्यायवाक्यम् ।

अनुष्ठान न० अनु+स्था—भावे ल्युट् पत्वम् । विहितकर्मादिकरणे । अलब्धलाभादिकमभिधाय "एतच्चतुर्विधं विद्यात् पुरुषार्थप्रयोजनम् । अस्य नित्यमनुष्ठानं सम्यक् कुर्यादतन्द्रित"इति मनुराह स्म "उपरुध्यते तपोऽनुष्ठानम्" शकु० ।

अनुष्ठित त्रि० अनु+स्था—कर्मणि क्त । विधानेन कृते धर्मशास्त्रादौ "अस्माभिर्यदनुष्ठेयं गन्धर्वैस्तदनुष्ठितमिति" भा० व०प० ।

अनुष्ठु अव्य० अनु+स्था—कु । सम्यगित्यर्थे "पार्थिवानामृतून् प्रासार्वाहदधावनुष्टु इति ऋ० १,६५,२ अनुष्ठु इत्येतदव्ययं सम्यक्समानार्थं पुनः यथेति भा० ।

अनुष्ठेय त्रि० अनु+स्था—कर्मणि यत् । विधेये । "अस्माभिर्यदनुष्ठेयं गन्धर्वैस्तदनुष्ठितमिति भा०व०प० ।

अनुष्ण त्रि० न उष्ण न०त० । उष्णभिन्ने शीतपदार्थे "अनुष्णाभिरफेनाभिरद्भिस्तीर्थेन धर्मवित्" इति मनु । न उष्ण विरोधे न०त० । अलसे । अलसो हि शीतबाधाभावेऽपि शीतबाधामभिनयन् कर्त्तव्यकर्मणि जड इव भवति दक्षस्तु शीतेऽपि तदगणयित्वा कर्त्तव्यकरणाय अजड इव सन् व्याप्रियते इति तयोरुक्तार्थता । अत कारिणार्थे कनि अनुष्णकोऽप्यत्र । उत्पले न० । उष्णभिन्ने शीतले स्पर्शे पु० "अनुष्णाशीतपाकज" इति भाषा० । अनुष्ण स्पर्शश्च पृथिवीसमीरणयोः, तयोरौष्ण्योपलब्धिस्तु तेज संयोगविशेषादिति बोध्यम् ।

अनुष्णगु पु० अनुष्णा शीतला गाव किरणा अस्य । चन्द्रे अनुष्णकिरणादयोऽप्यत्र पु० ।

अनुष्णवल्लिका स्त्री अनुष्णा शीतला वल्लीव स्वार्थे कनि टापि अत इत्वम् । नीलदूर्वायाम् ।

अनुसंवत्सर अव्य० संवत्सरे विभक्त्य० वीप्सायां वा अव्ययी० । वत्सरे इत्यर्थे प्रतिवर्षे च । तत्र भवादौ ठञ् अनुशतिका० उभयपदवृद्धि । आनुसांवत्सरिक प्रतिवर्षभवे त्रि० ।

अनुसंवरण न० अनु+सम्+वृ—ल्युट् । अनुक्रमेण गोपने । अनुसंवरणाय हितम् ठञ् अनुशतिका० द्विपदवृद्धि । आनुसांवरणिक तद्धेतादौ त्रि० ।

अनुसंहित त्रि० अनु+सम्+धा—कर्मणि क्त । कृतानुसन्धाने यस्य प्रामाण्यमन्वेषणादिकम् क्रियते तस्मिन् । संहितायाः विभ० अव्ययी० । संहितायामित्यर्थे । "अर्घर्के प्राङ्गरनुसंहितमिति ऋग्वेदप्रातिशाख्यम् ।

अनुसन्तति स्त्री अनुक्रमेण सन्तति । अविच्छेदधारायाम "अनुसन्ततिपातिन पटल्यैर्गति माघ ।

अनुसन्धान न० अनु+सम्+धाञ्—ल्युट । अन्वेषणे चिन्तने च

अनुसन्धेय त्रि० अनु+सम्+धा कर्मणि अर्हार्थे वा यत् । अनुसन्धातुं योग्ये, अनुसन्धातव्ये च ।

अनुसर त्रि० अनुसरति पश्चाद् गच्छति । अनु+सृ—ट स्त्रियां ङीप् । अनुचरे सहगन्तरि च ।

अनुसरण न० अनु+सृ—ल्युट् । अनुगमने, स्वीकरणे च ।

अनुसवन अव्य० सवनस्य पश्चात् अव्ययी० । सवनस्य (स्नानस्य) पश्चात् सवने, "अनुसवनमेनमाश्रमैरन्वितिति का० २५, १२, २६, एन ज्वराद्यभिभूत दौजिस सर्वे ऋत्विज स्वमान्तेषु सुश्रेयुरिति तद्व्याख्या ।

अनुसाय अव्य० साये विभ० अव्ययी० । सायाह्न इत्यर्थे तत्रभव पारिमुखा० ञ्य । आनुसाय्य तत्रभवे त्रि० ।

अनुसार पु० अनु+सृ—घञ् । अनुसरणे, "धर्मशास्त्रानुसारेण क्रोधलोभविवर्जित " इति या० स्मृति । "कृतानुसारादधिका व्यातारक्ता न सिध्यतीति" मनु ।

अनुसारणा स्त्री अनु+सृ+णिच्—युच सारणा अनगत्य सारणा चालना । अनुधावने, अपसारणायाम्, भीतिहेतोरनुधावने हि भीतस्य चालना भवतीति तस्य सरणाद्धेतुत्वम् "तस्मात् पलायमानानां कुर्यान्नात्यनुसारणम् भा०शा०प० ।

अनुसारिन् त्रि० अनुसरति पश्चाद् गच्छति अनु+सृ—णिनि । अनुगन्तरि । "कृष्णसारे ददच्चक्षुस्त्वयि चाधिज्यकार्मुके । मृगानुसारिणं साक्षात् पश्यामीव पिनाकिनमिति शकु० । "यदा यदा सतां हानिर्वेदमार्गानुसारिणामिति' पुरा० ।

अनुसूया स्त्री अनुसूयते अनु+सू—क्यप् । शकुन्तलासहचरीभेदे शकु० । अनसूयेत्येके ।

अनुसृति स्त्री अनु+सृ—क्तिन् । अनुसरणे । अनुसरति कुलान्तरं भर्त्तार पश्चात् क्विप् । कुलटायां स्त्रियां, स्त्री । तस्या अपत्य मतान्तरे कल्याण्यादि० ढक् इनङ् च । आनुसृतिनेय तदपत्ये पु०स्त्री० ।

अनुसृष्टि स्त्री अनु+सृज—क्तिन् । अनुसर्जने । कर्त्तरि सप्तम्या

अनूप त्रि॰ अनुगता आपो यत्र ७त॰ अच्समास॰ अतउत्वम्। जलप्राये स्थाने। "शकट शाकिनी गावो जालमस्यन्दनं वनम्। अनूपं पर्वतो राजा दुर्भिक्षे नव वृत्तयः" इति आह्नि॰ त॰ छागलेय। तत्स्थे सर्वदावासिनि महिषे पु॰। "मदस्युतं छपस्य यातसर्ग मयान्वित। देशोऽनूप इति ख्यातः" इत्युक्ते "अनूपसर" इति प्रसिद्धे देशभेदे पु॰। "अनूपराजस्य गुणैरनूनामिति" रघु।

अनूपज न॰ अनूपे जलप्राये देशे जायते जन—ड ७त॰। (आदा) इति ख्याते आर्द्रके, तस्य जलप्रायोद्भवत्वात्तथात्वम्। तत्स्थानजातमात्रे त्रि॰।

अनूप्य त्रि॰ अनूपदेशे भवः यत्। अनुगतजलदेशभवे "यश्च आपो धन्वन्याः यश्च अनूप्याः" इति स्नानमन्त्र।

अनूबन्ध्य त्रि॰ अनु+बन्ध–ण्यत् उप॰ दीर्घः। बधाय बन्धनीये यज्ञिये पशौ, "वशामनूबन्ध्यामालभेत" इति शत॰ २,४,४,१४, "अनुबन्ध्येष्टेति" आश्व॰। [याजार्थे।

अनूयाज पु॰ अनु+यज घञ् उपसर्गस्य वा दीर्घः। अनु-

अनूरु पु॰ न स्त ऊरू अस्य ब॰। सूर्य्यसारथौ विनतायास्तत्सुते अरुणे। तस्य अपूर्णे एव गर्भे माता अण्डस्य स्फोटनादूरुप्रभृत्यङ्गाद्यकत्वत्वम् तत्कथा भा॰ आ॰ शि॰। यथा "तत पुत्रार्थिनी देवी व्रीडिता च तपस्विनी। अण्डं बिभेद विनता तत्र पुत्रमपश्यत। पूर्वार्द्धकायसम्पन्नमितरेणाप्रकाशता। स पुत्रः क्रोधसंरब्धः शशापैनामिति श्रुति। योऽहमेवं कृतो मातस्त्वया लोभपरीतया, शरीरेणासमग्रोऽद्य तस्माद्दासी भविष्यसि। पञ्चवर्षशतान्यस्या यया विस्पर्द्धसे सह। एष च ते सुतो मातर्दासीत्वान्मोचयिष्यति। यद्येनमपि मातस्त्वं मामिवाण्डविभेदनात्। न करिष्यस्यनङ्गं वा व्यङ्गं वापि यशस्विनम्। प्रतिपालयितव्यस्ते जन्मकालोऽस्य धीरया। विशिष्टबलमीप्सन्त्या पञ्चवर्षशतात्परः। एवं शप्त्वा तत सुतो विनतामन्तरीक्षग। अरुणो दृश्यते ह्यस्मान् प्रभातसमये सदा। आदित्यरथमध्यास्ते सारथ्यं समकल्पयदिति"। 'गततिरस्तीमनूरुसारथेरिति" माघः। [तत्कथाऽत्रपदद्रष्टा।

अनूरुसारथि पु॰ अनूरु सारथिः रथनियन्ता यस्य। सूर्य्ये

अनूराध त्रि॰ अनु+राध–घञ् उपस॰दी॰। अनुराधनीये "इन्द्र वयमनूराध हवामहे" इति अथ॰ १९,१५,२।

अनूच पु॰ नास्ति अध्यन्ततया ऋक् यस्य अच् समासान्त। ऋक्शून्ये अनुपनीते बालके। "अन्वचबद्धावाध्येतव्ये वेति" सि॰कौ॰। "यथा षण्ढोऽफलं दान तथा विप्रोऽनृचोऽफल" मनु। 'अनृच अनधीयान इति" कुल्लू॰। "अनृचो माणवक इति" मुग्धबोधम्। समासान्तविधेरनित्यत्वात् क्वचित् न अच्। "तेन सहस्रं हि सहस्राणामनृचा यत्र भुञ्जते इति" "तथानृचे हविर्दत्त्वा न दाता लभते फलमिति" च मनु। समासान्तपक्षे अनृचे इति विवक्षया सप्तमी, तदभावपक्षे चतुर्थीति भेद। अध्येतरीत्युक्ते "अनृक् सामीति" सि॰कौ॰। अजभावपक्षे विभाषया कप्। अनृक्क ऋक्शून्ये त्रि॰।

अनृजु त्रि॰ न ऋजु। शठे वक्रे कुटिले च। "न पाणिपादचपलो न नेत्रचपलोऽनृजुः" इति मनु, "या आतुरस्यानृजोर्मर्त्यस्येति" ऋ॰४,३,१३। "लग्नात् पापाढ्यस्त्वनृजु व्ययार्थस्थौ यदा तदा। कर्त्तरी नाम सा ज्ञेया मृत्युदारिद्र्यशोकदेति" मुहूर्त्तचि॰। ऋजुमार्गगामी पूर्वगति, अनृजु वक्री पश्चाद्गतिरिति तदर्थः।

अनृण त्रि॰ न ऋणं यस्य। ऋणशून्ये। ऋणञ्च अवश्यदेयम् तच्च उत्तमर्णाय दातव्यत्वेन स्वीकृत धनम्। तच्चावश्यशोध्य तदशोधने "ऋणानामनपक्रियेत्युक्तेरुपपातक भवति। अवश्यशोध्यत्वेन तत्सदृशम् वेदाध्ययनादिकमपि ऋणशब्देन व्यवह्रियते "जायमानो वै पुरुषस्त्रिभिर्ऋणैर्ऋणी भवति स्वाध्यायेन ऋषिभ्य, यज्ञेन देवेभ्य प्रजया पितृभ्य" इति श्रुति एवञ्च वेदाध्ययनादिना ऋष्यादीनामृणशोधने अनृणो भवतीति ऋष्यादौ प्रसिद्धम्। एवञ्च "ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेदिति" ऋणशून्यस्यैव मोक्षाधिकारः। अतएव मनुना "दशलक्षणक धर्ममनुतिष्ठन् समाहित। वेदान्त विधिवच्छ्रुत्वा सन्यसेदनृणो द्विज" इति अनृणस्यैव सन्यासोऽभिहित। "ज्येष्ठेन जातमात्रेण पुत्री भवति मानव। पितॄणामनृणश्चैव स तस्मात् सर्व्वमर्हतीति" मनु। "एष वा अनृणः य पुत्रीति' श्रुति। कृतोपकारस्य प्रत्युपकारोऽपि ऋणत्वेन स्वीक्रियते। तदभिप्रायेणैव "प्रायोऽर्थमरण्यमीतेरनृणं कराटवत्तिभिरिति" रघौ वर्णितम्।

अनृणिन् त्रि॰ न ऋणी स्त्रियां ङीप्। ऋणिभिन्ने "दिवसस्याष्टमे भागे शाकं पचति यो नर। अनृणी चाप्रवासी च स वारिचर! मोदते, इति भा॰व॰प॰। 'एकमप्यक्षरं यस्तु गुरु शिष्ये निवेदयेत्। पृथिव्यां नास्ति तद्द्रव्यं यद्दत्त्वा सोऽनृणी भवेदिति' पु॰।

अनृत न॰ न ऋतम्। सत्यभिन्ने मिथ्याभूते। "यद्वाहमभिदुद्रोह यद्वा शेप उतानृतमिति" ऋ॰१,२३,२२। "प्रियस्य

च्छेदगमे तु ताभ्यस्तदन्यवर्णोन्मितय प्रसाध्या । अन्योन्मितौ कुट्टविधेर्गुणाप्तो ते भाज्यतद्भाजकवर्णमाने ॥ अन्येऽपि भाज्ये यदि सन्ति वर्णास्तन्मानमिष्ट परिकल्प्य साध्यम् । विलोमकोत्थापनतोऽन्यवर्णमानानि भिन्न यदि मानमेवम् ॥ भूय कार्य्य कुट्टको ऽत्रान्त्यवर्ण तेनोत्थाप्योत्थापयेद्व्यस्तमाद्यात्" । "इदमनेकवर्णसमीकरण बीज यत्तोदाहरणे द्विवाद्योऽव्यक्तराशयो भवन्ति तेषा यावत्तावदादयो वर्णा मानेषु कल्प्यास्तत्र पूर्व्वाचार्य्यै कल्पिता यावत्तावत्, कालक, नीलक, पीतक, लोहितक, श्वेतक, चित्रक, कपिलक, पिङ्गलक, धूम्रक, पाटलक, शवलक, श्यामलक, मेचका, इत्यादि । अथ वा कादोन्यक्षराणि अव्यक्ताना सज्ञा असङ्करार्थ कल्प्या । अत प्राग्वदुद्देशकालापवर्द्धिनि कुर्वता गणकेन पक्षौ समौ कार्य्यौ पक्षा वा समा कार्या । तत स्वत्रावतारोऽय तयो समयोरनेकत्वात् पक्षादितरपक्षस्याद्य वर्ण शोधयेत्तदन्यवर्णान् रूपाणि च इतरपक्षाच्छोधयेत्तत आद्यवर्णशेषेणेतरपक्षे भक्ते भाजकवर्णोन्मिति । बहुषु पक्षेषु ययोर्ययोः साम्यमस्ति तयोरेव कृते सति अन्या उन्मितय स्यु । ततस्तासून्मितिषु एकवर्णोन्मितयो यद्यनेकधा भवन्ति ततस्तासां मध्ये द्वयोर्द्वयो समी कृतच्छेदगमेनाद्य वर्ण शोधयेदित्यादिनान्यवर्णोन्मितय स्यु । एव यावत्सम्भवस्ततोऽन्योन्मितौ भाज्यवर्णे योऽङ्क स भाज्यराशि, यो भाजके स भाजक, रूपाणि क्षेप, अत कुट्टकविधिना यो गुण उत्पद्यते तद्भाज्यवर्णमान, या लब्धिस्तद्भाजकवर्णमान, तयोर्मानयोरिष्टभाजकभाज्याविष्टेन वर्णेन गुणितौ क्षेपकौ कल्प्यौ । तत स्वस्वमानेन सक्षेपेण पूर्व्ववर्णोन्मितौ वर्णावुत्थाप्य स्वच्छेदेन हरणे यल्लभ्यते तत् पूर्व्ववर्णस्य मानम् । एव विलोमकोत्थापनतोऽन्यवर्णमानानि भवन्ति । यदि तु अन्योन्मितौ द्व्यादयो वर्णा भवन्ति तदा तेषामिष्टानि मानानि कृत्वा स्वस्वमानेनोत्थाप्य रूपेषु प्रक्षिप्य कुट्टक कार्य्य ।अथ यदि विलोमकोत्थापने क्रियमाणे पूर्व्ववर्णोन्मितौ तन्मितिर्भिन्ना लभ्यते तदा कुट्टकविधिना यो गुण उत्पद्यते स क्षेप स भाज्यवर्णमान तेनान्यवर्णमानेषु तु वर्णमुत्थाप्य पूर्व्वोन्मितिषु विलोमकोत्थापनप्रकारेणान्यवर्णमानानि साध्यानि । इह यस्य वर्णस्य यन्मानमागत व्यक्तमव्यक्त, व्यक्ताव्यक्त वा तस्य मानस्य व्यक्ताङ्केन गुणने कृते तद्वर्णाक्षरस्य निरसनपूर्व्वोत्थापनमुच्यते' तद्व्याख्या । उदाहरण तत्रैव दृश्यम् ।

अनेकविध त्रि॰ अनेका विधा प्रकारा यस्य । बहुप्रकारे "यत्रानेकविधमानन्त्यं तत्र स्यात्तत आनन्त्यं बलीय" इति मदि॰ ।

अनेकशस् अव्य॰ अनेक+वीप्सार्थे कारके शस् । अनेकवारार्थे "अनेकशो निर्ज्जितराजकस्त्वमिति" भट्टि ।

अनेकाग्र त्रि॰ न एकाग्र । शून्यहृदये एकाग्रताशून्ये

अनेकान्त त्रि॰ न एकान्तो नियमो अव्यभिचारो यत्र । अनियमे, अनिश्चितफलके च । व्यभिचारवति दुष्टहेतौ पु॰ । "अनेकान्तो विरुद्धश्चाप्यसिद्ध प्रतिपक्षित । कालात्ययापदिष्टश्च हेत्वाभासाश्च पञ्चधेति" भाषा॰ । स च त्रिविध "आद्य साधारणस्तु स्यादन्योऽसाधारणो मत । तथैवानुपसंहारी त्रिधाऽनैकान्तिको मत" इति भाषा॰ । एकान्तोऽस्त्यस्य प्रज्ञा॰ण । ऐकान्त न॰त॰ अनैकान्तोऽप्यत्र कचित् "भाषायाम् अनैकान्तो विरुद्ध श्चैवेति" पाठ । तथा च साधारणादित्रितयान्यान्यस्यानेकान्तत्वम् ।

अनेकान्तवादिन् पु॰ अस्ति नास्ति चेत्येकान्त न वद॰ति वद-णिनि ६त॰ । बौद्धभेदे । तस्य अस्तिनास्तिकायवादित्वेन तथात्व विवरणमर्हच्छब्दे दृश्यम् ।

अनेकार्थ त्रि॰ अनेके अर्था अभिधेया यस्य । नानार्थे शब्दे । यथा गवादय अक्षादयश्च । 'अनेकार्थस्य शब्दस्य सयोगाद्यैर्नियन्त्रिते । एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साभिधाश्रयेति' सा॰द॰। अयमाशय "सयोगश्च विभागश्च साहचर्य्य विरोधिता । अर्थ प्रकरण लिङ्ग शब्दस्यान्यस्य सन्निधि । सामर्थ्यमौचिती देश कालाद्युक्ति स्वराचक । शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतव" इति हर्य्युक्तेरनेकार्थशब्दाना सर्व्वत्र शक्तौ समानायां सत्या, सयोगादिरितरार्थबोधप्रतिरोधनेन विशेषार्थ एव स्थाप्यते । तद्भिन्नार्थस्य तु व्यञ्जनया बोध इत्यलङ्कारिकाणा मतम् । नवाश्च सयोगादय शक्त्या अन्यार्थोपस्थितौ प्रतिबन्धका । व्यञ्जना हत्त्या तदुपस्थापने तु न । 'अनेकार्थशब्देभ्य सर्वेषामर्थानामविशेषेणोपस्थितौ सत्यामपि संयोगादय अन्यशब्दविषयशाब्दबोधमात्र प्रतिबध्नन्ति मत व्यञ्जनाविषयमिति' रसगङ्गाधर । नैयायिकादयस्तु अनेकार्थशब्दाना 'क्वचिताच्छेटकलाभवलाभे तत्रैव शक्तिरन्यत्र लक्षणा तत्र सयोगादय अन्यार्थबोधन नैव प्रतिबध्नन्ति । तथा च सयोगादय सति तात्पर्य्ये, तद्विषयीभूतार्थविषयकस्मृति तज्जन्यान्वयबुद्धि च न प्रतिबध्नन्ति किन्तु तात्पर्य्यकालीनसाधका इत्यत व्यञ्जनाइत्यसिद्धेरिति सीधमुरिति भेद । अनेके क्रदा प्रयोजनानि

तत्र वस्तु वा। अनेकप्रयोजनवति त्रि॰ "अनेकार्थाभि-
योगे च शास्त्रप्रयोजनेऽपि" इति स्मृतिः। अर्थे।
गुणप्रयोगे इ॰ च॰।

अनेकाश्रित इ॰ अनेकैव आश्रितं यत्र। वैशेषिकमते
संयोगादिषु, द्वयाश्रयेण च। "संयोग विभागद्वित्वादि-
सत्त्वादिकमेकार्थः। हि अनेकाश्रयत्वादनेकाश्रिता गुणा"
इति भाषा "मिलिते यानि अनेकसंख्येयत्व आश्रितानीति"
वाच्या। तस्मात् एव अनेकत्वविशिष्टभिन्नत्वेऽपि गुणो
नैकाश्रिता। अपि च संयोगादय आश्रयं च तथा।
एतद्भेदाभावविशिष्टेषु वस्तुषु अपि नानात्वेऽपीति च तत्र सम-
स्तमिति भेदः।

अनेकशस् अ॰ अ इत्यस्। शब्दैकवचने शस्त्रपि। "अनेकशो
बन्धो भवति" इति देवीम॰। "रुधिरं भक्ष्य भयान-
मनुष्यदीर्घनिर्वृद्धं सर्वदा दृष्टदर्शनमिति भा॰। अनेक-
"भूत्वे त्रि॰ क्रियायां क्लीब्।

अनेडमूक त्रि॰ एडो बधिरो मूको वाक्शक्तिरहितः नास्ति
समासः इ॰ त॰। (कालाः बोबा) इति ख्याते नानावचन
वधिरमिश्रे शठे च। [प्रयत्ने समासे विशेषभाव।

अनेद्य त्रि॰ निदि कुत्सने कर्म नि॰ नद्योऽयुक्तो न॰ त॰।

अनेनस् त्रि॰ नास्ति अपराधबद्धो वा यस्य। अनपराधादि
रहिते "राजा अपराधेनात् दण्डनो न दयालुः" इति
भाग इ॰ वचनादिष्ट। "अनेनो गोयसो बाल
इति च॰ १।११७। "अनेना भारतीयं यथा जयतीति"
धाम्य "सामेना नमसा हर" इति ७,८६,४। "अनेना
बलाय इति भाष्यम्।

अनेमा इ॰ मी-वधिनु न इ॰। प्रमवे निरुक्तकारः।

अनेहस् इ॰ न हन्यते हन-असि प्रत्येतिकारेण। काले।
भी अमद्। अनेहा कालोऽप्योऽनेहापि"अमरः।
न हन्यते कर्मपि यति। अहिंसनीये त्रि॰। "अर्धं
कर्म देवा अनेहसमिति ऋ॰ १।२।१। "अनेहसं वैश-
वानरमिति भा॰। "सादितीयम् नमसे दृढमीं
अनेहसम् ऋ॰ १।४।४। "तथा वोऽद्ये वरुण मित्र
अनेह ऋ॰ ६।२।१।

अनैकाग्र्य न॰ एकाग्रस्य भावः ष्यञ् अभावे न॰ त॰। एका-
ग्रताभावे। न॰ ब॰। एकाग्रतारहिते त्रि॰। "अप्यसत्या
अनैकाग्र्ये अनैकाग्रमनसामपि" भाग॰।

अनैकान्त इ॰ अनेकान्तस्यार्थे। तत्र अनैकान्तिकत्वादिना अनै-
कान्तो हेत्वाभासः इति भाषा वाचस्पत्यम्।

अनैकान्तिक इ॰ एकान्तं नियतं व्याप्नोति एकान्त+ठञ्
एकान्तो नियतो व्याप्तिरूपसम्बन्धः स्तु वा नास्ति न॰ त॰।
अनेकान्तार्थत्वे अनेकान्तत्वेऽपि मतम् "विरुद्धाने-
कान्तो बह भासा। भेदान्विशो निविशनशीलत्व त्रि॰

अनैक्य न॰ न ऐक्यम् अभावे न॰ त॰। एकत्वाभावे।

अनैतिह्य त्रि॰ न ऐतिह्य यत्र। परम्पराप्रवादरहिते
प्रमाणभूते। "अनागतमनैतिह्य तत् प्रत्यक्षमनुमानं वा"
वा॰ भा॰ व॰।

अ(आ)नैपुण न॰ अनिपुणस्य भावः अण्‌ आनन्तर्ये
वा इति। अनिपुणत्वे। तत्र अ(आ)नैपुणस्य न॰।

अ(आ)नैश्वर्य न॰ अनीश्वरस्य भावः ष्यञ् वा इति।
अनीश्वरत्वे अनीशत्वे। नास्ति ऐश्वर्यं यस्य। अनैश्वर्य-
वैभवशून्ये त्रि॰।

अनो अव्य॰ अन+औ-डो। अभावार्थे। "अनो महाग्नो
भावी भवेत् अनो दर्शं भाषेत नीचकष्ठ:। अनो इ॰ च
इति भी इति च विक्षा भाषावृत्तिनिकटा।

अनोकह इ॰ अनः शकटस्य गतिं हन्ति प्रतिरोधं करोति
हन-ड देव। वृक्षे। "कथमनुपं करति दुर्जनो
महाभारतेऽनोकहमपि न तत्र।
"अदनुअनुकूलनोकहदायकम इति" भाग।

अनोदक त्रि॰ नास्ति उदकमुदकं यस्य गत। "वषर्तमनुज
मते। "यत्र हविमानपनोदकं वा" इति स्मृतिः।

अनौद्धत्य त्रि॰ न औद्धत्यं यस्य उद्+हन-ड न॰ त॰।
औद्धत्योद्धत्यगुणेन मते। "मानुषं प्रथम कुर्वी-
दार्दवचे च सर्वदा। अनौद्धत्यं तूष्णं भवानि निवी-
नमितिं" भार। औचित्य औचित्ये यथा क्रमम्।
अनौचित्ये त्रि॰।

अन् अदा॰ प॰ अक॰ सेट्। अनिति तं आनिति
इ॰ अनिति अनामि। विकरणे अन्यो इति भेद
"अनाति पुत्रदन्तानि इति श्रुति।

अन् दिवा॰ अनिति पर॰ इ॰ ह्यनम्।

अन् अदी अन्तो अन्ते अन्ती न दशा। अदनानि इ॰
अनिति वेद पर। अन्ति। विधि अन्त्य मो निकटि।
आशीर्-आन्यात्। अनिता-अन्ता। अनिष्यति-अन्ता॥
इ अन्त। लिङ् अनि। लुङ्-अन्ना अनिष्टम। नि+अन्ता-
न्ते। अन्ति अन्यते "अन्ति साम्निकोऽपि बोध्या-
नि" भाग। अन् अन्ता। अन्तु अन्तु। अन्यत-
वन्तं सामानिति"। वि। अनुवर्ति अनु। अनु"

नम्। "अन्यार्थधीकृत् व्यापृतिरञ्जनम्" का०प्र०। कर्त्तरि ल्यु। व्यञ्जना एकत्रार्थेऽन्यधीरेतुर्व्यञ्जना साभिधाश्रयेति" सा०द०।

अन्त न० अम–तन्। स्वरूपे, स्वभावे च। शेषे पु०न०। नाशे, सीमायां, निश्चये, शेषावयवे च पु०। निकटे, मनोहरे च त्रि०। तत्र स्वरूपे "मृदुलतान्तलतान्तमलोकयदिति" माघ। नाशे "पतत्यविरत वारि नृत्यन्ति शिखिनो मुदा। अद्य कान्त कृतान्तो वा दुःखस्यान्त करिष्यतीति" उद्भट। "वैरस्यान्त करिष्यति" रामा०। सीमायां "वनान्तपर्य्यन्तमुपेत्य सस्पृहमिति" नैष०। "कोदकान्तात् स्निग्धोऽनुगन्तव्य" इति श्रुति। सीमाऽवधि स च दैशिक कालिकश्च। तत्र दैशिक उक्तोदाहरणे कालिकस्तु। "पक्षान्ते निष्फला यात्रा मासान्ते मरण ध्रुवमिति" ज्योति०। "दयाहान्ते पुन क्रियेति" स्मृति शेषसीमायाम् "अस्तु वनान्ताहनितवञ्चारिणमिति" माघ। "दिगन्ते श्रूयन्ते मदमलिनगण्डा करटिन" इति भामिनी०। "गङ्गाप्रपातान्तविरूढशष्पमिति" रघु। शेषावयवे "नेत्रान्तमुद्वीक्षते" इति वेदान्त इत्यादि। निश्चये। "उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिरिति" गीता। उभयो सदसतोरित्यर्थ। निकटे अन्तपाल। स्वभावे गुहान्त। शेषे निशान्त।

अन्तःकरण न० कृ-करणे ल्युट् अन्तरभ्यन्तरस्थ करण, कर्म०, तद्वृत्तिपदार्थानां सुखादीनां करण ज्ञानसाधन ६त०वा। ज्ञानसुखादिसाधने आभ्यन्तरे मनोबुद्धिचित्तादिपदाभिलप्यमाने इन्द्रिये। तच्चान्त करणम् वेदान्तिमते चतुर्विधम्। "मनो बुद्धिरहङ्कारश्चित्त करणमान्तरम्। संशयो निश्चयो गर्व स्मरण विषया इमे" इत्युक्तकार्य्यभेदात्। अन्यत्र व्यक्तमुक्तम् "यदा तु सकल्पविकल्पकाद्य तदा भवेत्तन्मन इत्यभिख्यम्। स्याद्बुद्धिसज्ञ च यदा तु वेत्ति सुनिश्चित संशयरूपहीनम्। अनुसन्धानरूप तच्चित्तञ्च परिकीर्त्तितम्। अहङ्कृत्यात्मवृत्त्या तु तदहङ्कारतां गतमिति"। एतदनुसारेणैव शारदायामुक्तम् "अन्त करणमात्मन। मनोबुद्धिरहङ्कारश्चित्तञ्चेति प्रकीर्त्तितमिति"। तस्य च ज्ञानादिप्रत्यक्षकरणत्वादन्त करणत्वम्। तत्साधकमनुमानञ्चेत्थम् ज्ञानसुखादिप्रत्यक्ष सचाक्षुषेन्द्रियसापेक्ष प्रत्यक्षत्वात् रूपादिप्रत्यक्षवत्। नच चक्षुरादीनां तत्करणत्व सम्भवति रूपादित्वाभावादित्यन्त करणसिद्धिरिति नैयायिकादय। साङ्ख्यादयस्तु महत्तत्त्वापरपर्य्यायमेवान्त करणमङ्गीचक्रु। पञ्चतन्मात्रेभ्यो भूतेभ्यश्चाहङ्काररूपद्रव्यस्य सिद्धिमुक्त्वा "तेनाऽन्त करणस्येति" सा०सू० तत्सिद्धिरुक्ता तदनुमाने च भाष्ये एव प्रयोगादिक दर्शितम्। "अहङ्कारद्रव्य निश्चयवृत्तिमद्द्रव्योपादानक निश्चयकार्यद्रव्यत्वात् यन्नैव तन्नैव यथा पुरुषादिरिति। अत्राप्यय तर्क, सर्वोऽपि लोक पदार्थमादौ स्वरूपतो निश्चित्य पश्चादभिमन्यते अयमह, मयेद कर्त्तव्यमित्यादिरूपेणेति, तावत् सिद्धमेव। तत्राहङ्कारद्रव्यकारणाकाङ्क्षाया वृत्त्यो कार्यकारणभावेन तदाश्रययोरेव कार्यकारणभावो लाघवात् कल्प्यते कारणस्य वृत्तिलाभेन कार्यवृत्तिलाभस्यौत्सर्गिकत्वादिति। यद्यपि अन्त करणमेक तथापि वृत्तिभेदस्थावान्तरभेदमाश्रित्यान्त करणत्रये क्रम, कार्यकारणभावश्चोक्त योगोपयोगिश्रुतिस्मृतिपरिभाषानुसारादिति मन्तव्यम्। तदुक्त मात्स्ये। "अहमर्थोदयो योऽय चित्तात्मा वेदनात्मक। एतच्चित्तद्रुमस्यास्य बीज विद्धि महामते॥ एतस्मात् प्रथमोद्भिन्नादङ्कुरोऽभिनवाकृति। निश्चयात्मा निराकारो बुद्धिरित्यभिधीयते॥ अस्य बुद्ध्यभिधानस्य याङ्कुरस्य प्रपीनता। सङ्कल्परूपिणी तस्याश्चित्तचेतोमनोभिधा" इति। अहमर्थोऽन्त करणसामान्यम्। अत्र वाक्ये बीजाङ्कुरन्यायेनैकस्यैवान्त करणद्रव्यस्य वृत्तिमात्ररूपेण चित्ताद्यवस्थाभेदा क्रमिकास्त्रिविधा परिणामा उक्ता इति। साङ्ख्यशास्त्रे च चिन्तनावृत्तिकस्य चित्तस्य बुद्धावेवान्तर्भाव। अहङ्कारस्य चात्र वाक्ये बुद्धावन्तर्भाव" इति॥ कारिकायामपि "अन्त करण त्रिविध दशधा बाह्य त्रयस्य विषयाख्यमिति" त्रैविध्यमुक्त्वा "सान्त करणा बुद्धि सर्व विषयमवगाहते यस्मात्, तस्मात्त्रिविध करण द्वारि, द्वाराणि शेषाणीति" तत्त्रयस्यैव प्राधान्यमुक्तम्। एवञ्च पुरुषस्य सन्निधिमात्रादधिष्ठातृत्व गौण मुख्यमधिष्ठातृत्वन्तु अन्त करणस्यैव यथोक्तम् "अन्त करणस्य तदुज्ज्वलितत्वा-ल्लौहवदधिष्ठातृत्वम्" सा०सू०॥ "अन्त करणस्यानुपचरितमधिष्ठातृत्व सङ्कल्पादिद्वारक प्रत्येतव्यम्। नन्वधिष्ठातृत्व घटादिवदचेतनस्य न युक्त तत्राह। लौहवत् तदुज्ज्वलितत्वादिति। अन्त करण हि तप्तलौहवच्चेतनोज्ज्वलित भवति। अतस्तस्य चेतनायमानतयाधिष्ठातृत्व घटादिव्यावृत्तमुपपद्यत इत्यर्थ। नन्वेव चैतन्येनान्त करणस्योज्ज्वलने चिते सङ्गित्वमग्निवदेन स्यादिति चेन्न नित्योज्ज्वलचैतन्यस्य योगविशेषमात्रस्य सयोगविशेष,

[illegible]

[illegible]

इन्नाकार खरडम्बमूर्द्धज गल नाशने कुशल । द्विजदेव-यज्ञयोगप्रसक्तधी स्त्रीजितो मतिमान् ॥ षामीति (५) य कोऽतिविरूपदेह शयानुगामी खलु दुर्भगय । दाता महा-रम्भसमाप्तकार्य्यो गुणै शशस्यैव भवेत् समान" इहत्-संहितोक्तलक्षणादिभेदपञ्चकात् ।

अन्तःपुरिक त्रि० अन्तःपुरे नियुक्त ठक् सद्यापूर्व्वकविधे-रनियतत्वान्नवृद्धि । अन्तःपुराध्यक्षे कञ्चुक्यादौ "अस्मत्-प्रार्थनामन्तःपुरिकाभ्यो निवेदयेति" शकुन्तलो० ।

अन्तःपुष्प न० अन्तर्गत पुष्प स्त्रीरज । द्वादशवर्षादूर्द्धमभ्य-न्तरजाते स्त्रीणा रजसि । "वर्षेद्वादशकादूर्द्धं यदि पुष्प वहिर्नहि । अन्तःपुष्प भवत्येव पनसोदुम्बरादिवत्" । इति काश्यपसंहिता ।

अन्तःप्रकृति स्त्री अन्तर्वर्त्तिनी प्रकृति राज्याङ्गम् । राज्ञां सन्निकृष्टप्रकृतौ अमात्यादौ । "अन्तःप्रकृतिकोपन हि राज्ञा महद्व्यसनमिति" नीति० । [आत्मानुसन्धानपरे ।

अन्तःप्रज्ञ त्रि० अन्तः स्था प्रत्यक्तत्त्वविषयिणी प्रज्ञा यस्य ।

अन्तःप्रविष्ट त्रि० अन्तः करणे, मध्ये वा प्रविष्ट । हृदय-गते, अभ्यन्तरगते च । "अन्तःप्रविष्टकर्णपल्लवप्रतिबिम्बे-नेति" काद० ॥

अन्तःशरीर न० अन्तः स्थूलदेहमध्यस्थं शरीरम् । स्थूल-देहमध्यवर्त्तिनि वेदान्तमतसिद्धे सूक्ष्मशरीरे । तच्च "पञ्च-प्राणमनोबुद्धिदशेन्द्रियसमन्वितम् । अपञ्चीकृतभूतोत्थ सूक्ष्माङ्ग भोगसाधन"मित्युक्त सप्तदशावयवं भोगसाधन सूक्ष्ममङ्गम् । शरीरस्य मध्ये अव्ययी० । देहमध्ये इत्यर्थे अव्य० । अन्तर्देहादयोऽप्युक्तार्थयो । अन्तरेव देह । मनोरूपदेहे न० । [दु खदायके ।

अन्तःशल्य न० अन्तःकरणस्य शल्यमिव पीडकत्वात् । मनसो

अन्तःसंज्ञ त्रि० अन्तः अभ्यन्तरवर्त्तिनी कथनायोग्यत्वात् अप्र-काश्या सञ्ज्ञा चेतना यस्य । वृक्षादौ । ते च मनुना दर्शिता यथा "उद्भिज्जा स्थावरा सर्व्वे बीजकाण्डप्ररो-हिण । ओषध्य फलपाकान्ता बहुपुष्पफलोपगा । अपुष्पाः फलवन्तोये ते वनस्पतयः स्मृता । पुष्पिण फलिनश्चैव वृक्षास्तूभयत स्मृता । गुच्छगुल्म तु विविध तथैव तृणजातय, । बीजकाण्डरुहाण्येव प्रतानाः वल्ल्य एव च । तमसा बहुरूपेण वेष्टिता कर्म्महेतुना । अन्तः-सञ्ज्ञाभवन्त्येते सुखदु खसमन्विता" इति ।

अन्तःसत्त्वा स्त्री अन्तरभ्यन्तरे गर्भे सत्त्व प्राणी सारो वा यस्या यस्य वा इव० । गर्भिण्यां स्त्रियाम् । अन्तःसारे त्रि० ।

अन्तर्मुख त्रि० अन्तरात्मनि तदनुसन्धाने एव मुखं यस्य । आत्मानुसन्धानमात्रसुखे बाह्यसुखशून्ये । "योऽन्तः-सुखोऽन्तराराम इति" गीता । [मदस्राविणि हस्तिनि ।

अन्तःस्वेद पु० अन्तः स्वेदो मदस्यन्दन मदजल यस्य इव० ।

अन्तक पु० अन्तयति अन्त करोति अन्त+णिच्–ण्वुल् । मृत्यौ "व्याजेनापि कृता राजन् नो दर्शयति सान्तक-मिति" भार०पु० । देहिना स्वस्वकर्म्मानुसारेण विनाशनाय ईश्वरनियुक्ते यमाख्ये देवभेदे "कर्पपप्रभावान्नयि नान्तको-ऽपि प्रभु प्रहर्त्तुं किमुतान्यहिंस्रा" इति रघु । विनाश-कमात्रे त्रि० "क्रोधान्धस्तस्य तस्य स्वयमिह जगतामन्तक-स्यान्तकोऽहमिति" वेणी० । परमेश्वरे पु० तस्य सर्व्वभूताना प्रलये सहर्त्तृत्वात्तथात्वम्, "महोदधिशयोऽन्तक" इति विष्णुसह० ।

अन्तकर त्रि० अन्त नाश करोति कृ–ट उप०स० । नाश-कारके । "अहमन्तकरो नून ध्वान्तस्येव दिवाकर" इति भट्टि । स्त्रियां ङीप् ।

अन्तकरण त्रि० अन्त करोति नन्द्या० ल्यु । नाशकारके । "दूरतं समाश्रयश्चैव राजा राष्ट्राद्विवासयेत् । राज्यान्त-करणावेतौ द्वौ दोषौ पृथिवीक्षितामिति" मनु । भावे ल्युट् । नाशने न० ।

अन्तकर्म्मन् न० अन्तस्य नाशस्य परिच्छेदस्य वा कर्म्म उत्पाद-नम् । नाशने । "यो अन्तकर्म्मणि इति "पा०धातु० । अस्ने-र्नाशनार्थत्वात् सकर्म्मकत्वम् तेन "राघव । स शरैर्घोरैर्घोर रावणमाहवे" इत्यादौ षारयस्य कर्म्मता स्वेति स्वतेर्लोटो मध्यमैकवचनान्तरूपम् । परिच्छेदकरणे "अवासासीन्न वैयासकीमित्यादि ।

अन्तकारिन् त्रि० अन्त करोति कृ–णिनि ६त० । अन्त-कारके विनाशके । स्त्रियां ङीप् । ण्वुल् । अन्तकारको-ऽप्युक्तार्थे त्रि० । [ब्रह्म निर्वाणमृच्छतीति" गीता ।

अन्तकाल पु० ६त० । मृत्युकाले, "स्थित्वाऽस्यामन्तकालेऽपि

अन्तकृत् त्रि० अन्तं करोति कृ–क्विप् ६त० । विनाशके ।

अन्तग त्रि० अन्तं गच्छति गम–ड उप०स० । कार्य्यान्त-गामिनि, निरवशेषकार्य्यकारके, पारगामिनि, च "यत्नेन भोजयेच्छ्राद्धे बह्वृच वेदपारगम् । शाखान्तगमथाध्वर्य्यं छन्दोगं च समाप्तिकमिति" मनु । [गामिनि ।

अन्तचर त्रि० अन्ते शेषावधौ चरति चर–ट । कार्य्यादिशेष-

अन्ततस् अव्य० अन्त+सार्व्वविभक्तिकस्तसि । अन्तेन अन्ते अन्तादित्याद्यर्थे । तत्र तृतीयार्थे । "वैश्योऽन्तिं मासिता-

कुरङ्ग" इति । बहिरङ्गशास्त्रीयनिमित्तसमुदायमध्ये अन्तर्भूतानि अङ्गानि निमित्तानि यस्य । व्याकरणोक्ते परनित्यबहिरङ्गबाधके नैमित्तिककार्य्यभेदे, तद्बोधकशास्त्रे च । यथा यामयिनी कुले इत्यादौ "इकोऽचीति" पा०)नित्वमाप्त नुम बाधित्वा "नुमो म नुमके" इति पा० नुम । पूर्व्वं कृते तु नुमि अजन्तत्वाभावात् नुमो न स्यात् । ततश्च नुमुरूपकार्य्ये प्रत्ययस्यानुरूप निमित्तमपेक्षतेऽइति तद्बहिरङ्ग, नुमस्तु प्रकृतिमात्रसापेक्षत्वात् अन्तरङ्ग इति तस्य बहिरङ्ग निमित्तककार्य्यबाधकत्व योजम् । "परनित्यान्तरङ्गापवादा-नामुत्तरोत्तर बलीय इति" "असिद्ध बहिरङ्गमन्तरङ्गे" इति च परि॰सि॰को० । एतन्मूलिकैव "बहिरङ्गविधिभ्यस्तु अन्तरङ्गविधिर्बलीति"कारिका । अन्त आसन्नमङ्ग कर्म्म० । आरादुपकारके न० यथा मन्त्रब्राह्मणोक्तकारे श्रवणमनन निदिध्यासनानि, सम्प्रज्ञातसमाधौ च धारणादीनि तोषि अन्तरङ्गाणि । यमादयस्तु पञ्च बहिरङ्गाणि । तथा हि यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयइत्यष्टौ सम्प्रज्ञातसमाधेरङ्गानि तत्र यमादय बहिरङ्गाणि, प्रति-बन्धकस्य चित्तकायप्राणेन्द्रियमलस्य निवर्त्तनेन परम्परया उपकारकत्वात्, धारणादयस्तु सम्प्रज्ञातसमाधे समान-विषयतया साक्षात्सद्धेतोपकारकत्वादन्तरङ्गाणीति अत एव धारणादित्रयमभिधाय 'त्रयमन्तरङ्ग पूर्व्वेभ्य" इति पात०सूत्रे धारणादित्रयस्यान्तरङ्गत्वमुक्तम् । धारणादि-स्वरूपादि तत्तच्छब्दे वक्ष्यते । असम्प्रज्ञातसमाधौ तु सर्व्वा-ण्येव बहिरङ्गाणि असमानविषयत्वादिति बोध्यम् ।

अन्तरचक्र न० अन्तर मध्यवर्त्ति चक्रम् । तन्त्रोक्तेषु देह-स्थसुषुम्णामध्यस्थेषु मूलाधारादिषु षट्सु पद्माकारचक्रेषु । विवरण षट्चक्रशब्दे द्रष्टव्यम् । ६त० । आत्मीयसङ्घे न० ।

अन्तरज्ञ त्रि० अन्तर भेद विशेष जानाति ज्ञा—क ६त० । विशेषज्ञे "नान्तरज्ञा श्रियो जातु प्रियैरासां न भूयते" इति किरा० ।

अन्तरण न० अन्तर व्यवहित करोति अन्तर+णिच्—भावे ल्युट् । अन्तरितकरणे व्यवधापने, "हविरन्तरणे प्राक् प्रधानेज्याया" इति कात्या० २५,५,१५, "यदि नाम हविरन्तरित स्कन्नोतमेव, प्राक् प्रधानेज्याया स्कन्ना अन्याहरेत् हविषोऽन्तरण बहूनांमध्ये एकस्याव्यवधान-मिति" तद्भा० ।

अन्तरतम त्रि० अतिशयेन अन्तर सदृश, अत्यन्तसदृशे "स्थानेऽन्तरतम" इति पा० । सादृश्यञ्च "तुल्यास्यप्रयत्न-मिति" पा० सूत्रोक्तास्यागादिसाम्यम्, यथा ककारादीना ङकारादिषु तुल्यस्थानप्रयत्नत्वेन साम्यम् एव सकारस्य षकारे । आत्मीयतमे च ।

अन्तरतस् अव्य० सप्तम्यर्थे तसि । मध्ये इत्याद्यर्थे । "तम-न्तरत कृत्वा रावण वाक्यमब्रवीत्" इति रामा० ।

अन्तरदृश् पु० अन्तरे दृग् यस्य । अन्तरस्थे परमात्मानुसन्धा-यिनि । अन्तर भेद पश्यति दृश क्विप् ६त० । विभेदज्ञे त्रि० ।

अन्तरदेश पु०कर्म्म० । मध्यदेशे तद्विवरण मध्यदेशशब्दे द्रष्टव्यम् ।

अन्तरपु(पू)रुष पु० अन्तर मध्यवर्त्ती पुरुष वा दीर्घ । अन्तर्यामिनि परमेश्वरे । 'मन्यन्ते वै पापकृतो "न कश्चित् पश्यतीति न" । तांस्तु देवा प्रपश्यन्ति स्वस्यैवान्तर-पूरुष' इति मनु ।

अन्तरपूजा स्त्री ७त० तन्त्रोक्ते मन कल्पितोपचारेण पूजा-याम् तत्प्रकारस्तु अन्तर्यागशब्दे वक्ष्यते ।

अन्तरप्रभव पु० अन्तरेभ्यो भिन्नवर्णमातृपितृभ्य प्रभवति प्र+भू—अच् ५त० । सङ्कीर्णवर्णे मूर्द्धावसिक्तादौ । अन्तर-प्रभवाय द्विविधा अनुलोमजा, प्रतिलोमजाश्च तत्रोत्कृष्ट-वर्णात् अपकृष्टवर्णाया स्त्रिया जाता मूर्द्धावसिक्तादय अनुलोमजा, अपकृष्टवर्णात् उत्कृष्टवर्णाया स्त्रिया जाता प्रतिलोमजा सूतादय । "भगवन्! सर्व्ववर्णाना यथा-वदनुपूर्व्वश । अन्तरप्रभवानाञ्च धर्मान्नो वक्तुमर्हसीति' मनु । एतेषा भिन्नवर्णजातत्वात् अन्तरनामत्वमपि मनुना हि अनुलोमजान् प्रतिलोमजाश्च उक्त्वा 'तान-न्तरनाम्नस्तु मातृदोषात् प्रचक्षते इत्युक्तम् । अधिक वर्ण-सङ्करशब्दे वक्ष्यते ।

अन्तरय पु० अन्तमध्ये अय गमनम् इण्—अच् । मध्यगतौ व्यवधाने । स्युडन्तमप्यत्र न० । अन्तर याति या—क । देहमध्यस्थचित्तगते त्रि० ।

अन्तरशायिन् पु० अन्तरे शेते शी+णिनि । चित्तस्थे जीवे । तस्य तत्र प्रतिबिम्बरूपेण स्थितत्वात्तथात्वम् ।

अन्तरस्थ पु० अन्तरे देहमध्ये तिष्ठति स्था—क ७त० । देहमध्यस्थचित्तस्थे जीवे ।

अन्तरा अव्य० अन्तरेति इण्—डा । निकटे, मध्ये, विनार्थे च । तत्र मध्ये 'अन्तरा पतिते पिण्डे सन्देहे वा पुन-र्हरेदिति" या० । "अन्तरा स्तनस्तनके" इति स्मृति । "पशुमण्डूकमार्ज्जारश्वसर्पनकुलादिभि अन्तरा गमने विद्यादनध्यायमहर्निशमिति' मनु । "सौमित्रिर्भिर्गि-तैर्वाणैरन्तरा मकलीकृता" इति रघु । "अन्तरेण वीज-

[illegible] इति श्रुतेः। [illegible] "[illegible]" [illegible]

[illegible]

अमर[illegible] [illegible] "[illegible]"

अमर[illegible] [illegible]

[illegible]

अमर[illegible] [illegible] "[illegible]" [illegible] "[illegible]" इति [illegible]

[illegible]

अमर[illegible] [illegible] "[illegible]" इति [illegible]

अमर[illegible] [illegible] "[illegible]" इति [illegible]

अमर[illegible] [illegible]

अमर[illegible] [illegible] "[illegible]"

अमर[illegible] [illegible] "[illegible]" [illegible]

मित्युक्ते श्रुतौ। 'योऽन्तरे माकाश आसीदन्तरीक्षमभव दीक्ष ह वा इदम् तत् पुरान्तरा वा इदमीक्षमभूदिति' तस्मादन्तरीक्षमिति'।

अन्तरिक्षप्रा त्रि० अन्तरिक्षं प्राति पूरयति प्रा—पूरणे विच्। अन्तरिक्षपूरके "अन्तरिक्षप्रां तविषीभिरावृतमिति" ऋ० १,५१,२। "अन्तरिक्षं वायुरेव स्वतेजसा प्राति पूरयतीति" विष०, भा०।

अन्तरिक्षप्रुत् त्रि० अन्तरिक्षे प्रवते प्रुङ् गतौ क्विप्। अन्तरिक्षचरे "अन्तरिक्षप्रुद्भिरपोदकाभिरिति" ऋ० १,११६,३।

अन्तरिक्षसद् त्रि० अन्तरिक्षे सीदति गच्छति सद—गतौ क्विप्। आकाशचारिणि। "हंस शुचिषद्वसुरन्तरिक्षसदिति" ऋ० ४,४०,५। "अन्तरिक्षसद् अन्तरिक्षसद्मारीति' भा०।

अन्तरिक्षसद्य त्रि० अन्तरिक्षे सदनम् सद्म सद-भावे यत्। अन्तरिक्षसदने। "उपरि मद्य वा एष वायति यो जयत्यन्तरिक्षसद्यमिति" कौ० ब्राह्म०।

अन्तरिक्ष्य त्रि० अन्तरिक्षे भव यत्। अन्तरिक्षभवे। "पवतामन्तरिक्ष्या इति ऋ० ८,२६,५।

अन्तरित त्रि० अन्तर्-इण-कर्त्तरि क्त २त०। अन्तर्गते। अन्तरं व्यवधानं करोतीति णिचि कर्म्मणि क्त। व्यवधानं गते, व्यवधापिते, तिरस्कृते आच्छादिते, "द्विरेफवृन्दान्तरितं मरीचेरिति" किरा०। अपवारिते, "कृत्यात् यथास्थानकमन्तरं वेति" सीतावस्थापन्नस्य अन्तरशब्दस्य वियोजने प्रयोगात् तत्प्रकृतिकतया वियोजिते च।

अन्तरिन्द्रिय न० कर्म्म०। अन्तःकरणे।

अन्तरीक्ष न० अन्तरिक्षवत् सर्वम्। [इक्षे आकाशात्पतितजले

अन्तरीक्षजल न० अन्तरीक्षात् पतितं जलम् शा० त०। दिव्यो-

अन्तरीप पु० अन्तर्मध्ये गता आपोऽस्य ब० अच् समा० आत ईत्वम्। द्वीपभेदे। द्वीपस्य हि जलमध्यस्थत्वात् अन्तर्गतजलत्वात्तथात्वम् द्वयोस्तु भेदः चतुर्दिक्षु जलसत्त्वे तस्य अन्तरीपत्वम् द्वयोर्दिशोर्जलसत्त्वे द्वीपत्वमित्यनयोर्भेदः। काकाक्षिगोलकन्यायात् 'द्वीपोऽस्त्रियामन्तरीपमित्यत्रापि अस्त्रियामित्यस्य अन्वय इति तेनास्य पु स्त्री० इति केचित्।

अन्तरीय न० अन्तरे भव गहादित्वात् छ। "नाभौ धृतस्य वस्त्रस्याच्छादयति जानुनी। अन्तरीय प्रभस्य तद्-क्षिपथमयात्मयो" इत्येवलक्षणे परिधाने वस्त्रे। भवाद्यर्थे धूमा० वुञ्। आन्तरीयक तद्भवे त्रि०।

अन्तरे अव्य० अन्तरेति इण्—डे। मध्ये। 'आनन्दोऽथान्तरेऽन्तरा, अन्तरेण च मध्ये स्युरित्यमरः'।

अन्तरेण अव्य० अन्तरेति इण्-ण टवर्गादित्वेऽपि णस्य नेत्वम्। विनार्थे, मध्यार्थे च। तत्र विनार्थे "अन्तरेणाञ्जलिं बद्धा मत्पादपद्म प्रसादमिति' रामायणम्। मध्ये "अन्तरेण वै योनिं गर्भं सम्भवति" कौ० ब्रा०। "अन्तरेणापां गुणम् इति" स्मृति। तत्र विनार्थे, द्वितीयान्ततीये पर्यायेण, "श्रीमेघेन विना मधुमानन्तरेणाच्युत दृष्टमिति मु० बो०। उभयोर्मध्ये अपि द्वितीया "अन्तरेणाहवनीयं गार्हपत्यञ्चेति कौ० ब्रा०।

अन्तर्गडु त्रि० अन्तर्मध्ये गडुरिव निरर्थक। ग्रीवाप्रदेशे जातस्य गलमांसपिण्डस्य गडोर्यथा निरर्थकत्वम् तद्वत् निरर्थके। "किमनेनान्तर्गडुनेति सर्वदर्शन सं०। "अन्तर्गडु निरर्थकमिति मेदिनी।

अन्तर्गत त्रि० अन्तः अन्तःकरणे गत। अन्तःकरणस्थे देहस्थे च "अन्तर्गतं प्राणभृतां हि वेद' इति रघु। 'येषामन्तर्गतं पापं जनानां पुण्यकर्म्मणामिति' पुरा०। "अन्तर्गता मदनवह्निशिखावली या मा बाध्यते किमिह चन्दनचर्च्चितेनेति' उद्भट। मध्यान्तरस्थे च "अन्तर्गतगते ग्रामे एकमन्त्र च गतिधाविति'। "नेत्रवक्त्रविकारेण लक्ष्यतेऽन्तर्गतं मनः" इति च मनु। अन्तर्गतफलारम्भा सस्यानामिव सम्पद्" इति रघु।

अन्तर्गर्भ त्रि० अन्तरभ्यन्तरस्थो गर्भोऽस्य। अभ्यन्तरस्थगर्भयुक्ते। "कुशौ समावप्रच्छिन्नाग्रावनन्तर्गर्भाविति" कात्या० २,१,२१। गर्भस्य मध्यम् अव्ययी०। गर्भमध्ये अव्य०।

अन्तर्गर्भिन् त्रि० अन्तर्मध्ये गर्भोऽस्त्यस्य इनि। मध्यस्थगर्भयुक्ते। "अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव चेति" पवित्रलक्षणे कात्यायन स्मृति।

अन्तर्गृह न० अन्तःस्थं गृहम्। वाराणसीस्थे सप्तावरणवति स्थानविशेषे "अन्यस्थाने कृतं पापं वाराणस्यां विनश्यति। वाराणस्यां कृतं पापं पञ्चक्रोश्यां विनश्यति। पञ्चक्रोश्यां कृतं पापमन्तर्गृहे विनश्यति"॥ काशीमा०। अन्तर्गेहमप्यत्र "अन्यत्र यत्कृतं पापं तत्काश्यां परिणश्यति वाराणस्यां कृतं पापमन्तर्गेहे विनश्यति अन्तर्गेहे कृतं पापं पैशाच्यनरकावहमिति" "देवो विरजस पीठादन्तर्गेहं विशेष चेति" च काशी०। मध्यस्थगृहे च। गृहस्य मध्यम् अव्ययी० गृहस्य मध्ये अव्य०।

अन्तर्घण पु० अन्तर्हन्यते क्रीडीभवत्यस्मिन् अन्तर्+हन-अप्

[illegible]

अन्तर्भाव पु० अन्तर्मध्ये भाव प्रवेश । मध्यप्रवेशे समुदाय-मध्यपाते । “आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यते अन्तर्भावाच्च तेनासौ कर्मणा न सकर्मक” इति हरिका० स्वविषयकज्ञानविषयत्वे च भवति च वह्निमद्बोधविषयत्वा-द्वह्ने र्वह्निमदन्तर्भाव । अन्त स्थोभाव । चित्तवृत्तिभेदे ।

अन्तर्भावना स्त्री अन्त स्था व्यञ्जकचेष्टाकारादिरहिता भावना । व्यञ्जकचेष्टादिशून्ये चिन्तने ।

अन्तर्भावित त्रि० अन्तर्+भू–णिच्–क्त । मध्यप्रवेशिते समु-दायान्तर्भूतीकृते । “अन्तर्भावितसत्त्व चेत् कारण तदस-त्त्वत । नान्तर्भावितसत्त्व चेत् कारण तदसत्त्वत” इति खण्डनखण्डखाद्यम् । अव्यवहितपूर्ववर्त्तितया कार-णस्य यत् सत्त्वमङ्गीक्रियते तस्य सत्त्वमस्ति न वा तस्य सत्त्वस्वीकारे पुनस्तत्सत्त्वस्य सत्त्वस्वीकारेऽनवस्थापात: ततश्च उत्तरत्र एकस्य सत्त्वमनङ्गीकृत्यैव अनवस्था वारणीया तथाच कारणसत्त्वेऽपि कुत तथा नाङ्गीक्रियते । एव च विनापि सत्त्व, तदङ्गीकृत्य कारणतास्वीकारे न कोऽपि दोषोऽस्ति इति तदाशय ।

अन्तर्भूत त्रि० अन्तर्मध्ये भूत भू+क्त । मध्यस्थिते, अन्त-र्गते च । “कालभावाध्वदेशानामन्तर्भूतक्रियान्तरै । सर्वै-रकर्मकैर्योगे कर्मत्वमुपजायते” इति हरिका० “एष वै भगवान् विष्णुरन्तर्भूत सनातन” इति पुरा० ।

अन्तर्मनस् त्रि० अन्तर्गत बाह्यव्यापारशून्यतया अन्तरेव स्थित मनो यस्य । व्याकुलचित्ते, समाहितमनस्के च । दु खितस्य हि बाह्येतदितरव्यापारशून्यतया तत्प्रती कारचिन्तनायान्तरेव मनस स्थितत्वात् तथात्वम् समाधि-स्थस्य तु बाह्यविषयपरिहारेण ध्येयात्ममात्रगोचरमन-स्कतया तथात्वमिति भेद ।

अन्तर्मुख त्रि० अन्त परमात्मा मुख प्रवेशद्वार यस्य । बाह्य-वस्तुपरिहारेण परमात्मविषयकतया प्रवेशयुक्ते चित्तादौ । अन्तरभ्यन्तरे मुख यस्य । सुश्रुतोक्ते व्रणस्रावणसाधने शस्त्र भेदे न० । “सूचीकुशपत्राटीमुखशरारीमुखान्तर्मुखत्रिकू-र्चकानि विस्रावणे” इति सुश्रुतम् । अन्त करण अविद्या-दृतिरूप द्वार मुखानुभवे यस्य । स्वरूपसुखानुभवहेतुना अविद्यावृत्तिरूपान्त करणेन सुषुप्तौ आनन्दानुभवकारके प्राज्ञाख्ये जीवभेदे “आनन्दभुक् चेतोमुख प्राज्ञ” इति श्रुतौ प्राज्ञस्य आनन्दभोगे चेतोमुखत्वोक्त्या तथात्वम् । मुखस्य मध्यम् अव्ययी०। मुखस्य मध्ये इत्यर्थे अव्य० ।

अन्तर्मातृका स्त्री अन्त स्था षट्चक्रस्था मातृका अकारादि-वर्णा । तन्त्रोक्तेषु षट्चक्रस्थेषु अकारादिषु वर्णेषु । ते च वर्णा अन्तर्मातृकान्यासशब्देऽनुपद वक्ष्यन्ते ।

अन्तर्मातृकान्यास पु० अन्त स्थाया मातृकाया न्यास उच्चा-रणपूर्वक तत्तत्स्थानेषु न्यास । अन्तस्थमातृकावर्णाना स्मरणपूर्वक तत्तत्स्थानेषु न्यासे । यथा “न्यासोऽय-मान्तर” इत्युपक्रम्य “द्व्यष्टपत्राम्बुजे कण्ठे स्वरान् षोडश विन्यसेत् । द्वादशच्छदहृत्पद्मे कादीन् द्वादश विन्यसेत् । दशपत्राम्बुजे नाभौ डकारादींन्यसेद्दश । षट्पत्रमध्ये लिङ्गस्थे बकारादींन्यसेच्च षट । आधारे चतुरोवर्णान् न्यसेद्वादीन् चतुर्दले । हक्षौ भ्रूमध्यगे पद्मे द्विदले विन्यसेत् प्रिये । तन्मध्ये परबिन्दुञ्च सृष्टिस्थितिलयात्मकम् । एव समाहितमना ध्यायेन्न्यासोऽयमान्तर” इति तन्त्रसार ।

अन्तर्मृत पु० स्त्री अन्तर्गर्भाशये मृत । गर्भाशये मृते बालकादौ “भवत्युच्छ्वासपूतिश्च शूलं चान्तर्मृते शिशौ” इति सुश्रुतम् ।

अन्तर्य्य त्रि० अन्तरे भव दिगा०य । मध्यभवे ।

औपासन त्रि० उपास्यते प्रतिदिनमित्युपासनो गृह्योऽग्निस्तत्र भवः अण् । गृह्याग्नौ कर्त्तव्ये साय प्रात होमादौ कर्म्मणि । गृह्याग्निश्च विवाहाग्नि । तत्र कर्त्तव्य दर्शित "औपासनश्रुते" कात्या० १,१,२, "यदुक्तम् वैतानिकेष्वेवाग्निषु श्रौत स्मार्त्त च कर्त्तव्यमिति तन्न कुतः ? औपासनश्रुतेः यत आहिताग्नेरप्यौपासन श्रूयते पितृमेधे "अदारेऽप्यौपासनं निरस्यतीति" यदि स्मार्त्तमपि वैतानिकेष्वेव क्रियते तदा आहिताग्ने पितृमेधे औपासनदर्शन न स्यात् अस्ति च । तस्मात् स्मार्त्तान्यौपासने कर्त्तव्यानीति तथा च स्मृति 'स्मार्त्त कर्म्म विवाहाग्नौ कुर्व्वीत प्रत्यह गृही । दायकालाहृते वापि श्रौत वैतानिकाग्निषु इति" । "तस्मिन् गृह्याणीत्यापस्तम्बचरणाश्च" । अपाम दित गृह्यम् गृह्यश्रुच दम्पत्योर्वर्त्तते तस्मिन्नित्यावसथ्ये । अतश्च यत्किञ्चिद्दम्पत्योर्हित कर्म शान्तिक पौष्टिक व्रताङ्गहोमादिकं स्मार्त्त तत् सर्वमावसथ्येऽग्नौ भवतीति । तथा च खादिरगृह्यसूत्रकारिकायाम् "होमानामात्मार्थपत्न्यर्थान् कुर्य्यादौपासने न च । परार्थानेवेन्धेऽग्नौ स याज्ञे लौकिको भवेत्" अत एव कात्यायनः (कर्मप्रदीपे) "न स्वेऽग्नावन्यहोम स्यान्मुक्त्वैका समिदाहुतिम् । स्वकर्म्म सत्क्रियार्थस्य यावन्नासौ प्रजायते । अग्निस्तु नामधेयादौ होमे सर्व्वत्र लौकिक । न हि पित्रा समानीत पुत्रस्य भवति क्वचित्" । अतश्च सीमन्तोन्नयनमपि स्मार्त्ताग्नावेव कार्य्यम् । अपि च आधानेनोत्पादितानां गार्हपत्यादीनामग्नीनाम् प्रयोजनापेक्षायां सत्यां "गार्हपत्ये हवींषि श्रपयत्याहवनीये जुहोति दक्षिणाग्नावन्वाहार्य्यं पचतीति" प्रत्यक्षवचननिर्द्दिष्टैरेव प्रयोजनैर्निराकाङ्क्षाणाम् न सामर्थ्यमात्रेणोक्तादन्यत्र विनियोग कल्पयितु शक्यते । तस्मात् स्मार्त्तान्यौपासन एव कार्य्याणि इति" कर्क । विधानपा० तदारम्भकालादि निरूपितं यथा गृह्यपरिशिष्टे "अथ नित्यौपासन तस्य सायमारम्भ" इति । शौनकोऽपि "यस्मिन्नग्नौ विवाह स्यात्तमारभ्य तस्य तु । परिचर्य्या विवाहाग्नेर्विदधीत स्वय द्विज । यदि रात्रौ विवाहाग्निरुत्पन्न स्यात्तदा सति । उपक्रमोत्तर स्थाप्य साय परिचरेदमुमिति" । इदमपि ससाग्न्यातक्रमेणेदव्यम् । तथा चापस्तम्बसूत्रे भाष्यकृदुदर्शनाचार्य्य । "अस्यारम्भण रात्रावेव यदि सव मध्योनातीता । अतीताश्चेत् परेद्युः सायमेवाग्निहोत्रवेलायामारम्भ इति" । अन्यत्रापि । "प्रातर्होमे सङ्गवान्त कालस्त्वनुदिते ऽथ वा । सायमस्तमिते होम कालस्तु नवनाडिकेति" । अत्रानुदितहोमकालस्तु वाजसनेयिना वेदितव्य । तथा च कात्यायनसूत्रम् । "औपासनस्य परिचरणमस्तमितानुदितयोरिति" । तेषामौपासनसमारम्भोऽपि चतुर्थीहोमानन्तरमाहितेऽग्नौ भवति न तु विवाहाग्नौ "आवसथ्याधान दारकाले दायाद्यकाले वेति" कात्यायनसूत्रात् तद्भाष्यमपि । "दारकालश्चतुर्थीचरकाल । दायाद्यकालो धनविभागकाल इति" औपासनात्पूर्व्वं यदि विवाहाग्नि नश्येत तदा प्रायश्चित्तमुक्त निबन्धे "उद्वाहौपासनात् पूर्व्वं नष्टे शान्तिमागते । स्थालीपाक तत कृत्वा औपासनमथाचरेत् । नवनाडीभ्य ऊर्द्ध्व चेत्स्थालीपाकोभवेन्न वै । औपासने तदा कुर्य्यात् परेद्यु सायमेव चेति" । तस्य प्रादुष्करणकाल उक्त आश्वलायनसूत्रे "तस्याग्निहोत्रेण प्रादुष्करणहोमकालौ व्याख्याताविति" तत्कारिकायामपि । "ज्वालयेदपराह्णेऽग्निमस्त याते दिवाकरे । पर्य्युक्ष्याग्निं परिस्तीर्य्य पर्य्युक्ष्य च तत परमिति" । स एवाह कात्यायन । "सूर्य्ये तु शैलमप्राप्ते षड्भिर्वृक्षशिरोगते । प्रादुष्करणमग्नीनां प्रातरासोमदर्शनम्" । तथा "दुहित्रा स्नुषया वाग्निविहारो न विरुध्यते । निलेपनं च पात्राणां सम्प्रेपनमेव चेति" । उक्तकाले प्रादुष्करणाभावे प्रायश्चित्त मुक्तम् आश्वलायनकारिकायाम् । "प्रायश्चित्तं विशेषेण यत्र नोक्तं भवेद्विधि । होतव्याज्याहुतिस्तत्र भूर्भुव स्वरितीति चेति" । कात्यायन अनुदितास्तमयलक्षणमाह । "रात्रेस्तु षोडशे भागे ग्रहनक्षत्रभूषिते । कालं त्वनुदित ज्ञात्वा तत्र होमं प्रकल्पयेत्" । तथा "यावत्सम्यक्न भासन्ते नभस्यृक्षाणि सर्वत । न च लौहित्यमायाति तावत्साय तु हूयते" । अत्राश्वलायनादीनां होमे मुख्यकालमाह चन्द्रिकायामपि "हस्तादूर्द्ध्वं रविर्यावद्गिरिं भित्त्वा न गच्छति । तावद्धोमविधि पुण्योनान्योऽभ्युदितहोमिनाम् । रात्रौ प्रदोषो मुख्य स्यादिति वेदविदो विदुरिति" । अत्र गौणकालमाह शौनक "पश्चादस्तमयात्कालो योमयेत्त्रिमुहूर्त्तक । स सायहोमकाल स्यात् प्रदोषान्त उदाहृत । यस्तु षड्नाडिकाकाल पश्चात्सूर्योदयात्स्मृत । स होमकालो विप्राणां सङ्गवान्त इति स्मृत इति । यदि गौणकालोऽप्यतीतस्तदा गृह्यपरिशिष्टे प्रायश्चित्तमुक्तम्

"तत्र चौपासनेन जानश्रुतायनेन प्रथमस्तदम्" पत० भा० ५,१,१,५ । स्त्रियां ङीप् ।

औपासन त्रि० उपासते प्रतिदिनमित्युपासनो गृह्यो-ऽग्निस्तत्र भव अण् । गृह्याग्नौ कर्त्तव्ये साय प्रात होमादौ कर्मणि । गृह्याग्निश्च विवाहाग्निः । तत्र कर्त्तव्य दर्शितं "औपासनश्रुते" कात्या० १,१,२, "यदुक्तम् वैतानिकेष्वे वाग्निषु श्रौतं स्मार्तं च कर्त्तव्यमिति तच्च कुतः ? औपासनश्रुते यत आहिताग्नेरप्यौपासन श्रूयते पितृमेधे "अहारेणौपासनं निरस्यतीति" यदि स्मार्तं अपि वैतानिकेष्वेव क्रियते तदा आहिताग्ने र्पितृमेधे औपासनदर्शनं न स्यात् अस्ति च । तस्मात् स्मार्त्तान्यौपासने कर्त्तव्यानीति तथा च स्मृति 'स्मार्त्तं कर्म्म विवाहाग्नौ कुर्व्वीत प्रत्यह गृही । दायकालाहृते वापि श्रौतं वैतानिकाग्निष्विति" । "तस्मिन् गृह्याणि कर्माणि"। गृह्याय हितं गृह्यम् गृह्यमस्य दम्पत्योर्वर्त्तते तस्मि विवाहसमये । अतश्च यत्किञ्चिद्दम्पत्योर्हितं कर्म शान्तिकं पौष्टिकं व्रतोक्तहोमादिकं स्मार्त्तं तत् सर्व्वमावसथ्येऽग्नौ भवतीति । तथा च खादिरगृह्यसूत्रकारिकायाम् "होमानामासार्थपत्यर्थान् तत्स्थानौपासने न च । परार्थानि-ष्टयेऽग्नौ स यान्ते लौकिको भवेत्" अत एव कात्यायन (कर्मप्रदी०) "न स्वे ऽग्नावन्यहोम स्यान्मुक्त्वैकां समिदाहुतिम् । स्वकर्मं सत्क्रियार्थाय यावन्नासौ प्रजायते । अग्नि स्तु नामधेयादौ होमे सर्व्वत्र लौकिक । न हि पित्रा समानीत पुत्रस्य भवति क्वचित्" । अतश्च सीमन्तोन्नयनमपि स्मार्ताग्नावेव कार्य्यम् । अपि च आधानेनोत्पादितानां गार्हपत्यादीनामग्नीनाम् प्रयोजनापेक्षायां सत्यां "गार्हपत्ये हवींषि श्रपयन्त्याहवनीये जुह्वोति दक्षिणाग्नावन्वाहार्य्य पचतीति" प्रत्यक्षवचननिर्द्दिष्टैरेव प्रयोजनैर्निराकाङ्क्षाणाम् न सामर्थ्यमात्रेणोक्तादन्यत्र विनियोग कल्पयितुं शक्यते । तस्मात् स्मार्तान्यौपासन एव कार्य्याणि इति" कर्क ।

विधानपा० तस्यारम्भकालादि निरूपितं यथा गृह्यपरिशिष्टे "अथ नित्यौपासन तस्य समयमारम्भ इति । पौर्णमासोऽपि यस्मिन्न विवाह स्यात्तदारभ्य तस्य च । परिचर्य्या विवाहाग्नेरिदधीत स्वयं द्विजः । यदि रात्रौ विवाहाग्निस्तस्य स्यात्तथा सति । उपक्रमोऽस्य स्यात् साय परिचरेदत इति" । इदमपि नवमाख्यातक्रमे-दृष्टम् । तथा चापस्तम्बसूत्रे भाष्यकृत्सुदर्शनाचार्य्य । "अस्यारम्भण रात्रावेव यदि भव माध्योनातीता ।

अतीतायेत् परेद्यु सायमेवाग्निहोत्रमेवास्यारम्भ इति" । अन्यत्रापि । "प्रातर्होमे सङ्गवान्त कालस्त्वनु दिते ऽथ वा । सायमस्तमिते होम कालस्तु नवनाडिकेति" । अत्रानुदितहोमकालस्तु वाजसनेयिना वेदितव्य । तथा च कात्यायनसूत्रम् । "औपासनस्य परिचरणमस्तमितानुदितयोरिति" । तेषामौपासनसमारम्भोऽपि च तु र्थीहोमानन्तरमाहितेऽग्नौ भवति न तु विवाहाग्नौ "आवसथ्याधानं दारकाले दायाद्यकाले वेति" कात्यायनसूत्रात् तत्राप्यमपि ।"दारकालं पत्न्युपसरकाल । दायाद्यकालो-धनविभागकाल इति" औपासनात्पूर्व्वं यदि विवाहाग्नि र्नश्येत तदा प्रायश्चित्तमुक्तं निर्णयादर्शे "उद्वाहौपासनात् पूर्व्वं नश्येद् यद्यग्निमागते । स्थालीपाक तत कृत्वा औपासनमथाचरेत् । नवनाडीभ्य ऊर्द्ध्वं चेत्स्थालीपाकोभवेद्वै ।औपासने तदा कुर्य्यात् परेद्यु सायमेव चेति" । तस्य प्रादुष्करणकाल उक्त आश्वलायनसूत्रे "तस्याग्निहोत्रेण प्रादुष्करणहोमकालौ व्याख्याताविति" तत्कारिकायामपि ।"ज्वालयेदपराह्णेऽग्निमस्त याते दिवाकरे । पर्य्युक्ष्याग्निं परिस्तीर्य्य पर्य्युक्ष्य च तत परमिति" । स एवाह कात्यायन । "सूर्य्ये तु शैलमप्राप्ते षड्भिरष्टाङ्गुलैः । प्रादुष्करणमग्नीनां प्रातराशेमदर्शनम्" । तथा "दुहित्वा स्रुवया यानि विहारो न विरुध्यते । निक्षेपणं च पात्राणां सम्बेपनमेव चेति" । उक्तकाले प्रादुष्करणाभावे प्रायश्चित्त उक्तम् आश्वलायन कारिकायाम् । "प्रायश्चित्तं विशेषेण यत्र नोक्तं भवेद्विधि । होतव्याज्याहुतिस्तत्र भूर्भुव.स्वरितीति चेति" । कात्यायन अनुदितसमयलक्षणमाह । "रात्रेस्तु षोडशे भागे ग्रहनक्षत्रभूषिते । कालं त्वनुदित ज्ञात्वा तत्र होमं प्रकल्पयेत्" । तथा "यावत्सम्यक्र भासन्ते नभस्यृक्षाणि सर्व्वत । न च लौहित्यमायाति तावत्साय तु हूयते" । अत्राश्वलायनादीनां होमे कल्प-कालमाह चन्द्रिकायामपि "हस्तादूर्द्ध्वं रविर्यावद्गिरिं भित्त्वा न गच्छति । तावद्धोमविधि पुण्योनान्योऽभ्युदितहोमिनाम् । रात्रौ प्रदोषो यस्य स्यादिति वेदविदो विदुरिति" । अत्र गौणकालमाह शौनक "पश्चादस्तमयात्कालोयोभवेत्त्रिमुहूर्त्तक । स सायंहोमकाल स्यात् प्रदोषान्त इदाहृत । यस्तु षड्नाडिकाकाल पश्चादेवोदयाद्रवे । स होमकालो विप्राणां सहूयान्न इति स्मृत इति । यदि गौणकालोऽप्यतीतस्तदा गृह्यपरिशिष्टे प्रायश्चित्तमुक्तम्

"औरसः क्षेत्रजः पुत्रौ पितृरिक्थस्य भागिनौ" स्मृतिः
"औरसे पुनरुत्पन्ने तेनोयागहरा सुता" मनुः उरस
इदमण्। २हृदयभवे त्रि०। उरसा नाम पुरोभेदः तत्र
भव सिन्ध्वा० अण्। ३औरस उरसापुरोभवे त्रि०।

औरसिक न० उरसः अङ्गुल्या० स्वार्थे ठक्। १उरसि।
"इससुक्तान्तात् क" पा० उक्तेरित्यादिभिन्नत्वात् औ-
रस्क इति अस्त्र कलत्र प्रामादिकमेव।

औरस्य न० उरसि भव शरीरावयवत्वात् यत् तत स्वार्थे
अण्। उरसिभवे। "इकार पशुमेंषु क्रमन्त स्वाभिष
वयुतम्। औरस्य त विजानीयात्" शिक्षा "औरसपुत्रे
तु उरस एव 'उरसोऽण् चेति" सूत्रे चाद् यद्विधानात्
अतएव औरसपर्याये उरस्यशब्द एवामरे बोध्यः तथैव
टीकाकृद्व्याख्यानात्। [लोमविकारे कम्बलादौ।

और्ण (क) त्रि० ऊर्णाया विकार अञ् पक्षे वुञ्। मेष-

और्णवत त्रि० ऊर्णवतोऽयम् अण्। ऋषिभेदे तत स्वार्थे
ष्यञ्। और्णवत्योऽप्यत्र। [तन्निमित्तादौ स्त्रियां ङीप्।

और्णिक त्रि० ऊर्णायानिमित्तं संयोग उत्पातो वा ठञ्।

और्द्धकालिक त्रि० ऊर्द्धकाले भव काश्या० ठञ् ञिठच्।
ऊर्द्ध्वकालभवे। ञिति स्त्रियां ङीविति भेदः।

और्द्धदेह त्रि० ऊर्द्ध्वदेहस्येदम् अण्। ऊर्द्ध्वदेहसम्बन्धिनि
"और्द्ध्वदेहनिमित्तार्थमवतीर्य्योदकं नदीम्" रामा०

और्द्धदैहिक त्रि० ऊर्द्ध्वदेहाय साधु-ठञ्। ऊर्द्ध्वदेहप्रापके
शास्त्रोक्ते क्रियादौ मरणोत्तरं हि मनुष्याणां प्रथ-
ममातिवाहिकदेहोत्पत्तिस्ततः पूरकपिण्डदानेन प्रेत-
देहप्राप्तिः आद्यादिसपिण्डनान्तक्रियाभिः प्रेतदेहनि-
वृत्त्या भोगदेहप्राप्तिस्तत्र च पूर्व्वोत्तरभवे क्रिये हेतू।
तदेतत् शुद्धितत्त्वे निर्णीतं यथा।
"अत्रेदं बीजं पूर्व्वक्रियायाश्चातिवाहिकदेहत्यागोत्तर-
देहान्तरजननं, मध्यक्रियायाश्चापि प्रेतत्वपरिहारोत्तर-
देहान्तरजननं ततश्चैकस्य तत्सिद्धौ पुनस्तत्करणं वचना-
भावेऽनर्थकम्। तथाच विष्णुधर्मोत्तरम् "तत्क्षणा-
देव गृह्णाति शरीरमातिवाहिकम्। ऊर्द्ध्वं व्रजन्ति भूतानि
त्रीण्यस्मात्तस्य विग्रहात्"। त्रीणि भूतानि तेजोवाय्वा-
काशानि, पृथिवीजले तु अधोगच्छत। तत्क्षणात् मृत्युक्ष-
णात्। तथा "आतिवाहिकसंज्ञोऽसौ देहो भवति भार्गव।
केवलं तन्मनुष्याणां नान्येषां प्राणिनां क्वचित्"। तथा
"प्रेतपिण्डैस्तथा दत्तैर्देहमाप्नोति भार्गव। भोगदेह-
मिति प्रोक्तं क्रमादेव न संशयः। प्रेतपिण्डा न दीयन्ते
यस्य तस्य विमोक्षणम्। श्मशानिकेभ्यो भूतेभ्यस्तस्य कल्पं
नैव विद्यते। तत्रास्य यातना घोरा शीतवातातपोद्भवा।
ततः सपिण्डीकरणे बान्धवैस्तु कृते नरः। पूर्णे संवत्-
सरे देहमतोऽन्यं प्रतिपद्यते। ततः स नरके याति स्वर्गे
वा स्वेन कर्मणा"। तथा वायुपुराणम् "पूरकेण तु पि-
ण्डेन देहो निष्पाद्यते यतः। कृतस्य करणायोगात्
पुनर्नावर्त्तयेत् क्रियाम्"। अतएवातिवाहिकदेहपरि-
त्यागाय तत्कालीनकर्म्मासमर्थपुत्रसत्त्वेऽप्यन्येन दाहादि
क्रियते। "पितृमातृसपिण्डैस्तु समानसलिलैस्तथा। स-
ङ्घातान्तर्गतैर्वापि राज्ञा वा धनहारिणा। पूर्व्वाः क्रि-
यास्तु कर्त्तव्याः पुत्राद्यैरेव चोत्तराः"।
तत्र क्रियाश्च त्रिविधा विष्णुपुराणे दर्शिता यथा
"पूर्व्वा क्रिया मध्यमा च तथा चैवोत्तरा क्रिया।
त्रिप्रकाराः क्रिया ह्येतास्तासां भेदान् शृणुष्व मे। आदा-
हाद्वार्य्यायुधादिस्पर्शाद्यन्ताश्च याः क्रियाः। ताः पूर्व्वा
मध्यमा मासिमासि एकोद्दिष्टस्य विता। प्रेते पितृत्वमापन्ने
सपिण्डीकरणादनु। क्रियन्ते याः क्रिया पित्र्याः प्रो-
च्यन्ते ता नृपोत्तराः। पितृमातृसपिण्डैश्च समान-
सलिलैस्तथा। सङ्घातान्तर्गतैर्वापि राज्ञा वा धनहा-
रिणा। पूर्व्वाः क्रियास्तु कर्त्तव्याः पुत्राद्यैरेव चोत्तराः।
दौहित्रैर्वा नरश्रेष्ठ। कार्य्यास्तत्तनयैस्तथा। मृताहनि तु
कर्त्तव्याः स्त्रीणामप्युत्तराः क्रियाः। प्रतिसंवत्सरं रा-
जन्। एकोद्दिष्टं विधानतः"। आदाहेति दाहाद्यधरणी-
यान्नविहितवार्य्यायुधादिस्पर्शाद्यन्ताश्च पूर्व्वाः, मासिमा-
सीत्येकादशाहादिसपिण्डनान्तप्रेतक्रियोपलक्षणम्। सपि-
ण्डनोत्तरा पार्व्वणादिक्रिया उत्तरा। अत्र पुत्रादि-
सपिण्डाद्याः पूर्व्वां क्रियामवश्यं कुर्य्युः। मध्यमक्रिया-
यामनियमः। उत्तरक्रियायां पुत्रादयो भ्रातृसन्ततिपर्य्यन्ता
नियताः। श्राद्धविवेकेऽप्येवम्। दौहित्रैर्वेति वाशब्दः
समुच्चयार्थः तेन दौहित्रोऽप्युत्तरक्रियायां नियताधिकारी"।
अत्राधिकारिणश्च एकोद्दिष्टशब्दे १५२५ पृ० उक्ताः "अक-
रोत् स तदौर्द्ध्वदैहिकम्" रघुः। अनुशतिका० द्विपदवृ-
द्धिरिति मल्लि० अनुशतिकादिगणे तस्य पाठाभावेऽपि आकृति-
गणत्वात् तद्विधिरिति तदाशयः। किन्तु बहुषु स्थलेषु
एकपदवृद्धियुक्तं दृश्यते तेन उभयमपि साधु इति तत्त्वम्।
"मृत्यानामुपरोधेन यत्करोत्यौर्द्ध्वदेहिकम्। तद्भवत्यसुखो-
दर्कं जीवतश्च मृतस्य च" मनुः। "उपानहौ च वस्त्रञ्च
प्रतिमृत्यौर्द्ध्वदेहिकम्" भारते अनु० पर्व्वणि ६२२८ श्लो०

[illegible]

[illegible]

मयं जगत्। तस्मादमुं विसृजेमं क्रोधाग्निं द्विजसत्तम!। अय तिष्ठतु ते विप्र! यदीच्छसि महोदधौ। मन्युजोऽग्निर्दहन्नापो लोकाँ ह्यापोमया स्मृताः। एवं प्रतिज्ञा सत्येयं तवानघ! भविष्यति। न चैवं स-सुरा लोका गमिष्यन्ति पराभवम्। वशिष्ठ उवाच। ततस्तं क्रोधजं तात! और्वोऽग्निं वरुणालये। उत्ससर्ज स चैवाप उपयुङ्क्ते महोदधौ। महद्धयशिरो भूत्वा यत्तद्वेदविदो विदुः। तमग्निमुद्गिरन् वक्त्रात् पिबत्यापो महोदधौ"।

बाडवानलस्य स्थितिस्थानम् सि॰शि॰उक्तम् भूमेर्याम्येऽर्द्धे सप्तद्वीपसमुद्राणां स्थितिकीर्त्तनान्ते "स्वादूदकान्तर्वडवानलोऽसौ पाताललोकाः पृथिवीपुटानि" इति। और्वस्य च प्रवरर्षित्वम् आर्षेयशब्दे उक्तम्। "जामदग्नानां भृगु-वत्सानां पञ्चार्षेयो भार्गवच्यावनाप्नवानौर्वजामदग्न्येति च आश्व॰श्रौ॰ १२,१०,६,८ और्वमधिकृत्य कृतोपन्यासः। भारतान्तर्गते और्वचरिताख्याने। "तापत्यमथ वासिष्ठमौर्वं चाख्यानमुत्तमम्" भा॰ आ॰ १। तदाख्यानं भा॰ आ॰ १८९ अध्यायादौ दृश्यम्।

और्वशेय पु॰ उर्वश्यां तच्छब्दोऽस्त्यस्य विमुक्ता॰ अण्। और्वशी-शब्दयुक्ते १स्वाध्याये २अनुवाके च। उर्वश्या इदम् अण्। २उर्वशीसम्बन्धिनि त्रि॰।

और्वशेय पु॰ उर्वश्या अपत्यम् ढक्। १अगस्त्ये मुनौ शेमच॰ तस्य च उर्वश्यां दृष्टायां मित्रावरुणयोः स्खलितरेतोजा-ततया तथात्वम् तत्प्रमाणमगस्तिशब्दे ४७१॰ उक्तम्। ऐलशब्दे दर्शितेषु उर्वशीगर्भजातेषु पुरूरवसः सुतेषु २आयुरादिषु षट्सु च

औलपि पु॰ उलपस्य कलाप्यन्तेवासिविशेषस्यापत्यम् इञ्। उलपापत्ये तत स्वार्थे दामन्या॰ छ। औलपीय तदर्थे बहुषु तस्य लुक्। औलपय इत्यादि।

औलपिन् पु॰ ब॰व॰। उलपेन प्रोक्तं छन्दोऽधीयते कला-प्यन्तेवासित्वात् णिनि। उलपप्रोक्तछन्दोध्यायिषु

औलान न॰ अवलम्बने भेदे दृप्यो॰। अवलम्बने। "विद्वान् पथ ऋतुशो देवयानानप्यौलान दिविषे" ऋ॰१०,९८,११।

औलूक न॰ उलूकानां समूहः खण्डिका॰ अञ्। पेचकसमुदाये

औलूक्य पु॰ उलूकर्षेरपत्यम् गर्गा॰ यञ्। उलूकनामर्षेर-पत्ये कणादे वैशेषिकसूत्रकारे तस्य च्छात्राः कण्वादि॰ अण्। ततो यञो लुक्। औलूकः औलूक्यच्छात्रे वैशे-षिकमतानुसारिणि। उलूक इति सुखमध्य केचिदाहुः औलूक्यदर्शनञ्च वैशेषिकदर्शनं तत्प्रतिपाद्यविषयाश्चोच्यन्ते

"अथातो धर्मं व्याख्यास्यामः"। १सू॰

"तापत्रयपराहता विवेकिनस्तापत्रयनिवृत्तिनिदानमनुसन्दधाना नानाश्रुतिस्मृतीतिहासपुराणेभ्य आत्मतत्त्वसाक्षात्कार-मेव तदुपायमाकलयाम्बभूवुः। तत्प्राप्तिहेतुमपि पन्थानं जिज्ञासमाना परमकारुणिकं कणादं मुनिमुपसेदुः। अथ कणादो मुनिस्तत्त्वज्ञानवैराग्यैश्वर्यसम्पन्नः षण्णां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानमेवात्मतत्त्व-साक्षात्कारप्राप्तये परमः पन्था इति मनसिकृत्य तच्च निवृत्तिलक्षणाद्धर्मादेतेषामनायासेन सेत्स्यतीति लक्षणतः स्वरूपतश्च धर्ममेव प्रथममुपदिशाम्यनन्तरं षडपि पदार्थानुद्देशलक्षणपरीक्षाभिरुपदेक्ष्यामीति हृदि निधाय तेषामवधानाय प्रतिजानीते। अथातो धर्ममित्यादि" उप॰

"यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः"। २सू॰

"को धर्मः किं लक्षणश्चेति? सामान्यतः शिष्यजिज्ञा-सायां यतोऽभ्युदयनिःश्रेयससिद्धिरित्युपतिष्ठते" तथा च यतोऽभ्युदयसिद्धिर्यतश्च निःश्रेयससिद्धिस्तदुभयं धर्म एवं पुरुषार्थसाधारणकारणं धर्म इति वक्तव्ये परम-पुरुषार्थयोः सुखदुःखाभावयोर्विशेषतः परिचयार्थ-मभ्युदयनिःश्रेयससिद्धिरित्युक्तं स्वर्गापवर्गयोरेवान्येच्छा-नधीनेच्छाविषयत्वेन परमपुरुषार्थत्वात्। साधयिष्यते च दुःखाभावस्यापि पुरुषार्थत्वम्" उपस्कार।

"तद्वचनादाम्नायस्य प्रामाण्यम्"। ३सू॰

"ननु निवृत्तिलक्षणो धर्मस्तत्त्वज्ञानद्वारा निःश्रेयसहेतुरित्यत्र श्रुतिः प्रमाणं श्रुतेरेव प्रामाण्ये च विप्रति-पद्यामहे अनृतव्याघातपुनरुक्तदोषेभ्यः, पुत्रेष्टौ कृतायामपि पुत्रानुत्पादादनृतत्वम् "उदिते जुहोति अनुदिते जुहोति समयाध्युषिते जुहोतीति" विधेः प्राप्त एवोदितादिकाले होमो व्याहन्यते "श्यावोऽस्याहुतिमभ्यवहरति य उदिते जुहोति योऽनुदिते जुहोति शबलोऽस्याहुतिमभ्यवहरति यः समयाध्युषिते जुहोति" इत्या-दिना। तथा "त्रिः प्रथमामन्वाह त्रिरुत्तमामन्वाह" इत्यनेन प्रथमोत्तमसामिधेन्योस्त्रिरुच्चारणाभिधानात् पौनरुक्त्यमेव। न चाम्नायप्रामाण्यप्रतिपादकं किञ्चि-दस्ति प्रमाणम् नित्यत्वे विप्रतिपत्तौ नित्यनिर्दोषत्वमपि सन्दिग्धं पौरुषेयत्वे तु भ्रमप्रमादविप्रलिप्साकरणापाट-वादिसम्भावनया आप्तोक्तत्वमपि सन्दिग्धमेवेति न निःश्रे-यसं न वा तस्य तत्त्वज्ञानं द्वारं न वा धर्म इति

श्रुतिः" "तमेव विदित्वाऽतिमृत्युमेति" इत्यादिका। अनुमानमप्यस्ति दुःखसन्ततिरत्यन्तमुच्छिद्यते सन्ततित्वात् प्रदीपसन्ततिवदित्यादि वस्तुतः दुःखध्वंसस्य दुःखप्रागभावकारेण च विपर्य्यकरणात् प्रत्यक्षवेद्यताऽपि। योगिनां योगजधर्म्मवशेनानागामिनो दुःखध्वंसस्य प्रत्यक्षोपगमाच्च। तथापि तुल्यायव्ययतया नायं पुरुषार्थो दुःखवत् सुखस्यापि हाने द्वयोरपि समानसामग्रीकत्वादिति चेत् उत्पन्नतो वीतरागाणां दुःखदुर्द्दिनभीरूणां सुखखद्योतिकाभावेऽप्यव्ययतया तत्र प्रवृत्तेः। ननु तथापि दुःखनिवृत्तिर्न पुरुषार्थः, अनागतदुःखनिवृत्तेरशक्यत्वात् अतीतदुःखस्यातीतत्वात् वर्त्तमानदुःखस्य पुरुषप्रयत्नमन्तरेणैव निवृत्तेरिति चेन्न हेतूच्छेदे पुरुषव्यापारात् प्रायश्चित्तवत् तथाहि सवासनमिथ्याज्ञानं दुःखहेतुस्तदुच्छेदश्चात्मतत्त्वज्ञानात् तत्त्वज्ञानं च योगविधिसाध्यमिति तदर्थं प्रवृत्त्युपपत्तेः" उपस्कार। कियदन्तरे च "धर्म्मविशेषप्रसूतादिति तत्त्वज्ञानादिकस्य विशेषणं तत्र धर्म्मविशेषो निवृत्तिलक्षणो धर्म्मः इदि तु तत्त्वं ज्ञायतेऽनेनेति तत्त्वज्ञानं शास्त्रमुच्यते तदा धर्म्मविशेष ईश्वरनियोगप्रसादरूपो वक्तव्यः नूयते ह्यीश्वरनियोगप्रसादमधिगम्य कणादो महर्षिः शास्त्रं प्रणीतवानिति तत्त्वज्ञानमात्मतत्त्वसाक्षात्कार इह विवक्षितस्तस्यैव सवासनमिथ्याज्ञानोन्मूलनक्षमत्वात् "तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" इत्यत्र "द्वे ब्रह्मणी वेदितव्ये" इत्यत्र च वेदनपदस्य साक्षात्कारपरत्वात् "पश्यत्यचक्षुः" इत्यत्रापि तथा। सच शास्त्रान्मनननिदिध्यासनादिपरम्परयेति हेतुपञ्चम्या तथैवाभिधानात्" उप०

न्यायकन्दल्यां प्रयोजनतत्त्वमित्थं विवृतं यथा "तच्चेश्वरनोदनाभिव्यक्ताद्धर्म्मादेवेति" भाष्यप्रतीकव्याख्यायाम् "यस्य वस्तुनो यो भावस्तत् तस्य तत्त्वम् साधारणोधर्म्मः साधर्म्यम् असाधारणोधर्म्मो वैधर्म्यं तयोर्ज्ञानं निःश्रेयसहेतुः विषयसंयोगजं सुखं तावत् क्षयिष्णुनापि दुःखबहुलं स्वर्गादिपदं प्राप्यमपि सप्रत्यय, सातिशयञ्च तथा च कस्यचित् स्वर्गमात्रमपरस्य स्वर्गराज्यम् अवस्थदपि सतत प्रच्युतिशङ्कया परसम्पदुत्कर्षोपतापाच्च दुःखाक्रान्तं न निश्चितं श्रेयः। आत्यन्तिकी दुःखनिवृत्तिरनुपमवेदननिखिलदुःखासंवेदनादपराधीनत्वाच्च निश्चितं श्रेयः तस्य कारणं द्रव्यादिस्वरूपज्ञानम्। एतेनैतत् प्रत्युक्तं मण्डनेन यदुक्तं विशेषगुणनिवृत्तिलक्षणा मुक्तिरुच्छेदपक्षान्न भिद्यत इति। विशेषगुणोच्छेदे हि सति आत्मनः स्वरूपेणावस्थानं नोच्छेदो नित्यत्वात् नचायमपुरुषार्थः समस्तदुःखोपरमस्य पुरुषार्थत्वात् समस्तसुखाभावादपुरुषार्थत्वमिति चेत् न सुखस्यापि क्षयितया बहुलप्रत्यनीकतया साधनप्रार्थनायतपरिक्लिष्टतया च सदा दुःखाक्रान्तस्य विषमिश्रस्येव मधुनो दुःखपक्षे निक्षेपात्"। कियदन्तरे तत्रैव। "तत् निःश्रेयसं धर्म्मादेव भवति द्रव्यादितत्त्वज्ञानं तस्य कारणत्वेन निःश्रेयससाधनम् इत्यभिप्राय तत्त्वतो ज्ञातेषु बाह्याध्यात्मिकेषु विषयेषु दोषदर्शनाद्विरक्तस्य समीहानिवृत्तावात्मज्ञस्य तदर्थानि कर्म्माण्यकुर्व्वतस्तत्परित्यागसाधनानि च श्रुतिस्मृत्युदितानि असङ्कल्पितफलान्युपाददानस्यात्मज्ञानमभ्यस्यतः प्रकृष्टविनिवर्त्तकधर्म्मोपचये सति परिपक्वात्मज्ञानस्यात्यन्तिकशरीरवियोगस्य भावात् दृष्टो हि विषयाणामहिकण्टकादीनां, परित्यागो विषयदोषदर्शनादभिसन्धिकृतनिवर्त्तकात्मविशेषगुणात् प्रयत्नात् तेन शरीरादीनामात्यन्तिकं परित्यागो विषयदोषदर्शनपूर्व्वकाभिसन्धिकृतनिवर्त्तकात्मविशेषगुणनिमित्तविपाक इति मोक्षाधिकारे वक्ष्यामः। धर्म्मोऽपि केवलं न तावन्निःश्रेयसं करोति यावदीश्वरेच्छया नानुगृह्यते तेनेदमुक्तम् ईश्वरनोदनेत्यादि। नोद्यन्ते प्रेर्य्यन्ते स्वकार्य्येषु प्रवर्त्त्यन्तेऽनया भावा इति नोदना ईश्वरस्य नोदना ईश्वरेच्छाविशेषः अभिव्यक्तिः कार्य्यारम्भं प्रत्याभिमुख्यम् ईश्वरनोदनयाऽभिव्यक्तात् ईश्वरेच्छाविशेषेण कार्य्यारम्भाभिमुखीकृताद्धर्म्मादेव निःश्रेयसं भवतीति वाक्ययोजना"।

एवं विषयप्रयोजनादिकं यत् सूत्रारम्भे विहितं तत्र प्रतिपाद्यविषयाय सर्व्वद० दर्शिता यथा

"इह खलु निखिलप्रेक्षावन्निसर्गप्रतिकूलवेदनीयतया जिहासितमेतद्विदितं दुःखं जिहासुस्तद्धानोपायं जिज्ञासुः परमेश्वरसाक्षात्कारमुपायमाकलयति "यदा चर्म्मवदाकाशं वेष्टयिष्यन्ति मानवाः। तदा शिवमविज्ञाय दुःखस्यान्तोभविष्यति" इत्यादिवचननिचयप्रामाण्यात्। परमेश्वरसाक्षात्कारश्च श्रवणमननभावनाभिर्भावनीयः यदाह "आगमेनानुमानेन ध्यानाभ्यासरसेन च। त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तममिति" तत्र मननमनुमानाधीनमनुमानञ्च व्याप्तिज्ञानाधीनं व्याप्तिज्ञानञ्च पदार्थविवेकापेक्षम्। अतः पदार्थषट्कम्"। "अथातो धर्म्मं व्याख्यास्याम इत्यादिकाया दशलक्षण्याः कणभक्षेण भगवता व्यवस्थापि तत्रादिमाह्निकस्याद्ये प्रथमे

श्रुतिः” “तमेव विदित्वाऽतिमृत्युमेति” इत्यादिका। अनुमानमप्यस्ति दुःखसन्ततिरत्यन्तमुच्छिद्यते सन्ततित्वात् प्रदीपसन्ततिवदित्यादि अस्मदादि दुःखस्य दुःखत्वात्कारेण स्वाश्रय विषयं करणात् प्रत्यक्षवेद्यतायाः। योगिनां योगजधर्मानुग्रहेनागामिनो दुःखध्वंसस्य प्रत्यक्षोपगमाच्च। तथापि तदुत्पाद्यत्वतया नाय पुरुषार्थो दुःखवत् सुखस्यापि ज्ञाने इयोरपि समानसामग्रीकत्वादिति चेत् उच्यते यो वीतरागो भवतु दुःखनिवृत्तिमभीप्सुर्या सुखयथोचितवाक्यात्ते ऽन्तरालत्वसत्ता तत्र प्रवर्त्तते। नह तथापि दुःखनिवृत्तिर्न पुरुषार्थः, अनागतदुःखनिवृत्तेरशक्यत्वात् अतीतदुःखस्य नष्टत्वात् वर्त्तमानदुःखस्य पुरुषप्रयत्नमन्तरेणैव निवृत्तेरिति चेन्न हेतूच्छेदे पुरुषव्यापारात् प्रायश्चित्तवत् तथाहि सवासन मिथ्याज्ञान संसारहेतुस्तदुच्छेदयात्मतत्त्वज्ञानात् तत्त्वज्ञानं च योगविधिसाध्यमिति तदर्थं प्रवृत्त्युपपत्तेः” उपस्कार कियदन्तरे च “धर्मविशेषप्रसूतादिति तत्त्वज्ञानादिश्रस्य विशेषण तत्र धर्मविशेषो निवृत्तिलक्षणो धर्म इति तु तच्च ज्ञायतेऽनेनेति तच्चज्ञानं शास्त्रमुच्यते तदा धर्मविशेष ईश्वरनियोगप्रसादरूपो मन्तव्य सूयते ईश्वरनियोगप्रसादवधिगमस्य कणादो महर्षिः शास्त्रं प्रणीतवानिति तत्र ज्ञानमात्रतत्त्वसाक्षात्कार इह विवक्षितस्तस्यैव सवासनमिथ्याज्ञानोन्मूलनक्षमत्वात् “तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽनाय” इत्यत्र “द्वे ब्रह्मणी वेदितव्ये” इत्यत्र च वेदनपदस्य साक्षात्कारपरत्वात् “पश्य ब्रह्म” इत्यत्रापि तथा। अत्र शास्त्रमननिदिध्यासनादिपरमपरयेति क्षेत्रपञ्चम्या तथैवाभिधानात्” उप० न्यायकन्दल्यां प्रयोजनमन्यमित्थं स्थित यथा “तच्चेश्वरनोदनाभिव्यक्ताद्धर्मादेवेति” भाष्यप्रतीकव्याख्यायाम् “यस्य वस्तुनो यो भावस्तत् तस्य तत्त्वम् साधारणो धर्मः साधर्म्यम् असाधारणोधर्मो वैधर्म्यं तयोस्तत्त्वज्ञानं निःश्रेयसहेतुः विषयसंयोगज सुख तावत् क्षयिकमिति दुःखमेव स्वर्गादिपद भाष्यमपि सप्रत्ययं, सातिशयत्व तथा च कश्चित्स्वर्गमात्रमपरस्य स्वर्गराज्यम् अतस्तदपि चततमप्युतिमद्धया परससत्कर्मोपतापाच्च दुःखान्नाम्न न मिश्रित श्रेय। आत्यन्तिकी दुःखनिवृत्तिरप्यश्रवेदननिखिलदुःखावेदनारूपत्वादपरायत्तेन मिश्रित श्रेयः तस्य कारण इत्यादिकस्य प्रधानम्। एतेनैतत् प्रत्युक्तं प्रवृत्तेन यदुक्तं विशेषगुणनिवृत्तिलक्षणा मुक्तिरुच्छेद-

पक्षात् भिद्यत इति। विशेषगुणोच्छेदे हि सति आत्मनः स्वरूपेणावस्थानं नोच्छेदोनित्यत्वात् न चायमपुरुषार्थः सकलदुःखोपरमस्य पुरुषार्थत्वात् सकलसुखाभावादपुरुषार्थत्वमिति चेत् न सुखस्यापि क्षयितया बहुलप्रत्यनीकतया साधनप्रार्थनागतपरिक्लिष्टतया च सदा दुःखानुषक्तत्वात् विषमिश्रस्येव मधुनोदुःखपक्षे निक्षेपात्”। कियदन्तरे तत्रैव। “तत् निःश्रेयस धर्मादेव भवति इत्यादि तच्च ज्ञानं तस्य कारणत्वेन निःश्रेयससाधनम् इत्यभिप्राय तत्त्वतो ज्ञातेषु बाह्याध्यात्मिकेषु विषयेषु दोषदर्शनाद्विरक्तस्य समीहानिवृत्तावात्मज्ञस्य तदर्थानि कर्माण्यकुर्वतः तत्परित्यागसाधनानि च श्रुतिस्मृत्युदितानि असङ्कल्पित फलान्युपाददानस्यात्मज्ञानमभ्यस्तः प्रकृष्टविनिवर्त्तकधर्मोपचये सति परिपक्वात्मज्ञानस्यात्यन्तिकशरीरवियोगस्यभावात् इन्द्रोहि विषयाणामङ्गिकस्वभावादीनां, परित्यागो-विषयदोषदर्शनादभिव्यक्तनिवर्त्तकात्मविशेषगुणात् भवन्ति तेन शरीरादीनामात्यन्तिक परित्यागोविषयदोषदर्शनपूर्वकात्मज्ञानाभिव्यक्तनिवर्त्तकात्मविशेषगुणनिमित्तविधात इति मोक्षाधिकारे वक्ष्यामः। धर्मोऽपि केवलं न तावन्निःश्रेयस करोति यावदीश्वरेच्छया नानुगृह्यते तेनेदमुक्तम् ईश्वरनोदनेत्यादि। नोद्यन्ते प्रेर्यन्ते स्वकार्येषु प्रवर्त्त्यन्तेऽनया भावा इति नोदना ईश्वरस्य नोदना ईश्वरेच्छाविशेष, अभिव्यक्ति कार्यारम्भं प्रत्याभिमुख्यम् ईश्वरनोदनयाऽभिव्यक्तात् ईश्वरेच्छाविशेषेण कार्यारम्भाभिमुखीकृताद्धर्मादेव निःश्रेयसं भवतीति वाक्ययोजना”। एवं विषयप्रयोजनादिकं यत् स्वग्रन्थमभिहितं तत्र प्रतिपाद्यविषयाश्च सर्वद० दर्शिता यथा

इह खलु निखिलप्राणिचार्वाकसर्गप्रतिकूलवेदनीयतया निखिलसंवेदनसिद्धं दुःखं जिहासुस्तज्ज्ञानोपायं जिज्ञासुः परमेश्वरसाक्षात्कारमुपायमाकलयति “यदा चर्म्मवदाकाशं वेष्टयिष्यन्ति मानवाः। तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यति” इत्यादिवचननिचयप्रामाण्यात्। परमेश्वरसाक्षात्कारश्च श्रवणमननभावनाभिर्भावनीयः यदाह “आगमेनानुमानेन ध्यानाभ्यासरसेन च। त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तममिति” तत्र मननमनुमानाधीनमनुमानञ्च व्याप्तिज्ञानाधीनं व्याप्तिज्ञानञ्च पदार्थविवेकापेक्षम्। अत पदार्थषट्कम्”। “अथातो धर्मं व्याख्यास्याम इत्यादिकया दशलक्षण्या कणभक्षेण भगवता व्यवस्थापि तत्राह्निकद्वयात्मके प्रथमे

श्रुति” “तमेव विदित्वाऽतिमृत्युमेति” इत्यादिका। अनुमानमप्यस्ति दुःखसन्ततिरत्यन्तमुच्छिद्यते सन्ततित्वात् प्रदीपसन्ततिवदित्यादि परमदुःखध्वंसस्य दुःखधारात्वा- रेण सर्वं विषयकरणात् प्रत्यक्षवेद्यताऽपि। योगिना योगजधर्म्मवशेनानागामिनो दुःखध्वंसस्य प्रत्यक्षोपगमाच्च। तथापि तत्प्राप्त्यनयतया नायं पुरुषार्थो दुःखवत् सुख- स्यापि हाने द्वयोरपि समानसामग्रीकत्वादिति चेत् उत्पन्नतो वीतरागाणां दुःखदुर्द्दिनभीरुतया सुखखद्योतिकामात्रेऽलम्पटतया तत्र प्रवृत्तेः। ननु तथापि दुःखनिवृत्तिर्न पुरुषार्थः, अनागतदुःखनिवृत्तेरशक्यत्वात् अतीतदुःखस्यातीतत्वात् वर्त्तमानदुःखस्य पुरुषप्रयत्नमन्त- रेणैव निवृत्तेरिति चेन्न हेतूच्छेदे पुरुषव्यापारात् प्राय- श्चित्तवत् तथाहि संसारस्य मिथ्याज्ञानं संसारहेतुस्तदु- च्छेदश्चात्मतत्त्वज्ञानात् तत्त्वज्ञानं च योगविधिसाध्यमिति तदर्थं ग्रन्थस्युपपत्तेः” उपस्कारः कियदन्तरे च “धर्म्मविशेषप्रसूतादिति तत्त्वज्ञानादिरस्य विशेषणं तत्र धर्म्मविशेषो निवृत्तिलक्षणो धर्म्मः यदि तु तत्त्वज्ञाय- तेऽनेनेति तत्त्वज्ञानं शास्त्रमुच्यते तदा धर्म्मविशेषः ईश्व- रनियोगप्रसादरूपो वक्तव्यः श्रूयते हीश्वरनियोगप्रसाद- वधिगम्य कणादो महर्षिः शास्त्रं प्रणीतवानिति तत्त्व- ज्ञानमात्मतत्त्वसाक्षात्कार इह विवक्षितस्तस्यैव सवासन- मिथ्याज्ञानोन्मूलनक्षमत्वात् “तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय” इत्यत्र “द्वे ब्रह्मणी वेदि- तव्ये” इत्यस्य च वेदनपदस्य साक्षात्कारपरत्वात् “पश्य ब्रह्मसु” इत्यत्रापि तथा। स च शास्त्रान्मननिदिध्या- सनादिपरम्परयेति हेतुपरम्परया तथैवाभिधानात्” उप०

न्यायकन्दल्यां प्रयोजनस्वरूपमित्थं विवृतं यथा “तत्त्वेश्वरनोदनाभिव्यक्तादधर्म्मादेवेति” भाष्यप्रतीकव्याख्या- याम् “यस्य वस्तुनो यो भावस्तत् तस्य तत्त्वम् साधारणो- धर्म्मः साधर्म्यम् असाधारणोधर्म्मो वैधर्म्यं तयोर्ज्ञान- ज्ञानं निःश्रेयसहेतुः विषयप्रयोगजं सुखं तावत् चयि- ष्णुसातिशयि दुःखप्रसूतं स्वर्गादिपदं प्राप्यमपि सातिशयं, सातिशयस्य तथा च सम्प्रति तत्स्वर्गमात्मनः परस्य स्वर्गराज्यम् अतस्तदपि सततमप्युत्पत्तिदृष्ट्या परसमृद्धत्कर्षोपतापाच्च दुः- खाक्रान्तं न निश्चितं श्रेयः। आत्यन्तिकी दुःखनिवृत्तिर- सद्भावेदनतिखिलदुःखावेदनारूपत्वादपरावृत्तेश्च निश्चितं श्रेयः तस्य कारणं द्रव्यादिषट्पदार्थज्ञानम्। एतेनैतत् प्रत्युक्तं यदुक्तं विशेषगुणनिवृत्तिलक्षणा मुक्तिरुच्छेद- पक्षान्न भिद्यत इति। विशेषगुणोच्छेदे हि सति आत्मनः स्वरूपेणावस्थानं नोच्छेदोनित्यत्वात् नचायमपुरुषार्थः अखण्डक्षेमस्य पुरुषार्थत्वात् समस्तसुखाभावादपुरु- षार्थत्वमिति चेत् न सुखस्यापि चयितया वह्निज्ञानीय- तया साधनप्रार्थनायतपरिक्लिष्टतया च सदा दुःखा- क्रान्तस्य विषमिश्रस्येव मधुनोदुःखपक्षे निक्षेपात्”। किय- दन्तरे तत्रैव। ‘तत् निःश्रेयसं धर्म्मादेव भवति द्रव्यादि त- त्त्वज्ञानं तस्य कारणत्वेन निःश्रेयससाधनम्’ इत्यभिप्राय तत्त्वतोज्ञातेषु बाह्याध्यात्मिकेषु विषयेषु दोषदर्शनाद्विर- क्तस्य समीहानिवृत्तावात्मज्ञस्य तदर्थानि कर्म्माण्यकुर्वत- स्तत्परित्यागसाधनानि च श्रुतिस्मृत्युदितानि असङ्कल्पित- फलान्युपाददानस्यात्मज्ञानमभ्यस्यत प्रकृष्टविनिवर्त्तकधर्म्मो- पचये सति परिपक्वात्मज्ञानस्यात्यन्तिकशरीरवियोगस्याभा- वात् दृष्टे हि विषयाणामसङ्क्रियमाणादीनां, परित्यागो- विषयदोषदर्शनादभिसन्धिप्रतनिवर्त्तकात्मविशेषगुणात् प्रय- त्नात् तेन शरीरादीनामात्यन्तिकः परित्यागोविषयदोष- दर्शनपूर्वकानभिसन्धिप्रतनिवर्त्तकात्मविशेषगुणनिमित्तविधाव इति मोक्षाधिकारे वक्ष्यामः। धर्म्मोऽपि स्वकार्य्यं न तावन्निःश्रेयसं करोति यावदीश्वरेच्छया नानुमन्यते तेनेदमुक्तम् ईश्वरनोदनेत्यादि। नोद्यन्ते प्रेर्य्यन्ते स्वकार्य्येषु प्रवर्त्त्यन्ते ऽनया भावा इति नोदना ईश्वरस्य नोदना ईश्व- रेच्छाविशेष अभिव्यक्तिः कार्य्यारम्भं प्रत्याभिमुख्यम् ईश्व- रनोदनयाऽभिव्यक्तात् ईश्वरेच्छाविशेषेण कार्य्यारम्भाभि- मुखीकृतादधर्म्मादेव निःश्रेयसं भवतीति वाक्ययोजना”।

एवं विषयप्रयोजनादिकं यत्र सूत्रग्राममभिहितं तत्र प्रति- पाद्यविषयाश्च सर्वद० दर्शिता यथा

इह खलु निखिलप्रेक्षावन्निसर्गप्रतिकूलवेदनीयतया निखिलचेतनसिद्ध दुःखं जिहासुस्तज्ज्ञानोपायं जिज्ञा- सुः परमेश्वरसाक्षात्कारमुपायमाकलयति “यदा चर्म्मवदा- काशं वेष्टयिष्यन्ति मानवाः। तदा शिवमविज्ञाय दुःखस्या- न्तोभविष्यति” इत्यादिवचननिचयप्रामाण्यात्। परमेश्वर- साक्षात्कारश्च श्रवणमननभावनाभिर्भावनीयः, यदाह “आगमेनानुमानेन ध्यानाभ्यासरसेन च। त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तममिति” तत्र मनन- मनुमानाधीनमनुमानञ्च व्याप्तिज्ञानाधीनं व्याप्तिज्ञानञ्च पदार्थविवेकापेक्षम्। अत पदार्थषट्कम्”। “अथातो धर्म्मं व्याख्यास्याम इत्यादिकाया दशलक्षण्याः कण- भक्षेण भगवता व्यवस्थापि वत्साङ्कितत्वात्तस्य प्रयत्ने

[illegible]

[illegible]

औलू

णम्। विभुत्वे सति दिक्समवेतपरत्वासमवायिकारणाधिकरणम् कालः। अथावृत्ते शब्दविशेषगुणा महती दिक्। आत्ममनसोरात्मत्वमनस्त्वे। आत्मत्वं नाम अमूर्त्तसमवेतद्रव्यत्वापरजातिः। मनस्त्वं नाम द्रव्यसमवायिकारणत्वरहिताणुसमवेतद्रव्यत्वापरजातिः। रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नाश्च कणोक्ताः सप्तदश चशब्दसूचिताः गुरुत्वद्रवत्वस्नेहसंस्कारादृष्टशब्दाः सप्तैवेत्येवं चतुर्विंशतिगुणाः। तत्र रूपादिपञ्चानां रूपत्वादिजातिर्लक्षणम्। रूपत्वं नाम नीलसमवेतगुणत्वापरजातिः। अनया दिशा शिष्टानां लक्षणानि द्रष्टव्यानि। कर्म पञ्चविधम् उत्क्षेपणावक्षेपणाकुञ्चनप्रसारणगमनभेदात्। भ्रमणरेचनादीनां गमनेऽन्तर्भावः। उत्क्षेपणादीनामुत्क्षेपणत्वादिजातिर्लक्षणम्। तत्र उत्क्षेपणं नाम ऊर्द्ध्वदेशसंयोगासमवायिकारणमेयसमवेतकर्मत्वापरजातिः। एवमवक्षेपणादीनां लक्षणं कर्त्तव्यम्। सामान्यं द्विविधं परमपरञ्च परं सत्ता द्रव्यगुणकर्मसमवेता गुणकर्मसमवेता वा। अपरं द्रव्यत्वादि तल्लक्षणं प्रागेवोक्तम्। विशेषाणामनन्तत्वात् समवायस्य चैकत्वाद्विभागो न सम्भवति तल्लक्षणञ्च प्रागेवोक्तं। (सर्व्वमपरत्वं व्याप्यत्वम् अल्पदेशवृत्तित्वं वा)।

“द्वित्वे च पाकजोत्पत्तौ विभागे च विभागजे। यस्य न स्खलिता बुद्धिस्तं वै वैशेषिकं विदुरिति” आभाणकस्य सद्भावात् द्वित्वाद्युत्पत्तिप्रकारः प्रदर्श्यते। तत्र प्रथममिन्द्रियार्थसन्निकर्षस्तस्मादेकत्वसामान्यज्ञानं ततोऽपेक्षाबुद्धिः ततो द्वित्वोत्पत्तिस्ततो द्वित्वसामान्यज्ञानं तस्मात् द्वित्वगुणज्ञानं ततः संस्कारः”। तदाह

‘आदाविन्द्रियसन्निकर्षघटनादेकत्वसामान्यधीरेकत्वोभयगोचरा मतिरतो द्वित्वं ततो जायते। द्वित्वत्वप्रमितिस्ततोऽनु परतो द्वित्वप्रमानन्तरं द्वे द्रव्ये इति धीरियं निगदिता द्वित्वोदयप्रक्रियेति”।

द्वित्वादेरपेक्षाबुद्धिजन्यत्वे किं प्रमाणम् अत्राचार्य्याः अपेक्षाबुद्धिर्द्वित्वादेरुत्पादिका भवितुमर्हति व्यञ्जकत्वानुपपत्तौ तदनुविधीयमानत्वात् शब्दं प्रति संयोगवदिति”। यत्तु मूले द्वित्वादिकमनेकत्वद्वयविषयानित्यबुद्धिव्यङ्ग्यं भवति अनेकाश्रितगुणत्वात् पृथक्त्वादिवदिति।

निवृत्तिक्रमो निरूप्यते अपेक्षाबुद्धित एकत्वसामान्यज्ञानस्य द्वित्वोत्पत्तिसमकालनिवृत्तिः अपेक्षाबुद्धेर्द्वित्वसामान्यज्ञानात् द्वित्वगुणबुद्धिसमसमयं द्वित्वस्यापेक्षाबुद्धिनिवृत्तेर्द्रव्यबुद्धिसमकालं गुणबुद्धेः, द्रव्यबुद्धितः संस्कारोत्पत्तिसमकालं द्रव्यबुद्धेस्तदनन्तरसंस्कारादिति। तथाच स एव “आदावपेक्षाबुद्ध्या हि नश्येदेकत्वजातिधीः। द्वित्वोदयसमं पश्चात् सा च तज्जातिबुद्धितः। द्वित्वाख्यगुणधीकाले ततो द्वित्वं निवर्त्तते। अपेक्षाबुद्धिनाशेन द्रव्यधीजन्मकालतः। गुणबुद्धिर्द्रव्यबुद्ध्या संस्कारोत्पत्तिकालतः। द्रव्यबुद्धिश्च संस्कारादिति नाशक्रमो मत” इति।

बुद्धेर्बुद्ध्यन्तरविनाश्यत्वे संस्कारविनाश्यत्वे च प्रमाणं शिवादित्याचार्य्योक्तानि मानानि उत्तरोत्तरकार्य्यविनाश्यानि क्षणिकविभुविशेषगुणत्वात् शब्दवत्। द्रव्यारम्भकसंयोगप्रतिद्वन्द्विविभागजनककर्मसमकालमेकत्वसामान्यचिन्तया आश्रयनिवृत्तेरेव द्वित्वनिवृत्तिः कर्मसमकालमपेक्षाबुद्धिचिन्तनादभ्यामिति संक्षेपः। अपेक्षाबुद्धिर्नाम विनाशकविनाशप्रतियोगिनी बुद्धिरिति बोद्धव्यम्।

अथ द्व्यणुकनाशमारभ्य कतिभिः क्षणैः पुनरन्यद् द्व्यणुकमुत्पद्य रूपादिमद्भवतीति जिज्ञासायामुत्पत्तिप्रकारः कथ्यते। नोदनादिक्रमेण द्व्यणुकनाशे नष्टे द्व्यणुके परमाणावग्निसंयोगात् श्यामादीनां निवृत्तिः निवृत्तेषु श्यामादिषु पुनरन्यस्मादग्निसंयोगाद्रक्तादीनामुत्पत्तिः उत्पन्नेषु रक्तादिषु अदृष्टवदात्मसंयोगात् परमाणौ द्रव्यारम्भणाय क्रिया तया पूर्व्वदेशाद्विभागः विभागेन पूर्व्वदेशसंयोगनिवृत्तिः तस्मिन्निवृत्ते परमाण्वन्तरेण संयोगोत्पत्तिः संयुक्ताभ्यां परमाणुभ्यां द्व्यणुकारम्भः आरब्धे द्व्यणुके कारणगुणादिभ्यः कार्य्यगुणादीनां रूपादीनामुत्पत्तिरिति यथाक्रमं नव क्षणाः। दशक्षणादिप्रकारान्तरं विस्तरभयान्नेह प्रतन्यते। इयं पीलुपाकप्रक्रिया पीठरपाकप्रक्रिया तु नैयायिकधीसम्मता।

विभागजविभागो द्विविधः कारणमात्रविभागजः कारणाकारणविभागजश्च। तत्र प्रथमः कथ्यते कार्य्यव्याप्ते कारणे कर्मोत्पन्नं यदावयवान्तराद्विभागं विधत्ते न तदाकाशादिदेशाद्विभागः। यदा त्वाकाशादिदेशाद्विभागं न तदावयवान्तरादित्यस्ति नियमः कर्मणो गगनविभागाकर्त्तृत्वस्य द्रव्यारम्भकसंयोगविरोधिविभागारम्भकत्वेन धूमस्य धूमध्वजत्वेनेव व्यभिचाराभावात् ततश्चावयवकर्म अवयवान्तरादेव विभागं करोति नाकाशादिदेशात् ततो विभागाद्द्रव्यारम्भकसंयोगनिवृत्तिः ततः कारणाभावात् कार्य्याभाव इति न्यायादवयविनिवृत्तिः निवृत्तेऽवयविनि तत्का-

वता भूतेन्द्रियमनसां दोषात् भ्रमप्रमादकरणापाटवादि-प्रयुक्ता एव वचनामभिशुद्धय सम्भाव्यन्ते, न चेश्वरत्वपचि तासां सम्भवः, तदुक्तम् "रागाज्ञानादिभिर्वक्ता ग्रस्तत्वादनृतं वदेत्। ते चेश्वरे न विद्यन्ते स ब्रूयात् कथमन्यथेति"।

ननु तेनेश्वरेण वेदस्य प्रणीतत्वसमवे विप्रतिपत्तिरत आह। उप०"तद्वचनादाम्नायस्य प्रामाण्यमिति" १०सू०। 'इति शास्त्रपरिसमाप्तौ। तद्वचनाच्चेश्वरेण वचनात् प्रणयनादाम्नायस्य वेदस्य प्रामाण्यं तथाहि वेदास्तावत् पौरुषेया वाक्यत्वादिति साधितं नचास्मदादयस्तेषां वक्तारस्तावच्छिन्नानां वक्तारः सम्भाव्यन्ते, अतीन्द्रियार्थत्वात्, नचातीन्द्रियार्थदर्शिनोऽस्मदादयः। किञ्च आप्तोक्ता वेदा महाजनपरिगृहीतत्वात् यन्नाप्तोक्तं न तन्महाजनपरिगृहीतं महाजनपरिगृहीतञ्चेदं तस्मादाप्तोक्तम्। स्वतन्त्रपुरुषप्रणीतत्वस्याप्तोक्तत्वम्। महाजनपरिगृहीतत्वञ्च सर्व्वदर्शनान्तःपातिपुरुषानुष्ठीयमानार्थत्वम्, क्वचित् फलाभावः कर्त्तृकर्मसाधनवैगुण्यादित्युक्तम्। कर्त्तृस्मरणाभावाच्चैवमिति चेन्न कर्त्तृस्मरणस्य पूर्व्वमेव साधितत्वात्, तत्प्रणीतत्वस्य स्वतन्त्रपुरुषप्रणीतत्वादेव सिद्धम्, न त्वस्मदादीनां सङ्क्षेपाय वेदप्रणयने स्वातन्त्र्यं सम्भवतीत्युक्तत्वात्। किञ्च प्रमाया गुणजन्यत्वेन वैदिकप्रमायामपि गुणजन्यत्वमावश्यकं तत्र च गुणो वक्तृयथार्थवाक्यार्थज्ञानमेव वाच्यस्तथा च तादृश एव वेदे वक्ता, य स्वर्गापूर्व्वादिविषयसाक्षात्कारवान्, तादृश नेश्वरादन्य इति सुष्ठु"।

औलूखल त्रि० उलूखले क्षुण्णं यैषिकोऽण्। १उलूखलपिष्टयावकादौ। उलूखले भव अण्। २उलूखलभवे मल्लादौ च। "अभिषुत्यतोलूखलान्युद्यमता" कात्या० १०,२,११,। "उलूखलैमथा औलूखला ध्वमय" कर्क

औवेणक न० "अपरान्तकमुल्लोप्य मद्रकं प्रकरीं तथा। औवेणकं सरोविन्दुमुत्तरं गीतकानि च" या०उक्ते गीतिभेदे

औशनस न०उशनसा शुक्रेण प्रोक्तम् अण्। शुक्रेण प्रणीते १उपपुराणे "तथैवौशनसेरितम्" कूर्म्मपु० २८ष्ठप्रणयनरूपे शास्त्रे च। २धर्म्मशास्त्रभेदे तच्च प्रतिलोमजातसर्व्वसङ्करविभागप्रतिपादकप्रायम्। उशनसा दृष्टं साम अण्। ३उशनसा दृष्टे सामनि। तस्येदम् अण्। ५तत्सम्बन्धिनि त्रि०। 'व्यूढ्वा चौशनसं व्यूहम्' भा०व० २८४अ०। "लोकमौशनसं दिव्यं शक्रलोकञ्च गच्छति" भा०अनु०१०७अ०। उशनसि भवः अण्। ६शुक्रभवे स्त्रियां ङीप्। सा च ७देवयान्याख्यायां तदीय दुहितरि "विद्यौशनसि! मद्भन्ते न त्वमर्होऽसि भाविनि!" भा० आ० ८१ अ० देवयानीं प्रति कचोक्तिः।

औशिज पु० उशिगेव प्रज्ञा०स्वार्थे अण्। १कक्षीवति। "औशिजाय वणिजे दीर्घश्रवसे" ऋ० १,११२,११। २प्रवरर्षिभेदे "काक्षीवतामाङ्गिरसौचथ्यगौतमौशिजकाक्षीवतेति" आश्व० श्रौ० १२,११,२।

औशीनर पु० उशीनरस्यापत्यम् उत्सा०अञ्। उशीनरस्यापत्येषु शिविप्रभृतिषु। उशीनरशब्दे १२७५पृ०उशीनरशब्दे उक्ते। तद्वृत्तान्त "उशीनरस्य पत्न्यस्तु पञ्च राजर्षिवंशजाः। नृगा कृमिर्नवा दर्वा पञ्चमी च दृषद्वती। उशीनरस्य पुत्रास्तु पञ्च तासु कुलोद्वहाः। तपसा चैव महता जाता वृद्धस्य चात्मजाः। नृगायास्तु नृगः पुत्रः कृम्याः कृमिरजायत। नवायास्तु नवः पुत्रो दर्व्वायाः सुव्रतो ऽभवत्। दृषद्वत्यास्तु सञ्जज्ञे शिविरौशीनरो नृप" हरिवं०३१अ०। उक्तः तच्चरितञ्च भा०वन०१९६अ०। "देवानां कथा सञ्जाता महीतलं गत्वा महीपतिं शिविमौशीनरं साध्वेन जिज्ञासिष्याम इति। एवं भो इत्युक्त्वा अग्नीन्द्रावुपातिष्ठेताम्। अग्निः कपोतरूपेण तमभ्यधावदाभिपार्थमिन्द्रः श्येनरूपेण। अथ कपोतो राज्ञो दिव्यासनासीनस्य उत्सङ्गं न्यपतत्। अथ पुरोहितो राजानमब्रवीत्। प्राणरक्षार्थं श्येनाद्भीतो भवन्तं प्राणार्थी प्रपद्यते। अस्य दद्यात् भवान् पार्थिवोऽस्य निष्कृतिं कुर्य्यात्। घोरं कपोतस्य निपातमाहुः। अथ कपोतो राजानमब्रवीत्। प्राणरक्षार्थं श्येनाद्भीतो भवन्तं प्राणार्थी प्रपद्ये। अङ्गैरङ्गानि प्राप्यार्थी मुनिर्भूत्वा प्राणास्त्वां प्रपद्ये। स्वाध्यायेन कर्षितं ब्रह्मचारिणं मां विद्धि। तपसा दमेन युक्तमाचार्य्यस्याप्रतिकूलभाषिणम् एवं युक्तमपापं मां विद्धि। गदामि वेदान् विचिनोमि छन्दः सर्वे वेदा अक्षरशो मे अधीताः। न साधु दानं श्रोत्रियस्य प्रदानं मा प्रदाः श्येनाय न कपोतोऽस्मि। अथ श्येनो राजानमब्रवीत्। पर्य्यायेण वसतिर्म्मा भवेषु सर्गे जातः पूर्व्वमस्मात् कपोतात्। त्वमाददानोऽद्य कपोतमेनं मा त्वं राजन्! विघ्नकर्त्ता भवेथाः। राजोवाच। केनेदृशी जातु पुरा हि दृष्टा वागुच्यमाना शकुनेन संस्कृता। यो वै कपोतोऽद्ध्रतेमाश्च श्येन उभौ विदित्वा कथमस्तु साधु। नास्य वर्षति वर्षकाले नास्य बीजं रोहति काल उप्तम्। भीतं प्रपन्नं योहि ददाति शत्रवे न त्राण

[illegible]

पौमीर [illegible]

[illegible]

[illegible]

९२अ० । अन्य च यथा ययातिर्मातामहच्छया औषो-
नरिशब्दे दर्शितः । तत्र भगच्छब्देनैतस्यापि परामर्शात्
ध न० ओषधेरिदम् "ओषधेरजातौ" पा० अण् । ओषधि-
जाते १अन्नादौ २रोगनाशके द्रव्यभेदे । स्वार्थेऽण् ।
३ओषधौ च । औषधशब्दार्थश्च सुश्रुते दर्शितः
"एवमेतत् पुरुषो व्याधिरौषधम् क्रियाकाल इति चतु-
ष्टयं व्याख्यातम्" इत्युक्त्वा "औषधग्रहणात् द्रव्यगुणरस-
वीर्य्यविपाकप्रभावानामादेशः" इत्युक्तम् । तेन द्रव्यमात्रसाध्य-
स्यौषधत्वम् । अतएव तैलघृतनवनीतविशेषाणामप्यौ-
षधत्वम् । "रोगमादौ परीक्षेत ततोऽनन्तरमौषधम् । ततः
कर्म्म भिषक् पश्चात् ज्ञानपूर्व्वं समाचरेत्" चक्रद० परि-
पाटीत्युक्त्वा रोगभेदेन औषधविशेषा उक्तास्तत एव तेऽ-
धिगम्याः । तदुपयोगिभूम्यादिकं सुश्रुते दर्शितं यथा
"अथातो भूमिप्रविभागविज्ञानीयमध्यायं व्याख्यास्यामः
श्वभ्रशर्कराश्मविषमवल्मीकश्मशानाघातनदेवतायतनसिक-
ताभिरनुपहतामनूषरामभङ्गुरामदूरोदकां स्निग्धां प्ररो-
हवतीं मृद्वीं स्थिरां समां कृष्णां गौरीं लोहितां वा
भूमिमौषधार्थं परीक्षेत तस्यां जातमपि कृमिविषशस्त्रात-
पपवनदहनतोयसम्बाधमार्गैरनुपहतमेकरसं पुष्टं पृथ्ववगाढ-
मूलमुदीच्यां चौषधमाददीतेत्यौषधभूमिपरीक्षाविशेषः सा-
मान्यः । विशेषतस्तु तत्राश्मवती स्थिरा गुर्व्वी श्यामा
कृष्णा वा स्थूलवृक्षशस्यप्राया स्वगुणभूयिष्ठा । स्निग्धा शीतला-
सन्नोदका स्निग्धशस्यतृणकोमलवृक्षप्राया शुक्लाऽम्बुगुण-
भूयिष्ठा । नानावर्णा लघ्वश्मवती प्रविरलाल्पपाण्डु-
वृक्षप्ररोहाऽग्निगुणभूयिष्ठा । रूक्षा भस्मरासभवर्णा
तनुरूक्षकोटराल्परसशस्यप्रायाऽनिलगुणभूयिष्ठा । मृद्वी
समा श्वभ्रवत्यव्यक्तरसजला सर्व्वतोऽसारवृक्षा महापर्व्वत-
वृक्षप्राया श्यामा चाकाशगुणभूयिष्ठा । तत्र केचिदाहु-
राचार्य्याः । प्रावृड्वर्षाशरद्धेमन्तवसन्तग्रीष्मेषु यथासंख्यं
मूलपत्रत्वक्क्षीरसारफलान्याददीतेति तत्तु न सम्यक्
कस्मात् सौम्याग्नेयत्वाज्जगतः । सौम्यान्यौषधानि सौम्येषु
ऋतुष्वाददीताग्नेयान्याग्नेयेषु एवमव्यापन्नगुणानि भवन्ति ।
सौम्यान्यौषधानि सौम्येषु ऋतुषु गृहीतानि सोमगुणभूयि-
ष्ठायां भूमौ जातान्यतिमधुरस्निग्धशीतानि जायन्ते ।
एतेन शेषं व्याख्यातम् । तत्र पृथिव्यम्बुगुणभूयिष्ठायां भूमौ
जातानि विरेचनद्रव्याण्याददीताग्न्याकाशमारुतगुणभूयि-
ष्ठायां वमनद्रव्याणि । उभयगुणभूयिष्ठायामुभयतोभागानि ।
आकाशगुणभूयिष्ठायां संशमनानि, एवं बलवत्तराणि भवन्ति ।
सर्व्वाण्येव चाभिनवान्यन्यत्र मधुघृतगुडपिप्पलीविड-
ङ्गेभ्यः । सर्व्वाण्येव सक्षीराणि वीर्य्यवन्ति तेषाम-
सम्पत्तावनतिक्रान्तसंवत्सराण्याददीतेति । भवन्ति चात्र ।
गोपालास्तापसा व्याधा ये चान्ये वनचारिणः ।
मूलाहाराश्च ये तेभ्यो भेषजव्यक्तिरिष्यते । सर्व्वावयव-
साध्येषु पलाशलवणादिषु । व्यवस्थितो न कालोऽस्ति
तत्र सर्व्वो विधीयते । गन्धवर्णरसोपेता षड्विधा भूमि-
रिष्यते । तस्माद्भूमिस्वभावेन बीजिनः षड्रसैर्युताः ।
अव्यक्तः किल तोयस्य रसो नित्यं विनिश्चितः । रस एव
स चाव्यक्तो व्यक्तो भूमिरसाद्भवेत् । सर्व्वलक्षणसम्पन्ना
भूमिः साधारणा स्मृता । द्रव्याणि यत्र तत्रैव तद्गु-
णानि विशेषतः । विगन्धेनापरामृष्टमविपन्नं रसा-
दिभिः । नवं द्रव्यं पुराणं वा ग्राह्यमेव विनिर्दिशेत् ।
विडङ्गं पिप्पली क्षौद्रं सर्पिश्चाप्यनवं हितम् । शेषम-
प्यस्वभिनवं गृह्णीयाद्दोषवर्जितम् । जङ्गमानां वयःस्थाना-
द्रक्तरोमनखादिकम् । क्षीरमूत्रपुरीषाणि जीर्णाहारेषु
संहरेत् । प्लुतान्यन्नाण्डफलकशङ्कुविन्यस्तभेषजम् । प्रश-
स्तायां दिशि शुचौ भेषजागारमिष्यते" ।
औषधग्रहणे परिभाषादिकमुक्तं भावप्र० यथा
"प्रशस्तदेशे सञ्जातं प्रशस्तेऽहनि चोद्धृतम् । अल्पमात्रं
बहुगुणं गन्धवर्णरसान्वितम् । दोषघ्नमग्लानिकरमविक-
न विकारि यत् । समीक्ष्य काले दत्तञ्च भेषजं स्यात् गुणा-
वहम् । आग्नेया विन्ध्यशैलाद्याः सौम्यो हिमगिरि-
र्मतः । अतस्तदौषधानि स्युरनुरूपाणि हेतुभिः ।
आग्नेया अधिकाग्न्यंशाः सौम्या अधिकसोमांशाः ।
औषधय एवौषधानि । अत्र स्वार्थेऽण् । अनुरूपाणि
सदृशानि । अन्येष्वपि प्ररोहन्ति वनेषूपवनेषु च ।
गृह्णीयात्तानि सुमनाः शुचिः प्रातः सुवासरे । आदित्य-
सम्मुखो मौनी नमस्कृत्य शिवं हृदि । साधारणधरा-
द्रव्यं गृह्णीयादुत्तराश्रितम् । साधारणधराद्रव्यम्
सर्व्वभूमिभवं द्रव्यम् । उत्तराश्रितं स्यात् उत्तरदि-
ग्भवम् । वल्मीककुत्सितानूपश्मशानोषरमार्गजाः ।
जन्तुवह्निहिमव्याप्ता नौषध्यः कार्य्यसाधिकाः । शरद्य-
खिलकार्य्यार्थं ग्राह्यं सरसमौषधम् । विरेकवमना-
र्थन्तु वसन्तान्ते समाहरेत् । वसन्तान्ते वसन्तमध्ये समा-
हरेत् स गृह्णीयात् । अतिस्थूलजटा याः स्युस्तासां
ग्राह्यास्त्वचो ध्रुवम् । गृह्णीयात् सूक्ष्ममूलानि सक-
लान्यपि बुद्धिमान् । अन्यच्च । महान्ति येषां मूलानि

[illegible] । [illegible] । [illegible] । [illegible] ।

[illegible] (वृषभादि) इत्यस्य [illegible] । [illegible] ।

[illegible] । [illegible] ।

[illegible] । (बृहस्पति) इति [illegible] । [illegible] । (पौषीस्नान) इति [illegible] ।

[illegible] । [illegible] ।

गृह्यते। यथा प्रतिनिधिः । चित्रकाभावतो दन्ती क्षारं शिखरिणोऽथवा। अभावे धन्वयासस्य प्रक्षेप्या दुरालभा। शिखरी चापामार्गं । तगरस्याप्यभावे तु कुष्ठं दद्याद्भिषग्वरः । मूर्वाभावे त्वचो ग्राह्या जिङ्गिन्याः प्रभवा बुधैः । अश्विगन्धा अभावे तु भानवन्दं गृहीत्वा । मधुयष्ट्यां अभावे तु मीनकण्ठगिरा मता । नीलकाव्यानिया मधुरगिरा। वहुवाभावतो देयं कत्थकारोदारुवन्दनम् । नीलोत्पलस्याभावे तु कुमुदं देयमिष्यते । जातिपुष्पं न यत्राप्ति लवङ्गं तत्र दीयते । अजीवमादि पयसो अभावे तद्रसो मतः। पौष्करामावतः कुष्ठं तथा मद्राक्षाभावतः । स्वर्णैरकस्याभावे तु भिषग्भिर्दीयते मदे। पद्मकाश्च पिप्पल्यौ पिप्पलीमूलवत् स्मृतौ। अभावे सोमराज्यास्तु प्रपुन्नाटफलं मतम्। यदि न स्यात् ग्रामिया तदा देया भिगा बुधैः । सोमराजी वाकुची । प्रपुन्नाटफलं चक्रमर्द्दफलम्। दारुनिशा दारुहरिद्रा भिसा हरिद्रा। रसाञ्जनस्याभावे तु सम्यग्दार्व्वी प्रयुज्यते क्षीरकाकोल्यभावतो देया स्फटिका तद्गुणा जनैः। मोरटो (मोरटीमाटी) इति लोके। स्फटिका (फटिकारी) इति लोके। तालीशपत्रकाभावे स्वर्णतालो प्रयुज्यते। भार्ग्यभावे तु तालीश खदिरकारी जटाऽपि वा। रुचकाभावतो दद्यात्लवणं पांशुपूर्व्वकम्। अभावे मधुयष्ट्यास्तु धातकीं प्रयोजयेत्। रुचक(सौचार) इति लोके पांशुलवणं (खारी) इति लोके। अम्लवेतसकाभावे चुक्रं दातव्यमिष्यते। शृङ्गी यदि न लभ्येत तदेयं काकतुण्डफलम्। तयोरभावे कुसुमं पञ्चकाल मतं बुधैः। नवपुष्पकुसुमं देयं नखस्याभावतः पुनः। कस्तूर्य्यभावे कङ्कोल चैषणीयं विदुर्बुधाः। कङ्कोलस्याप्यभावे तु जातीपुष्पं प्रदीयते। सुगन्धिमुस्तकं देयं कर्पूराभावतो बुधैः। कर्पूराभावतो देयं ग्रन्थिपर्णं विशेषतः। कुङ्कुमाभावतो दद्यात् कुसुम्भकुसुमं नवम्। श्रीखण्डचन्दनाभावे कर्पूरं देयमिष्यते। अभावेऽप्येतयोर्वैद्य प्रक्षिपेत् रक्तचन्दनम्। रक्तचन्दनकाभावे नवोशीरं विदुर्बुधाः। सुखा भातिविषाभावे मि-साभावे मिसा मता। अभावे नागपुष्पस्य पद्मकेशरमिष्यते। मेदा जीवककाकोल्यौ ऋद्धिवृद्धेऽपि चासति। वरी विदार्य्यश्वगन्धा वाराही च क्रमात् क्षिपेत्। वरी शतावरी। वाराह्या अभावे चर्मकारालुको मतः। वाराहीकन्दसंज्ञस्तु पश्चिमे गृष्टिसंज्ञकः। वाराहीकन्दएवान्यैश्चर्मकारालुको मतः। अनूपदेशजे देशे वराह इव लोमवान्। पद्मकस्याभावे तु रक्तचन्दनमिष्यते। भल्लातकाभावतश्चित्रं भवेच्चोरभावतः। सुवर्णाभावतः स्वर्णमाक्षिकं प्रक्षिपेद्बुधः। श्वेतन्तु माक्षिकं ज्ञेयं बुधैः रजतवन्मतम्। माक्षिकस्याप्यभावे तु प्रदद्यात् स्वर्णगैरिकम्। पार्श्वमिव वा रौप्यं यत्र यस्य न लभ्यते। तत्र कान्तेन तस्यापि भिषग्युञ्ज्यादिविधानम्। कान्ताभावे तीक्ष्णलोहं योजयेद्वैद्यसत्तमः। अभावे मौक्तिकस्यापि मुक्ताशुक्तिं प्रयोजयेत्। मधु यत्र न लभ्येत तत्र जीर्णगुडो मतः। मत्स्याण्डाभावतो दद्युर्भिषजः सितशर्कराम्। अथ च सितायास्तु बुधैः खण्डं प्रयुज्यते। क्षाराभावे रसौ मौद्रौ माक्षरो वा प्रदीयते। अत्र यो-ज्ञानि वस्तूनि यानि तेषु च तेषु च। योज्यमेकतराभावे परं वैद्येन जानता। रसवीर्य्यविपाकाद्यैः समं द्रव्यं विचिन्त्य च। तुल्यादिविपमन्यद् द्रव्याणान्तु रसादिवत्। योगे यदप्रधानं स्यात्तस्य प्रतिनिधिर्मतः। यत्तु प्रधानं तस्यापि सदृशं नैव गृह्यते। व्याधियुक्तं यद्द्रव्यं गुणोत्तममपि तत् त्यजेत्। अनुक्तमपि युक्तं यत् योजयेत् तद्रसादिवत्। द्रव्यगतपञ्चपदार्थं कथयाम्याह। द्रव्ये रसो गुणो वीर्य्यविपाकः शक्तिरेव च। पदार्थाः पञ्च तिष्ठन्ति स्वस्वं कुर्व्वन्ति कर्म्म च"।

"वीर्य्यवन्त्यौषधिमीव विकारे सान्निपातिके" कुमा०। "द्वेष्योऽपि सम्मतः शिष्टस्तस्यार्त्तस्य यथौषधम्" रघुः। "' स विषमौषधम्"उद्भट' "भवौषधात् श्रोत्रमनोऽभिरामात्" भाग०१,१, 'औषधं जाह्नवीतोयं वैद्यो नारायणः स्वयम्" पुरा०। संसाररूपदुःखदायकरोगनिवारके ४परमेश्वरे च 'औषधं जगतां सेतुः" विष्णु०स०।

औषधि स्त्री ओष+धा+कि—प्रा०स०। सस्यगोषधौ। "निरमन्ति न जृम्भितमौषधयः" किरा० वा ङीप्। औषधी।

औषर न० उषरे भवः अण्। पांशुलवणे राजनि०।

औषरक न० औषरमिव कन्। (खारी) लवणभेदे राजनि०

औषस न० उषसि भवम् सन्धिवेलेत्यादिना योगविभागात् अण्। १उषसिभवे। वस्तुतः भवार्थे "कालाट्ठञ्"पा०उक्ते ठञ् स्यात् तेन उषस इदम् इत्यण् इत्युचितम्। २उषःसम्बन्धिनि। "अनुदितौषसरागेति "औषसातपभयादपलीनम्" इति च" किरा० स्त्रियां ङीप्। "या गोधा पत्यौषसी सा" शत० ब्रा० ३,१,२,८, उषस्+वा० यत् स्वार्थे अण्। औषस उषोभवे त्रि०।

[illegible]

इति [illegible] समाप्तम् ।

इति श्रीतारानाथतर्कवाचस्पति-भट्टाचार्य विरचिते बाचस्पत्याभिधाने

संस्कृताभिधानपरिशिष्टं समाप्तम् ।

श्री [illegible]